॥ श्रीः ॥

न्यायपञ्चाननविश्वनाथभट्टाचार्यप्रणीता

# कारिकावली

## न्यायसिद्धान्तमुक्तावल्याख्य-स्वोपज्ञवृत्तिसहिता

### लोकमणिप्रणीत-'आलोक'व्याख्योपेता

## अनुमानखण्डम्

**व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥**

**अनुमायाम्—**

• सिद्धान्तमुक्तावली •

अनुमितिं व्युत्पादयति—व्यापारस्त्विति । अनुमायामनुमितौ व्याप्तिज्ञानं करणं, परामर्शो व्यापारः । तथाहि—येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिः गृहीता, पश्चात्स एव पुरुषः क्वचित्पर्वतादावविच्छिन्नमूलां धूमलेखां पश्यति, तदनन्तरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति, पश्चाच्च वह्निव्याप्यधूमवानयमिति ज्ञानं भवति, स एव परामर्श इत्युच्यते । तदनन्तरं पर्वतो वह्निमानिति ज्ञानं जायते, तदेवानुमितिः ॥ ६६ ॥

• आलोकः •

सकर्तृकत्वात् क्षित्यादेः कार्यत्वाद्योऽनुमीयते ।
कर्तृत्वेन नमस्तस्मै विभवेऽखिलयोनये ॥ १ ॥
व्याख्याय कारिकावल्याः प्रत्यक्षं खण्डमादिमम् ।
विवृणोत्यनुमानञ्च खण्डं लोकमणिर्द्विजः ॥ २ ॥
महादेवो रामभद्रो नृसिंहः कृष्णवल्लभः ।
नरसिंहश्च सूर्याद्या अत्र मार्गप्रदर्शकाः ॥ ३ ॥

[ अनुमाऽसन्निकृष्टेऽर्थे व्याप्यदर्शनजा मतिः ।

तेन—

पञ्चलक्षणकाल्लिङ्गाद् गृहीतान्नियमे स्मृते ।
परोक्षे लिङ्गिनि ज्ञानमनुमानं प्रचक्षते ॥

यद्वा—

सन्निकृष्टेतरार्थस्य यज्ज्ञानं व्याप्यदर्शनात् ।
भवेत्तदनुमानं वै प्रत्यक्षपूर्वकं यथा ॥
दर्शनाद् धूमवत्त्वस्य पर्वते वह्निमत्त्वधीः ।
पर्वतो वह्निमान् धूमान्महानसवदित्यसौ ॥
पक्षः साध्यश्च हेतुश्च दृष्टान्तः क्रमशो मताः ।

अनुमितिकरणमनुमानं लिङ्गपरामर्शो वा सम्यगविनाभावेन परोक्षानुभवसाधनं
तदिति । ]

अनुमानिरूपककारिकावतारणाय भूमिकामारचयति—**अनुमितिमिति । अनुमितिम्**
अनुमास्वरूपम् । **व्युत्पादयति** निरूपयति इति । अनेन प्रत्यक्षनिरूपणानन्तरमनुमितिनिरू-
पणेऽवसरसङ्गतिरपि संसूच्यते । उद्देशक्रमेणापि प्रत्यक्षानन्तरमनुमितेरेव निरूपणी-
यत्वात् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति गौतमोक्तेः प्रत्यक्षमप्यनुमिति-
स्तथोपमितिशब्दजे इति प्रकृतग्रन्थोक्तेश्च । न चोपजीव्योपजीवकभावसङ्गत्या प्रत्यक्ष-
निरूपणानन्तरमनुमितिनिरूपणमिति वाच्यं, प्रत्यक्षेऽपि अनुमित्युपजीवकत्वसत्त्वेनानु-
मितौ प्रत्यक्षायानन्तर्याभिधाननियामकत्वासम्भवादिति प्रभाकृतः । अनुमानस्य प्रत्यक्ष-
पूर्वकत्वात्तदनन्तरमस्य निरूपणं प्राप्तावसरमेव । उक्तं यथा तत्त्वचिन्तामणौ—
'प्रत्यक्षोपजीवकत्वात्प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात्प्रागनुमानं निरूप्यत' इति ।
करणनिर्देशानन्तरमेव व्यापारे जिज्ञासोदयसम्भवेऽपि परामर्शनिष्ठकरणत्वे स्वस्यारुचि
दर्शयितुं परममूले प्रथमं व्यापारमाह । अनुमायां व्यापारः तु परामर्शः व्याप्तिधीः
करणं भवेत् इति । **अनुमायाम्** अनुमितौ तदाख्ये व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्य-
ज्ञाने । **व्यापारः** विषयमनःसंयोगरूपवृत्तिः करणजन्यत्वे सति करणजन्यफलजनकत्वं
व्यापारत्वमिति । उक्तमेव—'यं जनयित्वैव यस्य यज्जनकत्वं स तद्व्यापारः' इति । तु
हि । **परामर्शः** ज्ञानविशेषः व्याप्यस्य पक्षवृत्तित्वधीः व्याप्तिविशिष्टपक्षधर्मताज्ञानं
वा । भवति । अनुमितौ लिङ्गपरामर्श एव व्यापार इति फलितार्थः । **व्याप्तिधीः**
व्याप्तिः साध्यसाधनयोरव्यभिचरितसम्बन्धः यत्र यत्र धूमस्तत्र तत्र वह्निरित्येवंरूपः
साहचर्यनियमस्तस्याः धीर्ज्ञानम् । **करणं** व्यापारवदसाधारणं कारणम् । **भवेत्** सम्पद्यत
इति । यथा हि प्रत्यक्षे इन्द्रियं करणं विषयेन्द्रियसंयोगो व्यापारस्तथैवानुमितौ व्याप्ति-
ज्ञानं करणं लिङ्गपरामर्शस्तु व्यापार इति ।

**मूले अनुमायामिति । अनुयामामिति अनुमितौ** परामर्शजन्यज्ञाने **व्याप्तिज्ञानं** व्याप्तेः
साध्यसाधनयोरव्यभिचरितसम्बन्धस्य ज्ञानं मतिः **करणम्** असाधारणकारणं भवति ।
**परामर्शः** व्याप्तिविशिष्टपक्षधर्मताज्ञानम् । **व्यापारः** वृत्तिः भवतीति । करणज्ञानानन्तर-
मेव व्यापारजिज्ञासोत्पत्तेः परममूले पश्चान्निर्दिष्टमपि करणं मूले प्रथममेव निर्दिष्ट-
मिति । व्याप्तिज्ञानपरामर्शयोः करणव्यापारत्वे उदाहरति—**तथा हीत्यादिना । तथा**
**हि** इति निदर्शने । **येन** येन हि सम्बद्धेन । **पुरुषेण** जनेन । **महानसादौ** पाककक्षादौ । धूमे
तरौ । **वह्नेरग्नेः** व्याप्तिरव्यभिचरितसम्बन्धः । गृहीता अनुभूता । पश्चादनन्तरम् । सः

यत्र यत्र धूमस्तत्र तत्र व्याप्तिरिति गृहीतव्याप्तिः । **एव** इत्यवधारणे नान्य इति । **पुरुषः** जनः । **पर्वतादौ** गिरिप्रभृतिप्रदेशे । **अविच्छिन्नमूलाम्** मूलसम्बद्धरेखाम् । **धूमलेखां** तीरपङ्क्तिम् । **पश्यति** विलोकयति । तदनन्तरम् अनवच्छिन्न मूलधूमरेखादर्शनानन्तरं धूमस्वरिः । वह्निव्याप्यः वह्नेर्व्याप्तेर्विषयः, यत्र यत्र धूमस्तत्र तत्र वह्निर्यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभावः इति । **एवंरूपं** एवम्प्रकारकं धूमवह्न्योरव्यभिचरितसाहचर्यात्मकम् । **व्याप्तिस्मरणं** व्याप्तेः साध्यसाधनयोरत्र वह्निधूमयोः सततसाहचर्यनियमस्य स्मरणं संस्कारजन्यज्ञानं पुनराकलनम् । **भवति** सम्पद्यते । **पश्चाद्** व्याप्तिस्मरणानन्तरम् । **च** हि । **अयं पर्वतः वह्निव्याप्यधूमवान्** वह्निना अग्निना व्याप्यो नियतसाहचर्यो यो धूमस्तद्वांस्तद्युक्तः । **इति** इत्थम् । **ज्ञानमवबोधः** । **भवति** सम्पद्यते । **सः** तथाविधः । **एव** हि । **परामर्श इति उच्यते** परामर्शशब्देन कथ्यते । **तदनन्तरं** परामर्शानन्तरम् । **'पर्वतो वह्निमान्' इति** इत्थम्प्रकारकं यज्ज्ञानमवबोधः । तद् तादृशं ज्ञानम् । **एव** हि । **अनुमितिः** अनुमितिपदवाच्यमिति । अत्र हि परामर्शो व्याप्तिज्ञानजन्यः, स च व्याप्तिज्ञानजन्यानुमितिजनक इति तस्य व्यापारत्वं परामर्शजनकसाधनतया व्याप्तिधियः करणत्वमिति । महानसादौ धूमं तद्योनित्वेन वह्निञ्च दृष्ट्वा यत्र यत्र धूमस्तत्र तत्र वह्निरिति गृहीतसंस्कारो जनः पर्वते धूममनवच्छिन्नमूलं दृष्ट्वा स्मृत्वा च धूमवह्न्योः साहचर्यनियमम् एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतया वह्निव्याप्यधूमवानयमिति परामृश्य ततः अदृष्टेऽपि वह्नौ पर्वतो वह्निमानित्यनुमिनोति । एतदेव लिङ्गपरामर्शजन्यं ज्ञानमनुमितिरिति ॥ ६६ ॥

**अनुवाद**—अब ( प्रत्यक्ष प्रमा के निरूपण के बाद क्रमप्राप्त ) अनुमिति का निरूपण करते हैं—

अनुमिति में परामर्श ही व्यापार है और व्याप्ति का ज्ञान करण होता है ।

अनुमा अर्थात् अनुमिति में व्याप्ति का ज्ञान ही करण होता है, परामर्श ही व्यापार होता है । जैसे कि जिस पुरुष ने महानस ( चूल्हा ) आदि में धुएँ में आग की व्याप्ति का ग्रहण किया है अर्थात् धुंआ और आग का व्यभिचाररहित सम्बन्ध जान लिया है, बाद में वही पुरुष कहीं पर्वत आदि में मूल से विच्छेद न हुए धुएँ की रेखा को देख लेता है, उसके बाद धुआँ वह्नि से व्याप्य है; इस प्रकार की व्याप्ति का स्मरण उसको हो जाता है और बाद में 'यह वह्नि से व्याप्य धुएँ वाला है' ऐसा ज्ञान हो जाता है, यही ज्ञान 'परामर्श' कहा जाता है । उसके बाद 'पर्वत वह्नि से युक्त है' ऐसी अनुमिति हो जाती है ॥ ६६ ॥

**—ज्ञायमानं लिङ्गं तु करणं न हि ।**
**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥**

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमितिकरणमिति वदन्ति तद् दूषयति—ज्ञायमानमिति । लिङ्गस्यानुमित्यकरणत्वे युक्तिमाह—अनागता-

दीति । यद्यनुमितौ लिङ्गं करणं स्यात्तदाऽनागतेन विनष्टेन च लिङ्गेनानुमितिर्न स्यादनुमितिकरणस्य लिङ्गस्य तदानीमभावात् ॥ ६७ ॥

**आलोकः**—परममूले **ज्ञायमानमिति** । **ज्ञायमाने** ज्ञायते वह्निव्याप्यो धूम इति व्याप्तिविशिष्टतया प्रतीयत इति प्रतीयमानं **लिङ्गं** हेतुः **न करणं हि** नैवानुमितिकारणमिति । तत्र युक्तिं निर्दिशति—**अनागतेति** । तदा यदि लिङ्गमेवानुमितौ करणं स्यात्तस्यामवस्थायां **अनागतादिलिङ्गेन** अनागतमनुपस्थितमादिपदादतीतञ्च यल्लिङ्गं तेन मानसवह्निव्याप्यवत्तापरामर्शेन । **अनुमितिरनुमा** । **न स्यात्** नैव सम्भवेत् अनुमित्यव्यवहितपूर्वक्षणे तयोरसत्त्वादिति । तदेव विवृणोति मूले—**अत्रेत्यादिना** । **अत्र** प्रसङ्गेऽस्मिन् । **प्राचीनाः** विशेषेण वैशेषिकाचार्या उदयनप्रभृतयः । तु एतद्व्यतिरिक्तम् । **व्याप्यत्वेन** व्याप्तिविशिष्टतया । **ज्ञायमानं** प्रतीयमानम् । **लिङ्गं** हेतुः । **अनुमितिकरणम्** अनुमितेरसाधारणं कारणम् । **इति** इत्थम् । **वदन्ति** कथयन्ति । **तत्** तथाविधं कथनम् । **दूषयति** युक्त्या परिहरति । **ज्ञायमानमिति** । ज्ञायमानं लिङ्गं तु करणं न हि इति कथनेनेति । व्याप्तिविशिष्टतया हेतोर्ज्ञानं न करणं किन्तु व्याप्तिविशिष्टतया ज्ञायमानो हेतुरेव करणं धूमादिति हेतुपञ्चम्युपलब्धेरिति यदुक्तं वैशेषिकैस्तन्न युक्तमित्याशयः । **लिङ्गस्य** हेतोः । **अनुमित्यकरणत्वे** अनुमितेः करणत्वेनानङ्गीकारे । **युक्तिमुपायम्** । **आह** । **अनागतादीति** । **यदि** । **अनुमितौ** अनुमितिज्ञाने । **लिङ्गं** ज्ञायमानं लिङ्गमेव । **करणं** कारणम् । **स्यात्** । **तदा** । **अनागतेन** अनुपस्थितेन । **विनष्टेन** अतीतेन । **लिङ्गेन** हेतुना मानसपरामर्शरूपेण, **च** । **अनुमितिरनुमा** । **न स्यात्** । तथाभवने हेतुमाह—**अनुमितिकरणस्येति** । **अनुमितिकरणस्य** अनुमायाः करणत्वेन गृहीतस्य । **लिङ्गस्य** हेतोः । **तदानीम्** अनुमाकाले । **अभावात्** विरहादिति ।

**अयम्भावः**—यद्यनुमितौ प्रतीयमानं लिङ्गमेव करणं स्यात् तदा अतीतानागतविषयको यत्र मानसो वह्निव्याप्यवत्तापरामर्शस्तत्रानुमितेरनुदयः स्यात्तदव्यवहितपूर्वक्षणे तयोरसत्त्वात् । तत्र व्यभिचारान्न तादृशलिङ्गत्वेन करणत्वम् । नैव च तत्प्रागभावादीनामेव लिङ्गत्वं तेषां तदा तद्व्याप्यत्वेनापरामृश्यमाणत्वादिति । न च परामर्शरूपव्यापारसम्बन्धेन तदानीं लिङ्गोपस्थितिर्वाच्या अतीतादिलिङ्गस्य परामर्शाजनकतया परामर्शस्य तद्व्यापारत्वासम्भवात् ॥ ६७ ॥

**अनुवाद**—ज्ञायमान अर्थात् वह्नि से व्याप्य है धुआँ, ऐसे व्याप्तिविशिष्ट के रूप में प्रतीयमान लिङ्ग अनुमिति का करण नहीं बन सकता । यदि अनुमिति में लिङ्ग को करण माना जाय तो तब अनुपस्थित एवं अतीत लिङ्ग से अनुमिति नहीं हो पाती ।

इस प्रसङ्ग में प्राचीन आचार्य तो 'व्याप्य के रूप में ज्ञायमान अर्थात् प्रतीयमान लिङ्ग अनुमिति का करण होता है' ऐसा कहते हैं; उसका खण्डन करते हैं—**ज्ञायमान आदि से** । ज्ञायमान लिङ्ग अनुमिति का करण नहीं होता । लिङ्ग के अनुमिति के करण न हो पाने में युक्ति बतलाते हैं—**अनागत आदि** । यदि अनुमिति में लिङ्ग करण हो तब अनुपस्थित एवं विनष्ट लिङ्ग से भी अनुमिति नहीं होगी, क्योंकि अनुमिति

का कारणभूत लिङ्ग का उस समय अभाव होता है। वास्तव में तो मानस जो वह्नि-व्याप्यवत्ता का परामर्श है, उससे भी अनुमिति होती है ॥ ६७ ॥

**व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।**

व्याप्यस्येति । व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम् । तच्च पक्षे व्याप्य इति ज्ञानं, पक्षो व्याप्यवानिति ज्ञानं वा । अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात्पक्षे साध्यमित्याकारिका पक्षो व्याप्यवानिति ज्ञानात्पक्षः साध्यवानित्याकारिका । द्विविधादपि परामर्शात्पक्षः साध्यवानित्येवानुमितिरित्यन्ये ।

ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादेवानुमितिदर्शनाद् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं, किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनैव कारणत्वस्यावश्यकत्वात्, तत्र विशिष्टवैशिष्ट्यज्ञानकल्पने गौरवाच्चेति चेन्न । व्याप्यतावच्छेदकाऽज्ञानेऽपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेर्लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् । किञ्च धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः, व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य सत्त्वात् । न च तदानीं गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम् । चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यादिति । यदि तु तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदाऽनन्तकार्यकारणभावः । मन्मते तु समवायसम्बन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसम्बन्धेनानुमितिं जनयतीति नानन्तकार्यकारणभावः । यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानञ्च स्वतन्त्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूमः, आलोकवान् पर्वत इति ज्ञानादप्यनुमित्यापत्तिः स्यात् । इत्थञ्च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयं, फलमुखगौरवस्यादोषत्वात् ॥

आलोकः—परममूले परामर्शं लक्षयति—**व्याप्यस्येति** । **व्याप्यस्य** व्याप्तेराश्रयस्य धूमादेः । **पक्षवृत्तित्वधीः** पक्षे पर्वतादौ वृत्तिर्वर्तनं यस्य तस्य भावस्तत्त्वं तस्य धीर्ज्ञानं पक्षेण सह सम्बन्धज्ञानम् । **परामर्शः** । **उच्यते** कथ्यते । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इति ।

मूले कारिकां विवृणोति—**व्याप्यस्य पक्षवृत्तित्वधीरिति** । **व्याप्यस्येति** । व्याप्तिविशिष्टस्य व्याप्त्या साध्यसाधनयोरव्यभिचरितसम्बन्धेन विशिष्टस्य विशेषणीभूतस्य धूमादेरिति । **पक्षवृत्तित्वधीरिति** । पक्षेण सन्दिग्धसाध्यवता पर्वतादिना । सह ।

वैशिष्ट्यावगाहिज्ञानं सम्बन्धसाधकधीः। अनुमानजनकं साध्यनिरूपितव्याप्तिविशिष्ट-
हेतोरनुमित्युत्पादकं स एव च परामर्शः। व्याप्त्यवच्छिन्ना या विषयता तन्निरूपिता
या पक्षता तदवच्छेदकावच्छिन्नविषयताशालिनिश्चयत्वं परामर्शत्वमिति। तत् तादृशं
वैशिष्ट्यावगाहिज्ञानम्। च हि विशेष्यविशेषणभावव्यत्यासेन द्विविधं भवतीति यत्रैकं
पक्षे पर्वतादौ व्याप्यः वह्निविशिष्टधूमः इति इत्थं पक्षप्रकारकं व्याप्तिविशिष्टविशे-
ष्यकम्। ज्ञानं धीः। वा इति पक्षान्तरे। पक्षः पर्वतादिः व्याप्यवान् वह्निव्याप्यधूमवान्
इति इत्थं व्याप्तिविशिष्टप्रकारकं पक्षविशेष्यकं ज्ञानं धीः इति। अनुमितिः उभयविध-
परामर्शजन्यानुमा। तु हि। पक्षे व्याप्य पर्वतादौ वह्निविशिष्टधूमः इति इत्थं ज्ञानात्
पक्षप्रकारकव्याप्तिविशिष्टविशेष्यकज्ञानात्। पक्षे पर्वतादौ। साध्यं वह्निः। इति इत्थम्
आकारिका पक्षे साध्यमिति स्वरूपा। पक्षः पर्वतः व्याप्यवान् धूमवान् इति ज्ञानं
व्याप्तिविशिष्टप्रकारकपक्षविशेष्यकज्ञानात्। पक्षः पर्वतादिः। साध्यवान् वह्निमान्।
इत्याकारिका पक्षः साध्यवान् इतिस्वरूपा भवति। अन्ये अपरे। द्विविधात् पक्षप्रका-
रकव्याप्तिविशिष्टविशेष्यात्मकाद् व्याप्तिविशिष्टप्रकारकपक्षविशेष्यात्मकाद् अपि।
परामर्शात् ज्ञानविशेषात्। पक्षः साध्यवान् पक्षः पर्वतादिः साध्यवान् साध्यभूतवह्नि-
युक्तः। इति इत्थम्। एव हि न तु पक्षे साध्यमित्यपि। अनुमितिरनुमा भवतीति वद-
न्तीति शेषः।

**अयम्भावः**—व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। ज्ञानञ्च तत् पक्षे व्याप्यः
पक्षो व्याप्यवानित्येवंरूपं वा। अनुमितिस्तु ततः पक्षे व्याप्य इति ज्ञानात् पक्षे साध्य-
मिति पक्षप्रकारकव्याप्तिविशिष्टविशेष्यिका पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्य-
वानिति व्याप्तिविशिष्टप्रकारकपक्षविशेष्यात्मिका भवति। केषाञ्चिन्मते तु उभय-
विधादेव परामर्शात् पक्षः साध्यवानित्यनुमितिर्भवतीति। नव्यमते तु पक्षविशेष्यक-
व्याप्यविशेष्यकोभयविधपरामर्शादपि पर्वतो धूमादिमानित्येवानुमितिर्भवति। वस्तुतस्तु
पक्षविशेष्यकपरामर्श एव हेतुरतो वह्निव्याप्यधूमवानयमित्याकारकः पक्षविशेष्यक
एवोपनयः साधुरिति शिष्टाः।

विषयेऽस्मिन् मीमांसकमतमुद्धृत्य दूषयति—**नन्विति**। ननु इति प्रश्ने। **वह्नि-
व्याप्यधूमवान्** वह्निना व्याप्यो यो धूमस्तद्वान् पर्वतः। **इति** इत्थम्प्रकारकम्। **ज्ञानं**
साध्यप्रकारकपक्षविशेष्यकानुमितिम्। विना अपि। **यत्र** पर्वतो धूमवान् इति **प्रत्यक्षं**
प्रत्यक्षतो ज्ञानं ततस्तस्माज्ज्ञानात् धूमः वह्निव्याप्यः। **इति** इत्थम्। स्मरणम्। तत्र।
**ज्ञानद्वयात्** प्रत्यक्षस्मृतिभ्याम्। एव। **अनुमितिदर्शनात्** पर्वतो वह्निमानित्याकारानु-
मितिप्रथनात्, **व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं** व्याप्तिः साध्यसाधनयोः साहचर्य-
नियमो यत्र यत्र धूमस्तत्र तत्र वह्निरिति तद्विशिष्टो धूमस्तस्य वैशिष्ट्यं वह्नि-
व्याप्यधूम इत्याकारकं तस्यावगाहि वह्निव्याप्यधूमवान् पर्वत इत्याकारकं ज्ञानम्। **न**
**एव। सर्वत्र कारणम्** अनुमितिहेतुः। किन्तु **व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञान-
त्वेन** व्याप्यतावच्छेदकं वह्निव्याप्यो धूम इति स्मरणात्मकज्ञाने व्याप्यो धूमो
व्याप्यता धूमनिष्ठा व्याप्यतावच्छेदकं यद् धूमत्वं तत्प्रकारकं यत् पर्वतो धूमवा-

नित्याकारकं पक्षधर्मताज्ञानं धूमविशिष्टपर्वतज्ञानं पर्वतवृत्तिधूमज्ञानं वा तथाविधज्ञानत्वेन । एव । **कारणत्वस्य** ज्ञानद्वयनिष्ठकारणतायाः । **आवश्यकत्वात्** नियतपूर्ववृत्तिताकत्वात् **तत्र** ज्ञानद्वयस्यानुमितेश्च मध्ये । **विशिष्टवैशिष्ट्यज्ञानकल्पने** व्याप्तिविशिष्टधूमवैशिष्ट्यावगाहिपरामर्शात्मकज्ञानस्य कल्पने स्वीकारे। **गौरवात्** ज्ञानद्वयस्य प्रथममुपस्थितेर्विशिष्टपरामर्शस्य पश्चाद्भावित्वात्तत्कल्पने गौरवात् । **च** इति ।

**अयम्भावः**—मीमांसकाः कथयन्ति यद्धि क्वचित्पर्वते पर्वतो धूमवानित्याकारके प्रत्यक्षे जाते धूमो वह्निनिरूपितव्याप्त्याश्रय इति स्मृतेश्चोभाभ्यां प्रत्यक्षस्मृतिभ्यामनुमितिरूपकार्याव्यवहितपूर्वक्षणे विद्यमानाभ्यां कारणाभ्यामनुमितिरुत्पद्यते । क्वचित्कुत्रचिद् वह्निव्याप्यधूमवान् पर्वत इति परामर्शज्ञानस्य अनुमितेः कारणत्वेऽपि न सर्वत्र कारणं भवति, तदुत्पत्तिं प्रति तु धूमत्व( व्याप्यतावच्छेदक )प्रकारकधूमवत्पर्वत( पक्षधर्मता )ज्ञानमेव कारणं सर्वसम्मतं तेनैव कार्यसिद्धेः व्याप्तिविशिष्टधूमवैशिष्ट्यावगाहिपरामर्शात्मकज्ञानस्वीकारे गौरवमेवेति ।

तद्दूषयति—**इति चेदित्यादिना । इति** इत्थं कथ्यते चेत् । **तन्न** नैवोपयुक्तम् । तत्र हेतुमाह —**व्याप्यतेति । व्याप्यतावच्छेदकाज्ञाने** अयमालोको वा धूमो वेति सन्देहदशायां व्याप्यताया अवच्छेदकस्य धूमत्वादेरज्ञानेऽनिर्णये अपि । **वह्निव्याप्यवान्** वह्न्यभाववदवृत्तिमान् । **इति । ज्ञानात् । अनुमित्युत्पत्तेः** पर्वतो वह्निमानित्यनुमितिसम्भवात् । **लाघवाद्** व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादिति । **व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन** व्याप्तिप्रकारकं व्याप्तिः साध्यसाधनयोरव्यभिचरितसाहचर्यनियमस्तत्प्रकारकं तद्विशेषणभूतं यत्पक्षधर्मतायाः व्याप्यभूतधूमादेः पर्वतादिवृत्तित्वस्य ज्ञानं तत्त्वेन । **हेतुत्वं** कारणत्वमिति ।

**अयम्भावः**—पर्वते अयमालोको धूमो वेति सन्देहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेऽपि सन्देहादपि वह्न्यभाववदवृत्तिमानिति अनुमितिरुत्पद्यते न तु धूमसमानाधिकरणेत्यादिरूपव्याप्तिविशिष्टवानिति, तथा च तत्र व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य व्यभिचारान्न तेन रूपेण हेतुत्वम् । यद्युच्यते यत्तादृशस्थलेऽनुमितिरूपं कार्यं दृष्ट्वा तादृशं हेतुभूतं व्याप्यतावच्छेदकप्रकारकं ज्ञानं कल्प्यते कारणं विना कार्यानुत्पत्तेरिति चेन्न; व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारत्वस्य लघुत्वादिति । एतदुक्तं भवति—व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वेन व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन च एतदुभयरूपेण कारणत्वापेक्षया व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन रूपेण कारणतायामवच्छेदकधर्मोपस्थितिकृतं लाघवं भवतीति । न च वह्निव्याप्यो धूम इति व्याप्यतावच्छेदकप्रकारकं व्याप्तिज्ञानं स्मृतिरूपं पर्वतो धूमवानित्याकारकव्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं प्रत्यक्षरूपमित्येतद्द्वयं परामर्शं प्रति तु कारणमस्त्येव । परामर्शजनकत्वेन ज्ञानद्वयस्यैवानुमितिं प्रति हेतुत्वं वाच्यमेवेति कथमुच्यते व्याप्यतावच्छेदकप्रकारकत्वे गौरवमिति वाच्यमन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्यान्यं प्रति पूर्ववृत्तित्वं तत्तृतीयमन्यथासिद्धं यथा घटं प्रति आकाशस्येत्युक्तत्वादुक्त-

ज्ञानद्वयस्य परामर्शं प्रति कारणत्वं गृहीत्वैवानुमितिं प्रति कारणत्वं ग्राह्यमिति तदन्यथासिद्धमेवेति अन्यत्र विस्तरः।

स्यादप्यवच्छेदकलाघवं किन्तु धूमप्रत्यक्षव्याप्तिस्मरणपरामर्शेति ज्ञानत्रयस्य कारणताकल्पनायां कारणद्वयकल्पनापेक्षया कथं लाघवमित्याशङ्कापरिहारायाह—**किञ्चेति**। किञ्चेति आरम्भे प्रसङ्गान्तरस्य। 'धूमवान् पर्वतः' **इति** इत्थम्। **ज्ञानाद्** व्याप्यतावच्छेदकानवगाहिज्ञानात् कालान्तरीयदेशान्तरीययादृशतादृशधूमज्ञानादपीति **अनुमित्यापत्तिः** अनुमितिरापद्येत। तत्रापि। **व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य** व्याप्यो धूमो व्याप्यता धूमनिष्ठा तस्या अवच्छेदकीभूतं यद्धूमत्वं तत्प्रकारकं यत्पक्षधर्मतायाः ज्ञानं तस्य। **सत्त्वाद्** भावात्। तद्यामते विप्रतिपत्तिमाह—**नेत्यादिना**। **न** नैव। **च** हि। **तदानीं गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य** तदानीमनुमित्यव्यवहितप्राक्काले गृह्यमाणं प्रत्यक्षज्ञानविषयीभूतं यद् व्याप्यतावच्छेदकं धूमत्वादि तत्प्रकारकं तद्विशेषणं यत्पक्षधर्मतायाः व्याप्यस्य पक्षवृत्तित्वस्य ज्ञानं धीस्तस्य। अनुमितिं प्रति। **हेतुत्वं** कारणत्वम्। **इति** इत्थम्। **वाच्यं** कथनीयम्। तथा सति। **चैत्रस्य**। **व्याप्तिग्रहे** व्याप्तिज्ञाने। **मैत्रस्य**। **पक्षधर्मताज्ञानात** व्याप्यस्य पर्वतादिवृत्तित्वज्ञानाद्। **अनुमितिः**। स्यादिति। **अयमाशयः**—यदि हि परमलाघवलोभेन परामर्शस्यानुमितेः कारणताया अस्वीकारे पर्वतो धूमवानित्येतावत एव व्याप्यनवगाहिज्ञानादपि पर्वतो वह्निमानित्यनुमितिः स्यात् तत्रापि व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानभावात्। अनुमितिज्ञानाव्यवहितपूर्वकाले व्याप्यतावच्छेदकतया ज्ञातं यद्व्याप्यतावच्छेदकं तत्प्रकारकपक्षधर्मताज्ञानस्यैवास्तु हेतुता तथा च कालान्तरीयतादृशज्ञानमादाय न दोषः इति न वाच्यं, यतो हि यद्येवं तदा एकस्य व्याप्तिज्ञाने सति तत्पार्श्ववर्तिनोऽपरस्यापि पर्वतो धूमवानित्याकारकव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानबलात् पर्वतो वह्निमानित्याकारानुमितिरापद्येतेति। **यदि च** यस्य व्याप्तिज्ञानं तस्यैव तदानीं गृह्यमाणव्याप्यतावच्छेदकप्रकारकं तदीयपक्षधर्मताज्ञानं तदीयानुमितौ हेतुरित्युच्यते तदा। **तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं** तत्पुरुषीयगृह्यमाणा तत्पुरुषसमवेतज्ञानविषयीभूता या व्याप्यता तस्या अवच्छेदकप्रकारं यत् तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषनिष्ठपक्षधर्मताधीः। **तत्पुरुषीयानुमितौ** तत्पुरुषसमवेतायां पर्वतो वह्निमान् इत्याद्यनुमायाम्। **हेतुः** कारणम्। **इति** इत्थम्। **उच्यते** कथ्यते। **तदा** तद्यामते। **अनन्तकार्यकारणभावः** असङ्ख्येयहेतुहेतुमद्भावः। **मन्मते** मम नैयायिकस्य मते। **तु**। समवायसम्बन्धेन संयोगभिन्नसाक्षात्सम्बन्धेन **व्याप्तिप्रकारकपक्षधर्मताज्ञानं** व्याप्तिविशेषण-व्याप्यपक्षवृत्तित्वज्ञानं परामर्श इति वह्निव्याप्यधूमवानयमिति **समवायसम्बन्धेन** साक्षात्सम्बन्धेन। **अनुमितिं** पर्वतो वह्निमानित्यनुमाम्। **जनयति** उत्पादयति। **इति** हेतोः। **न** नैव। **अनन्तकार्यकारणभावः** इति।

**अयम्भावः**—यत्र आत्मनि समवायसम्बन्धावच्छिन्नं वह्निव्याप्यधूमवानयमिति व्याप्तिविशिष्टपक्षधर्मताज्ञानं जातं तत्रैव समवायसम्बन्धावच्छिन्नानुमितिं प्रति हेतुरिति न कार्यकारणभावाऽऽनन्त्यमिति।

पुनर्मीमांसकमतमुद्धृत्य दूषयति—**यद्येत्यादिना**। **यदि** । **तु** पुनः । **व्याप्तिप्रकारकं** धूमो वह्निव्याप्य इत्याकारकम् । **ज्ञानं** धीः । **पक्षधर्मताज्ञानं** धूमवान् पर्वत इत्याकारकं ज्ञानम् । **च** । तदेतदुभयम् । **स्वतन्त्रं** पृथक्पृथगेव । **कारणमनुमितिं** प्रति हेतुः । **इति** इत्थम् । **उच्यते** कथ्यते । **तदा** तद्दशायाम् । **कार्यकारणभावद्वयम्** अनिवार्यं स्यात् । यतः । 'वह्निव्याप्यो धूमः' आलोकवांश्च पर्वतः । इति ज्ञानात् । अपि । **अनुमितिः** वह्निमान् पर्वतः इति ज्ञानम् । स्यादिति । यतो हि उक्तरीत्या व्याप्तिप्रकारकं ज्ञानं तथा पक्षधर्मताज्ञानं कारणरूपेण विद्यमानं भवति । ननु भवन्मतेऽपि व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तत्त्वेन पक्षधर्मताविषयकं यद् व्याप्तिप्रकारकं ज्ञानं तत्त्वेनेत्येवं विशेष्यविशेषणभावव्यत्यासेन विशिष्टज्ञानस्य कारणत्वे कार्यकारणभावद्वयं विनिगमनाविरहेण तव मतेऽपि स्यादेवेति चेत्सत्यम् । एवं कार्यकारणभावस्तु स्वीकर्तव्य एव किन्तु न भवति ततोऽपि अनुमितिर्विशिष्टज्ञानं विना अनुमितिं प्रति हेतुता तु व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षनिष्ठविशेषताशालिज्ञानस्यैव । तेन 'वह्निव्याप्यो धूमः' 'आलोकवान् पर्वतः' इत्याकारकज्ञानद्वयात् अथवा 'धूमो वह्निव्याप्यः' 'धूमवान् पर्वतः' इत्याकारकज्ञानद्वयात् अनुमित्युत्पत्तिर्न भवति, एतत्स्थलद्वयेऽपि व्याप्तिप्रकारतानिरूपितधूमनिष्ठविशेष्यतायाः पर्वतनिष्ठविशेष्यतानिरूपितप्रकारतात्वाभावादिति । तेन । **इत्थम्** उक्तरीत्या । **च** हि । **यत्र** । **ज्ञानद्वयं** प्रत्यक्षस्मृतिरूपज्ञानद्वयम् । तत्रापि । **विशिष्टज्ञानं**. परामर्शात्मकविशिष्टज्ञानम् । **कल्पनीयं** स्वीकरणमेव । **फलमुखगौरवस्य** फलं कार्यकारणभावग्रहस्तन्मुखं तत्परं गौरवं तस्य । **अदोषत्वाद्** दोषहीनत्वात् । ज्ञानत्रयकल्पनायां गौरवं तु आपतत्येव, किन्तु फलसाधनगौरवं तु स्वीकर्तव्यमेवेति । विशिष्टज्ञानत्वेन कारणतानिश्चये सति कार्यलिङ्गेन तत्तदनुमित्यव्यवहितपूर्ववर्तिपरामर्शनिश्चय इत्याशयः ।

**अनुवाद**—व्याप्य अर्थात् व्याप्ति से विशिष्ट जो धूम आदि हेतु है, उसका पक्ष अर्थात् सन्दिग्ध साध्य वाला विषय पर्वत आदि में वृत्तित्व अर्थात् रहने का ज्ञान परामर्श कहलाता है ।

**व्याप्यस्येति** । व्याप्तिविशिष्ट का पक्ष के साथ वैशिष्ट्य से युक्त ज्ञान अनुमान का जनक होता है । वैसा ज्ञान पक्ष अर्थात् पर्वत आदि में व्याप्य अर्थात् धूम आदि ऐसा अथवा पक्ष व्याप्य से युक्त है, ऐसा भी होता है । अनुमिति तो 'पक्ष में व्याप्य' ऐसे ज्ञान से पक्ष में साध्य अर्थात् वह्नि आदि ऐसी और पक्ष व्याप्य से युक्त है, ऐसे ज्ञान से 'पक्ष साध्य से युक्त है' इस प्रकार की होती है । कुछ लोग ( नवीन ) तो यह मानते हैं कि दोनों ही प्रकार के परामर्श से पक्ष साध्य से युक्त है, ऐसी ही अनुमिति होती है ।

जो कि कुछ लोग ( विशेषकर मीमांसक ) यह कहते हैं कि 'वह्नि से व्याप्य धूम वाला पर्वत है' ऐसे ( परामर्श ) ज्ञान के बिना भी जहाँ पर्वत धूम से युक्त है, ऐसा प्रत्यक्ष ज्ञान होता है, उसके बाद 'धूम वह्नि से व्याप्य है' ऐसा स्मरण होता है, वहाँ उन दोनों ( प्रत्यक्ष एवं स्मरण ) ज्ञानों से ही ( पर्वत वह्नि वाला है, ऐसी )

अनुमिति हो जाने से व्याप्ति से विशिष्ट जो वैशिष्ट्य है, उसके अवगाही अर्थात् 'पर्वत वह्नि से व्याप्य धूम वाला है' ऐसा ज्ञान ( परामर्श ) सभी जगह अनुमिति का कारण नहीं होता, किन्तु जो व्याप्यता का अवच्छेदक प्रकार का पक्षधर्मता ( व्याप्य का पक्षवृत्तित्व ) का ज्ञान है, उसके रूप में ही कारणत्व आवश्यक होता है। उनमें विशिष्ट-वैशिष्ट्य ज्ञान की कल्पना करना गौरव भी पड़ता है। यह ठीक नहीं है, व्याप्यता के अवच्छेदक ज्ञान के न होने पर भी ( यह आलोक है या धूम है, ऐसे सन्देह में ) यह वह्नि से व्याप्य वाला है, ऐसे ज्ञान ( परामर्श ) से अनुमिति के हो जाने से और लाघव होने के कारण भी व्याप्तिप्रकारक पक्षधर्मता के ज्ञान के रूप से ही कारणत्व मानना उचित है।

और यह भी कि 'पर्वत धूम से युक्त है' ऐसे ज्ञान से भी अनुमिति होने लगेगी, क्योंकि उसमें भी व्याप्यता का अवच्छेदक बना धूमत्वप्रकारक पक्षधर्मता का ज्ञान रहता है। न तो उसी समय लिया जाने वाला व्याप्यता का अवच्छेदकप्रकारक जो पक्षधर्मता का ज्ञान है, उसी का ही हेतुत्व मानना ठीक है। वैसा मानने पर चैत्र के व्याप्ति ज्ञान में मैत्र के पक्षधर्मताज्ञान से अनुमिति होने लगेगी।

यदि उस पुरुष से समवेत व्याप्यतावच्छेदकप्रकारक उस पुरुष का पक्षधर्मता का ज्ञान उसी पुरुष की अनुमिति में हेतु होता है, ऐसा कहा जाय तो उस अवस्था में अनन्त कार्य-कारणभाव मानने होंगे। हमारे मत में तो समवायसम्बन्ध से व्याप्ति-प्रकारक पक्षधर्मता का ज्ञान समवायसम्बन्ध से ही अनुमिति को जनाता है, अतः अनन्त कार्य-कारणभाव नहीं होते।

यदि व्याप्तिप्रकारक ज्ञान एवं पक्षधर्मता ज्ञान भी स्वतन्त्र रूप से अनुमिति के कारण माने जाते हैं तो उस समय दो कार्यकारणभाव मानने होंगे और 'वह्नि से व्याप्य धूम' 'आलोक से युक्त पर्वत' ऐसे अनुमिति होने लगेगी।

इस प्रकार जहाँ दो ज्ञान आवश्यक हैं वहाँ भी विशिष्ट ज्ञान ( परामर्श ) की कल्पना करनी ही होगी, क्योंकि फलाभिमुख गौरव दोषयुक्त नहीं होता।

**व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥ ६८ ॥**

व्याप्यो नाम व्याप्त्याश्रयस्तत्र व्याप्तिः केत्यत आह—व्याप्तिरिति। वह्निमान् धूमादित्यादौ साध्यो वह्निः, साध्यवान् महानसादिस्तदन्यो जल-ह्रदादिस्तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्य-वदन्यस्मिन् तप्तायःपिण्डादौ वह्नेः सत्त्वान्नातिव्याप्तिः। अत्र येन सम्बन्धेन साध्यं तेन सम्बन्धेन साध्यवान् बोध्यः। अन्यथा समवायसम्बन्धेन वह्निमान् वह्नेरवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात्। साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः। तेन यत्कि-ञ्चिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमसत्त्वेऽपि न क्षतिः। येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यम्। तेन साध्यवदन्यस्मिन्

धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः। साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः। तेन धूमवान् वह्ने-रित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि नातिव्याप्तिः। अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चै-क्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नास्ति, तथापि हेतुतावच्छेदकरूपेणा-वृत्तित्वं वाच्यम्। हेतुतावच्छेदकं तादृशवृत्तितानवच्छेदकमिति फलितोऽर्थः ॥

**आलोकः**—परामर्शनिरूपणानन्तरं क्रमप्राप्तां व्याप्तिं निरूपयति परममूले—
**व्याप्तिरिति**। साध्यवदन्यस्मिन् असम्बन्धः व्याप्तिः उदाहृत इति। साध्यवदन्यस्मिन्
साध्यते यदिति साध्यं वह्न्यादिस्तदस्त्यस्मिन्निति साध्यवान् महानसादिस्ततोऽन्यो
ह्रदादिस्तस्मिन्। असम्बन्धः व्याप्यस्य वृत्तित्वाभावः। **व्याप्तिः** इति **उदाहृतः** कथित
इति। साध्यवद्भिन्ननिरूपितवृत्तित्वाभावो व्याप्तिरिति भावः। मूले सङ्गतिनिर्देशन-
पुरस्सरं कारिकां व्याख्याति **व्याप्य** इति। **व्याप्यो नाम** व्याप्य इति परामर्शलक्षणे
व्याप्यस्येति यदुक्तं तत्रत्यः। **व्याप्त्याश्रयः** व्याप्तेः वक्ष्यमाणलक्षणकव्याप्तेराश्रय
आधारः। तत्र तद्घटकत्वे। का नाम व्याप्तिः इति जिज्ञासायाम्। अतः आह व्याप्ति-
ज्ञानघटकीभूता का व्याप्तिरित्यपेक्षायामाहेति। **व्याप्तिरिति**। साध्यवदन्यस्मिन्नित्यत्र
**साध्यवदन्येति 'वह्निमान् धूमात्' इत्यादौ** इत्यादिवाक्ये। **साध्यः** संराध्यः। **वह्निः** अग्निः।
**साध्यवान्** साध्ययुक्तः। **महानसादिः** पाकगृहादिः तदन्यस्तदितरः **जलह्रदादिः** तोय-
पुष्करिण्यादिः। **तदवृत्तित्वं** तस्मिन् साध्यवदन्यस्मिन् अवृत्तित्वं वृत्तित्वाभावः। **धूमस्य**
व्याप्यस्य। इति व्याप्तिरिति। **लक्षणसमन्वयः** लक्षणं केवलव्यतिरेकी हेतुविशेषः साध्य-
वदन्यस्मिन्नसम्बन्धो व्याप्तिरिति तस्य समन्वयः समायोजनमिति। पर्वतो वह्निमान्
धूमादित्यादौ साध्यो वह्निः तत्प्रतियोगिकाभावो वह्न्यभावः तदधिकरणं ह्रदादिः
तन्निरूपितवृत्तित्वं मीनादिः धूमस्य तद्वृत्तित्वाभाव इति लक्षणसमन्वयः इति। **धूम-
वानिति। धूमवान् वह्नेः** इत्यादौ। साध्यो धूमः साध्यवान् महानसादिः **साध्यवदन्यस्मिन्**
साध्ययुक्तेतरस्मिन्। **तप्तायःपिण्डादौ** सुतप्तलोहपिण्डादौ **वह्नेरग्नेः**। सत्त्वाद् भावेन
सम्बन्धात्। **न**। **अतिव्याप्तिः** लक्षणस्यालक्ष्यवृत्तित्वमिति। यथोक्तम्—व्याप्तिर्हि
द्विविधा—अन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च। तत्राद्या हेतुसाध्ययोर्व्याप्तिः हेतुसमानाधि-
करणात्यन्ताभावप्रतियोगिसाध्यसामानाधिकरण्यरूपा। अपरा तु हेत्वभावसाध्याभाव-
योर्व्याप्तिः साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेदित्युक्ता। तत्र व्यतिरेकलक्षणा तु
पश्चान्निर्दिश्यते। अन्वयलक्षणे प्रसङ्गता। तत्रापि अत्यन्ताभावस्य प्रतियोगिता-
वच्छेदकावच्छिन्नाधिकरणतया सह विरोध इति नियमेन साध्याभाववदवृत्तित्वं व्याप्तिः
यः साध्यस्य वह्न्यादेरभाववान् यथा ह्रदादिस्तस्मिन्नवृत्तित्वमित्याशयः। तथैव
अन्योन्याभावस्य प्रतियोगितावच्छेदकेन सह विरोध इति नियमेन साध्यवदन्यावृत्तित्व-
मपि यः साध्यवांस्ततो योऽन्यस्तत्र अवृत्तित्वमिति। विस्तरस्तु ग्रन्थान्तरे। व्याप्तेर्हि
लक्ष्याः सद्धेतव एव। तत्र पक्षसाध्यहेतुदृष्टान्तानां सत्त्वमावश्यकं सव्यापकसाध्य-

कत्वञ्च यथा पर्वतः संयोगेन वह्निमान् संयोगेन धूमान्महानसवदिति पर्वतः पक्षः वह्निः संयोगेन साध्यः धूमः संयोगेन हेतुः महानसो दृष्टान्तः धूमव्यापकवह्निसाध्यकत्वं धूमे ।

तत्र साध्यतावच्छेदकसम्बन्धमाह—**अत्रेति** । **अत्र** व्याप्तिलक्षणेऽन्योन्याभावघटिते । **येन** यादृशेन । **सम्बन्धेन** संयोगादिना । **साध्यं** वह्न्यादि विवक्षितम् । तेन तथाविधेन । **एव** हि । सम्बन्धेन । **साध्यवान्** साध्ययुक्तमहानसादिः । **बोध्यः** कल्प्यः । **अन्यथा** तथाऽस्वीकारे । **समवायसम्बन्धेन** समवेतत्वसम्बन्धेन । **वह्निमान्** अग्नियुक्तः । **वह्नेरग्ने** अवयवः अवयवावयविनोः समवायात् । **तदन्यः** तद्भिन्नः । **महानसादिः** पाकगृहादिः । **तत्र** महानसादौ । **धूमस्य विद्यमानत्वात्** सम्बन्धात् । लक्षणस्य तत्र **अव्याप्तिप्रसङ्गात्** अव्याप्तिर्लक्ष्यैकदेशावृत्तित्वं तत्प्रसङ्गात् । साध्यतावच्छेदकसम्बन्धविवक्षायां तु प्रकृते संयोगः साध्यतावच्छेदकसम्बन्धः स एव साध्यवतोऽपि । न हि संयोगसम्बन्धेन वह्नेरवयवो वह्निमान् । तेन न दोषः । साध्यसाध्यवतोरेकसम्बन्धविवक्षाऽपेक्षिता यतो नाव्याप्तिप्रसङ्गः । अतः साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्प्रतियोगिकभेदाधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिरिति लक्षणं व्याप्तेर्फलति ।

कारिकागतं साध्यवदन्यपरं विवृणोति—**साध्येति** । **साध्यवदन्यः** कारिकागतः साध्यवदन्य इति पदार्थः । **च** तु । **साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान्** यावत्सु साध्यवत्सु स्थितो यः साध्यवत्त्वरूपो धर्मस्तदवच्छिन्ना प्रतियोगिताः यस्य स तादृशो यो भेदस्तद्वान् । **बोध्यः** ग्राह्यः । यस्याभावः सोऽभावप्रतियोगी यथा घटाभावस्य प्रतियोगी घटः प्रतियोगिज्ञानाधीनज्ञानोऽभाव इति अभावलक्षणम्, प्रतियोगिनो भावः प्रतियोगिता सा च प्रतियोगिनि तिष्ठतीति प्रतियोगिवृत्तिर्धर्मः प्रतियोगिताया अवच्छेदकः यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति प्रतियोगिता च तद्धर्मावच्छिन्ना भवति । यथा घटाभावस्य प्रतियोगी घटः प्रतियोगिता घटनिष्ठा प्रतियोगितावच्छेदकं घटवृत्ति घटत्वमिति प्रतियोगिता घटत्वेनावच्छिन्ना । एवञ्च घटत्वावच्छिन्ना प्रतियोगिता यस्य तादृशोऽभावः घटत्वावच्छिन्नप्रतियोगिताको घटाभावः इति । अत्र तु साध्यवान् यो न साध्यवदन्यः तत्प्रतियोगी साध्यवान् प्रतियोगिता साध्यवत्पदार्थे प्रतियोगितावच्छेदकं साध्यवत्त्वं तेनावच्छिन्ना प्रतियोगिता तादृशप्रतियोगिताकश्च स भेदः तद्वान् यस्तन्निरूपितवृत्तित्वाभावोऽपेक्षित इति ग्रन्थान्तरे । **तेन** तद्धेतुना । **यत्किञ्चिद्वह्निमतः** यत्किञ्चिदिति महानसीयादिविशेषणविशिष्टवह्नियुक्तात् । यत्किञ्चित्पदेनाऽत्र पर्वतो महानसादिर्वा वह्नेरधिकरणं संसूच्यते । **महानसादेः** पाकगृहादेः । **भिन्ने** इतरस्मिन् । **पर्वतादौ** । एवमेव पर्वताद्भिन्ने महानसादावपि । **धूमस्य** । **सत्त्वे** भावे । **अपि च** । **न क्षतिः** हानिः ।

**अयम्भावः**—साध्यवदन्यपदेनात्र यावत्साध्यवत्स्थितसाध्यवत्वरूपधर्मावच्छिन्नप्रतियोगिताको यो भेदस्तादृशभेदवान् ग्राह्यः अन्यथा वह्निमान् धूमादित्यत्राव्याप्तिः स्यात् । तच्च यथा—साध्यो वह्निः साध्यवान् पर्वतः पुरोवर्ती तादृशसाध्याधिकरणादन्योऽपरं पर्वतो महानसादिर्वा तन्निरूपितधूमहेतोरवृत्तित्वाभावे नापितु वृत्तित्व-

मेवेति अव्याप्तिः । एतद्विपरीतं साध्यवदन्यपदस्य साध्यवत्त्वधर्मावच्छिन्नप्रतियोगिताकभेदयुक्तार्थग्रहणे तु साध्यवत्त्वधर्मावच्छिन्नानामपरपर्वतादीनां ग्रहणे तन्निरूपितभेदाधिकरणं जलह्रदाद्येव तन्निरूपितवृत्तित्वं मीनादीनां वृत्तित्वाभावो धूमात्मकहेतौ वर्तते इति न क्षतिरिति ग्रन्थान्तरे । व्याप्तिस्वरूपञ्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्तावच्छिन्नप्रतियोगिताकभेदाधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिरिति ।

ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्वावच्छिन्नप्रतियोगिताको भेदः संयोगेन वह्निमान् न इत्याकारकः तद्वान् तदधिकरणं यथा जलह्रदादिः तथा धूमस्यावयवोऽपि का साध्यत्वावच्छिन्नप्रतियोगिताकभेदवति धूमावयवे समवायसम्बन्धेन धूमो वर्तत एव धूमस्य वृत्तितैव न वृत्तित्वाभाव इत्यत आह—**येनेति । येन** यादृशेन । **सम्बन्धेन । हेतुता** कारणता । **तेन** तथाविधेन । **एव** नान्येन । सम्बन्धेन । **साध्यवदन्यावृत्तित्वं** साध्यवद्भिन्नाधिकरणे वृत्तिता । **बोध्या ज्ञेया । तेन** यतो हि हेतुतावच्छेदकसम्बन्धेन साध्यवदन्यवृत्तित्वं तस्मात् । **साध्यवदन्यस्मिन्** साध्यवद्भिन्नाधिकरणे । **धूमावयवे । धूमस्य । समवायसम्बन्धेन** नित्यसम्बन्धेन । **सत्त्वे** भावे । **अपि । न । क्षतिः** हानिरव्याप्तिरिति ।

**अयम्भावः**—साध्यवद्भेदाधिकरणवृत्तितायां हेतुतावच्छेदकसम्बन्धग्रहे तु हेतुर्धूमः हेतुता धूमनिष्ठा हेतुतावच्छेदकसम्बन्धः संयोगः तेनैव धूमहेतोः पर्वतादौ वृत्तित्वात् यथा हेतुतावच्छेदकसंयोगसम्बन्धेन धूमावयवे धूमहेतोरवृत्तित्वं तथा जलह्रदादावपि तस्यावृत्तित्वमेव, किन्तु स्वसाध्यवह्निसमानाधिकरण एव धूमहेतुः पर्वतादाविति न हानिरिति । एवं हेतुतावच्छेदकसम्बन्धेनैव साध्यवदन्यनिरूपितवृत्तिता ग्राह्या । साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवति धूमावयवे समवायसम्बन्धेन धूमस्य वृत्तावपि हेतुतावच्छेदकसंयोगसम्बन्धेन तत्र धूमो नेति हेतुतावच्छेदकसम्बन्धेन वृत्तित्वाभावान्नाव्याप्तिरिति ।

ननु हेतुतावच्छेदकसम्बन्धेन साध्यवदन्यनिरूपितवृत्तित्वेऽक्षतावपि एवमपि 'अयःपिण्डं धूमवद् वह्नेः' इत्यत्रातिव्याप्तिस्तु भवत्येव । यथा हि अत्र साध्यो धूमः साध्यतावच्छेदकेन संयोगेन वह्निमदयःपिण्डं तदन्यो जलह्रदादिः तत्र संयोगेन हेतुतावच्छेदकेन सम्बन्धेन हेतोः वह्नेः साध्यवदन्यजलह्रदवृत्तित्वं नास्त्येवेति चेदत्राह—**साध्यवदिति । साध्यवदन्यावृत्तित्वं** साध्यवतोऽन्यस्मिन् भिन्नेऽधिकरणे अवृत्तित्वं वृत्तिताभावः साध्यवत्प्रतियोगिताकभेदाधिकरणवृत्तित्वाभावः । **च** तु । **साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः** साध्यो वह्निस्तद्वान्पर्वतादिस्ततोऽन्यो जलह्रदादिः साध्यवद्भेदाधिकरणं तत्र यद् वृत्तित्वं तत्त्वेनावच्छिन्ना निरूपिता प्रतियोगिता यस्य तादृशो योऽभावः एवेति वृत्तित्वसामान्याभावनिवेशः कार्यः । वृत्तित्वाभावप्रतियोगितायां वृत्तितात्वावच्छिन्नत्वं वृत्तितात्वेतरधर्मानवच्छिन्नत्वं च विवक्षितम् । **तेन** साध्यवद्भेदाधिकरणत्वावच्छिन्नाधिकरणग्रहणेन । 'धूमवान् वह्नेः' **इत्यत्र** असद्धेतौ । **साध्यवदन्यजलह्रदादिवृत्तित्वाभावे** साध्यवदितरो यो जलह्रदादिस्तत्र वृत्तित्वस्य अभावे । अपि । **न । अतिव्याप्तिः** अतिप्रसङ्गो व्याप्तेरिति ।

**अयम्भावः**—अत्र हेतोः साध्यवद्भेदाधिकरणेऽवृत्तिताऽपि साध्यवद्भेदाधिकरणत्वावच्छिन्नेऽपेक्षिता। यावत्साध्यवद्भेदाधिकरणाग्रहणे धूमवान् वह्नेरित्यत्रातिव्याप्तिः स्यात्तत्रापि साध्यवद्भिन्ने जलह्रदादौ वह्निरूपहेतोरवृत्तित्वादिति। यदि भेदाधिकरणत्वावच्छिन्ननिरूपितवृत्तित्वाभावो विवक्षितस्तदा साध्यवद्भेदाधिकरणं यथा जलह्रदस्तथा तप्तायःपिण्डोऽपीति। भवति च तत्र वह्निरूपहेतोर्वृत्तित्वं नास्ति वृत्तित्वाभाव इति नातिव्याप्तिः।

स्थलान्तरे लक्षणस्याव्याप्तिं प्रदर्श्य परिहरति—**अत्रेति**। **अत्र** प्रसङ्गेऽस्मिन्। **यद्यपि** वस्तुतस्तु। **'द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्'**। घटः। **द्रव्यं** द्रव्यत्ववान्। **गुणकर्मान्यत्वविशिष्टसत्त्वाद्** गुणकर्मभेदविशिष्टसत्तावत्वात्। **इत्यादौ**। द्रव्यस्य **विशिष्टसत्तायाः** गुणकर्मभेदविशिष्टद्रव्यवृत्तिसत्तायाः। **शुद्धसत्तायाः** द्रव्यगुणकर्मसु वर्तमानायाः विशेषणानवच्छिन्नायाः सत्तायाः। च। **ऐक्याद्** भेदाभावाद् विशिष्टं शुद्धान्नातिरिच्यते इति न्यायात्। **साध्यवदन्यस्मिन्** साध्यं द्रव्यत्वं समवायेन साध्यतावच्छेदकेन सम्बन्धेन तद्वद् द्रव्यम्। तदन्यस्मिन् तद्भिन्ने। **गुणादौ** गुणे कर्मणि च। **अवृत्तित्वं** हेतुभूताया विशिष्टसत्तायाः वृत्तित्वाभावः। नाऽस्ति तत्र शुद्धसत्ता तिष्ठति चेत्तद्भिन्ना विशिष्टसत्ताऽपि तिष्ठत्येवेति हेतौ साध्यवदन्यनिरूपितवृत्तित्वमेव न तु वृत्तित्वाभाव इति तत्र लक्षणस्याव्याप्तिः। **तथापि** तथास्थितावपि। **हेतुतावच्छेदकरूपेण** समवायेन साध्यवद्भिन्नो गुणस्तन्निरूपिता वृत्तिता गुणत्वे वृत्तिताया अवच्छेदकं गुणवत्त्वं तस्या अनवच्छेदकत्वं विशिष्टसत्तात्वं तदेव हेतुतावच्छेदकं तद्रूपेण विशिष्टसत्तात्ववत्त्वेन। **अवृत्तित्वं** समवायेन वृत्तित्वाभाववत्त्वम्। **वाच्यं** साध्यवदन्यनिरूपितवृत्तितानवच्छेदकहेतुतावच्छेदकवत्त्वमिति वक्तव्यमिति। **हेतुतावच्छेदकं** विशिष्टसत्तात्वम्। **तादृशवृत्तितानवच्छेदकं** तादृशी या वृत्तिता आधेयता तदवच्छेदकं गुणत्वत्वादिरूपो धर्मः अनवच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तारूपो धर्म इति। **इति**। **फलितः** निष्पन्नः। **अर्थः** आशयः। तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्वनियमेन विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वान्नाव्याप्तिरिति भाव इति प्रकाशकाराः॥ ६८॥

**अनुवाद**—साध्य ( जो हेतु के द्वारा अनुमेय है, जैसे वह्नि आदि ) से युक्त भिन्न वस्तु में हेतु ( धूम आदि ) का सम्बन्ध न होना व्याप्ति कहा जाता है।

व्याप्ति का आश्रय व्याप्य होता है, उसमें व्याप्ति क्या है ? इस पर कहते हैं—**व्याप्तिरिति**। धूम के होने से वह्निमान् ( आग से युक्त ) है; इत्यादि में साध्य ( हेतु के द्वारा जिसे जाना जाता है ) है, वह्नि साध्य से युक्त है महानस ( पाकगृह ) आदि, उससे भिन्न है तालाब आदि, उसमें धूम का न होना ( अवृत्तित्व ); इस तरह लक्षण का समन्वय हो जाता है। 'धूम से युक्त है, वह्नि के होने से' इत्यादि में साध्य से युक्त है पर्वत महानस आदि, उससे भिन्न गरमाये गये लोहे के पिण्ड आदि में वह्नि के रहने से उसमें लक्षण की अतिव्याप्ति ( लक्ष्य से बाहर जाना ) नहीं है।

**अत्रेति** । जिस सम्बन्ध से साध्य ( हेतु के साथ ) है, उसी सम्बन्ध से साध्यवान् ( साध्य के साथ ) को जानना चाहिए । वैसा न होने पर समवायसम्बन्ध से वह्नि-मान् है वह्नि का अवयव, उससे भिन्न है महानस आदि, उसमें धूम के विद्यमान होने से उसमें अव्याप्ति का प्रसङ्ग हो जाता है । ( किन्तु साध्य एवं हेतु का सम्बन्ध संयोग सम्बन्ध से होने के कारण साध्यवान् को भी संयोगसम्बन्ध से ही लेना चाहिए । वह्नि का अवयव वह्नि के साथ संयोगसम्बन्ध से न होकर समवायसम्बन्ध से है, इसके विपरीत महानस आदि संयोगसम्बन्ध से है, जिससे भिन्न जलह्रद आदि है; जिसमें धूम की विद्यमानता नहीं है, अतः अव्याप्ति नहीं है ।

**साध्यवदन्य** इति । साध्य युक्त से भिन्न जो है, वह भी साध्यवत्त्वरूप धर्म से अवच्छिन्न प्रतियोगिता वाले भेद से युक्त जानना चाहिए । इस कारण जो कुछ महानसीय आदि वह्नि से युक्त महानस आदि से भिन्न पर्वत आदि में धूम के रहने पर भी कोई हानि नहीं है ( पर्वत वैसा भेद वाला नहीं है, अतः अव्याप्ति नहीं है ) ।

**येनेति** । जिस सम्बन्ध से हेतुता है, उसी सम्बन्ध से 'साध्यवान् से भिन्न में वृत्तित्व का अभाव' जानना चाहिए । क्योंकि हेतुता संयोगसम्बन्ध से है, अतः साध्य-वान् महानस आदि से भिन्न धूमावयव में धूम के समवायसम्बन्ध से रहने पर भी कोई क्षति नहीं है ।

**साध्यवदिति** । साध्यवान् से भिन्न में वृत्ति का न होना ( अवृत्तित्व ) भी साध्यवान् से भिन्न वृत्तित्व धर्म से अवच्छिन्न प्रतियोगिता वाला अभाव अर्थात् वृत्तित्वसामान्य का अभाव है । अतः 'वह्नि होने से धूमवान् है' इसमें साध्यवान् से भिन्न तालाब आदि में वृत्तित्व का अभाव रहने पर भी अतिव्याप्ति नहीं है ।

**अत्रेति** । इस प्रसङ्ग में यद्यपि ( घट ) द्रव्यवान् है, गुण एवं कर्म से भिन्न रूप में विशिष्ट सत्ता से युक्त होने से; इत्यादि में द्रव्य मात्र में रहने वाली विशिष्ट सत्ता तथा द्रव्य, गुण एवं कर्म में रहने वाली शुद्ध सत्ता में भेद न होने से साध्य द्रव्यत्व का साध्यवान् द्रव्य से भिन्न गुण आदि में विशिष्ट सत्ता के वृत्तित्व का अभाव नहीं है, फिर भी उसमें हेतुता के अवच्छेदक के रूप से अवृत्तित्व मानना चाहिए । हेतुता का जो अवच्छेदक है, वह वृत्तिता का अनवच्छेदक है, यह फलित अर्थ है ॥ ६८ ॥

## अथवा हेतुमन्निष्ठविरहाऽप्रतियोगिना ।
## साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥

ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः । किञ्च 'सत्तावान् जातेः' इत्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदक-सम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिश्चात आह—अथवेति । हेतुमति निष्ठा वृत्तिर्यस्य स तथा विरहोऽभावः । तथा च हेत्वधिकरणवृत्तिर्योऽभाव-स्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते । अत्र

यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यतिव्याप्तिः, न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यं; तत्तद्वह्न्यादेरप्युभयाभावसत्त्वादेकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेः। गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च, तथापि प्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम्।

आलोकः—एवं हि अत्यन्ताभावस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणतया सह विरोध इति नियमेन साध्याभाववदवृत्तित्वं व्याप्तिरिति अन्योन्याभावस्य प्रतियोगितावच्छेदकेन सह विरोध इति नियमेन साध्यवदन्यावृत्तित्वं व्याप्तिरिति व्याप्तेरन्वयव्यतिरेकि-केवलव्यतिरेकिलिङ्गानुकूलं लक्षणद्वयमुक्त्वा तस्य केवलान्वयिनि अघटनीयत्वात्तत्रातथास्वारस्येन व्याप्तेः केवलान्वयिलिङ्गघटनीयं लक्षणान्तरं प्रस्तौति परममूले—अथवेति। अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोः ऐकाधिकरण्यं व्याप्तिः उच्यते इति। अथवा इति पक्षान्तरे। हेतुमन्निष्ठविरहाप्रतियोगिना हेतुमति साधनाधिकरणे पक्षे निष्ठा स्थितिर्यस्य स तादृशो यो विरहोऽत्यन्ताभावस्तस्य अप्रतियोगी अविरोधी तेन तथाभूतेन। साध्येन वह्न्यादिना सहेति। हेतोः धूमादेः। ऐकाधिकरण्यं सामानाधिकरण्यम्। व्याप्तिः। इति। उच्यते इति। सिद्धान्तरूपेणेति शेष इति ग्रन्थान्तरे।

मूले कारिकावतारणाय भूमिकामारचयति—नन्वित्यादिना। ननु। केवलान्वयिनि अन्वयमात्रव्याप्तिके पक्षव्यापकः सपक्षस्पर्शी विपक्षशून्योऽबाधितविषयोऽसत्प्रतिपक्ष इति लक्षिते। ज्ञेयत्वादौ इदं वाच्यं वाच्यत्ववत् ज्ञेयत्वात् इत्यादौ। साध्ये साध्यभूते। साध्यवदन्यस्य साध्यवद्भिन्नस्य। अप्रसिद्धत्वात् अख्यातत्वात्। अव्याप्तिः। अस्यायमाशयः—पूर्वोक्तलक्षणं हि इदं वाच्यं ज्ञेयत्वादित्यादि सद्धेतावप्यव्यापकं तथाहि साध्यं वाच्यत्वं सप्तपदार्थवृत्तिः साध्यवन्तः सप्त पदार्थाः साध्यवदन्यस्तु नैव कश्चित्प्रसिद्ध इति लक्षणसमन्वयाभाव एव। किन्तु केवलान्वयिज्ञानकाले पक्षताघटकसंशयाभावान्नैवास्वनुमिति तच्छून्यकाले तु भ्रमात्मकव्याप्तिज्ञानादनुमितिर्भवत्येवेति तत्रापि अस्वरसमनुसन्धायाह—किञ्चेति। सत्तावान् जातेः इत्यादौ सत्तासाधकस्थले सद्धेतौ साध्यं सत्ता समवायेन साध्यतावच्छेदकेन सत्तावन्तो द्रव्यगुणकर्मपदार्थाः तदन्यत्सामान्यादिपदार्थ इति साध्यवदन्यस्मिन् द्रव्यगुणकर्मपदार्थभिन्ने। सामान्यादौ सामान्यादिपदार्थे। हेतुतावच्छेदकसम्बन्धेन हेतुर्जातिस्तत्ता जातिता तदवच्छेदकसम्बन्धेन। समवायेन। वृत्तेः वर्तनस्य। अप्रसिद्धत्वात्। अव्याप्तिः। अयमत्राशयः—'सत्तावान् जातेः' इत्यत्र साध्यं सत्तासमवायेन साध्यतावच्छेदकेन सत्तावन्तः द्रव्यगुणकर्मपदार्थाः तदन्यत्सामान्यविशेषसमवायादिपदार्थाः तन्निरूपिता हेतुभूतजातितावच्छेदकसमवायसम्बन्धावच्छिन्ना वृत्तिता हि अप्रसिद्धैव सामान्यादिषु समवायसम्बन्धेन किमपि न तिष्ठतीति। तेन तत्र साध्यवदन्यनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वस्याप्रसिद्ध्या तत्र लक्षणागमनेनोक्तलक्षणस्याव्याप्तिरिति। चकारः उभयसङ्ग्रहार्थकः। अतः इति हेतोरुक्तस्थले लक्षणाव्याप्त्येति। आह कथयति। अथवेति। कारिकां विवृणोति—हेतुमतीति। हेतुमति

हेत्वधिकरणे निष्ठेति वृत्तिर्वर्तनं यस्याऽस्ति सः तथा तादृशो विरह इति अभावः । **तथा च** एवमेव । **हेत्वधिकरणवृत्तिः** । **यः** । **अभावः** । **तदप्रतियोगिना** तदविरोधिना । **साध्येन** सत्तादिना । **सह** । **हेतोः** जात्यादेः **सामानाधिकरण्यम्** एकाधिकरणवृत्तित्वम् । **व्याप्तिः** व्याप्तिरिति । **उच्यते** इति । यथा हि पर्वतो वह्निमान् धूमादित्यत्र हेतुर्धूमः तद्वान् पर्वतः तन्निष्ठविरहो घटाभावस्तदप्रतियोगी साध्यो वह्निः तेन सह हेतोर्धूमस्य सामानाधिकरण्यं पर्वताद्यवच्छेदेन । 'सत्तावान् जातेः' इत्यत्र हेतुर्जातिः हेतुमद् द्रव्यादिः तन्निष्ठविरहः घटाभावः तदप्रतियोगिनी सत्ता साध्यः तया सह हेतोर्जातेः सामानाधिकरण्यं द्रव्याद्यवच्छेदेनेति लक्षणसमन्वयः ।

**अनुवाद**—अथवा हेतु के अधिकरण में रहने वाले अभाव के अप्रतियोगी ( अविरोधी ) साध्य के साथ हेतु का एक ही अधिकरण में रहना व्याप्ति है ॥ ६९ ॥

कारिका की व्याख्या हेतु उसकी भूमिका बतलाते हैं—**नन्विति** । व्याप्ति का उक्त लक्षण अन्वयव्यतिरेकी एवं अन्वयव्यतिरेकी लिङ्ग में तो सही है, लेकिन केवलान्वयी ज्ञेयत्व आदि ( 'इदं वाच्यं वाच्यत्ववत् ज्ञेयत्वात्' ) साध्य में साध्यवदन्य की प्रसिद्धि न होने से अव्याप्ति है । जैसे कि वाच्यत्व साध्य है, वाच्य साध्यवान् पदार्थ है, किन्तु साध्यवदन्य कुछ भी नहीं है । ( यह केवलान्वयी के ज्ञान के अवसर पर पक्षता-घटक के संशय के अभाव में होता है, लेकिन उस ज्ञान के शून्य काल में भ्रमात्मक व्याप्ति ज्ञान से अनुमिति हो जाती है, अतः दूसरे अव्याप्ति स्थल का सङ्केत करते हैं ) यह भी कि 'सत्तावान् जातेः' ( जाति होने से सत्ता से युक्त है ) इत्यादि में; जहाँ सत्ता साध्य है, साध्यतावच्छेदक समवायसम्बन्ध से सत्तावान् हैं, द्रव्य, गुण एवं कर्म आदि पदार्थ उनसे भिन्न हैं, सामान्य आदि पदार्थ साध्यवान् से भिन्न सामान्य आदि में हेतुता के अवच्छेदक समवायसम्बन्ध से वृत्ति के प्रसिद्ध न होने से ( क्योंकि सामान्य आदि में समवायसम्बन्ध से कुछ भी नहीं रहता ) अव्याप्ति है, अतः कहते हैं । व्याप्ति का दूसरा भी लक्षण करते हैं—**अथवेति** । कारिका की व्याख्या करते हैं—**हेतुमतीति** । हेतु के अधिकरण में निष्ठा अर्थात् वृत्ति है जिसका, वैसा जो विरह अर्थात् अभाव है, इस प्रकार हेतु के अधिकरण में रहने वाला जो अभाव है, उसके अप्रतियोगी ( अविरोधी ) साध्य के साथ हेतु का समानाधिकरण ( एक ही अधिकरण वाला होना ) व्याप्ति है । जैसे कि—'पर्वतो धूमवान् वह्निमत्वात्' में धूम है हेतु, उसका अधिकरण है पर्वत, तन्निष्ठ अभाव है घटाभाव, उसका प्रतियोगी है घट, अप्रतियोगी है वह्नि, उस साध्यरूप वह्नि के साथ धूमरूप हेतु का सामानाधिकरण्य हैं, अतः व्याप्ति है । ( यहाँ यह ध्यान देना आवश्यक है कि पर्वतवृत्त्यभाव वह्न्यभाव हो नहीं सकता, क्योंकि वहाँ वह विद्यमान है और अत्यन्ताभाव का प्रतियोगी के साथ विरोध रहता है । इस कारण इस प्रकार के अभाव का प्रतियोगी वह्नि नहीं होता, अतः कोई अन्य अभाव; जैसे घटाभाव, पटाभाव आदि को लेना चाहिए । ) इसी तरह 'सत्तावान् जातेः' में जाति हेतु है, उसका अधिकरण है द्रव्य, तन्निष्ठाभाव है घटाभाव, उसका प्रतियोगी

है घट और अप्रतियोगी साध्य सत्ता है। उसके साथ जाति का सामानाधिकरण्य ( एकाश्रयवृत्तित्व ) है, अतः व्याप्ति है।

अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीति अव्याप्तिः। न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यं, तत्तद्वह्न्यादेरप्युभयाभावसत्त्वाद् एकसत्त्वेऽपि द्वयं नास्तीति प्रतीतेः। गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च। तथापि प्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम्।

**आलोकः**—लक्षणस्याव्याप्तिसमर्थकं पूर्वपक्षमवतारयति दूषणाय—**अत्रेति**। **अत्र** प्रकरणेऽस्मिन्। **यद्यपि** सामान्यदृष्ट्या तु। **'वह्निमान् धूमात्' इत्यादौ**। **हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं** हेतोर्धूमस्याधिकरणमाश्रयो यः पर्वतादिः पर्वतमहानसचत्वरादिः तत्र यो वृत्तेर्वर्तनस्याभावो विरहस्तस्य प्रतियोगित्वं विरोधित्वम्। **तत्तद्वह्न्यादेः** पर्वतीयमहानसीयचत्वरीयवह्न्यादेः। **अस्ति**। **इति** हेतोः। **अव्याप्तिः**। **अस्यायमाशयः**—पर्वतो वह्निमान् धूमादित्यादौ हेतोर्धूमस्याधिकरणभूते पर्वते यथा घटाभावस्तथा महानसीयवह्नेरभावः महानसे चत्वरीयवह्नेरभावः तत्र गोष्ठीयवह्नेरभावः इति तदभावप्रतियोगि वह्निरूपं साध्यं नास्ति, किन्तु प्रतियोग्येवातस्तत्राव्याप्तिरिति। **न** नैव। **च**। **समानाधिकरणवह्निधूमयोः** एकाश्रयवह्निधूमयोरर्थात् पर्वतीयधूमेन सह पर्वतीयवह्नेः महानसीयधूमेन सह महानसीयवह्नेः। **व्याप्तिः** सम्बन्धः पर्वते महानसीयवह्नेरभावे गृहीतेऽपि तत्प्रतियोगी महानसीयवह्नि अप्रतियोगी साध्यः पर्वतीयवह्निः तादृशेन वह्निना सह हेतुभूतस्य धूमस्य सामानाधिकरण्यमिति कथमव्याप्तिरिति। **वाच्यं** कथनीयम्। **तत्तद्वह्न्यादेः** पर्वतीयप्रभृतिवह्न्यादेः। **अपि च**। **उभयाभावसत्त्वात्**। **एकसत्त्वे** एकस्य भावे। **अपि**। **द्वयम्** उभयम्। **न अस्ति**। **इति** इत्थम्। **प्रतीतेः** अवभासनात्। एकसत्त्वे द्वयं नास्तीति प्रतीत्या घटसत्त्वेऽपि घटपटौ न स्तः इतिवत् पर्वते पर्वतीयवह्निसत्त्वेऽपि वह्निघटद्वयं नास्तीति वक्तुं शक्यते यादृशाभावस्य पर्वतीयवह्निरपि प्रतियोगी यथा घट इत्यप्रतियोगिनः साध्यस्याभावादव्याप्तिरेवेति। अत्रोच्यते—हेत्वधिकरणवृत्त्यभावीयप्रतियोगिता व्यासज्यवृत्तिधर्मानवच्छिन्ना विवक्षिता। उभयवृत्तिधर्म एव व्यासज्यवृत्तिधर्मः। प्रकृते हि हेत्वधिकरणे वह्निघटद्वयं नास्तीत्याकारकाभावीयप्रतियोगिता वह्निघटोभयास्मिन् स्थितो यो वह्निघटोभयस्वरूपो व्यासज्यवृत्तिधर्मस्तदवच्छिन्नैव। अतस्तदुभयाभावं गृहीत्वा लक्षणे दूषणं नोचितम्। शुद्धघटाभावं गृहीत्वा लक्षणसमन्वयः। व्याप्तिश्च हेत्वधिकरणवृत्तिव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकात्यन्ताभावाप्रतियोगिसाध्येन सह हेतोः सामानाधिकरण्यमेवेति ग्रन्थान्तरे।

तत्र पूर्वपक्षी—**गुणत्वादिति**। यदि तत्र तथोच्यते तदाऽपि 'गुणवान् द्रव्यत्वात्' इत्यत्र। **अव्याप्तिस्तु** भवत्येव। **अयमाशयः**—'घटो गुणवान् द्रव्यत्वात्' इत्यत्र हेत्व-

धिकरणं रक्तो घटस्तदा पीतगुणत्वाभावः पीतघटे श्वेतगुणत्वाभावः तदभावस्य प्रतियोगि गुणरूपं साध्यमप्रतियोगि नास्तीति लक्षणस्याव्याप्तिरेवेति ।

तत्र सिद्धान्ती—**तथापीति । तथापि । प्रतियोगितानवच्छेदक** हेत्वधिकरणवृत्तिर्योऽभावस्तदीया या प्रतियोगिता विरोधिता तस्या अनवच्छेदकमपरिचायकम् । यत् । **साध्यतावच्छेदकं** साध्यतायाः वह्नित्वादेरवच्छेदकं धर्मः । **तदवच्छिन्नसामानाधिकरण्यं** तेनावच्छिन्नं साध्यैकाश्रयत्वम् । **व्याप्तिः इति ।** वाच्यमिति । लक्षणे हेत्वधिकरणवृत्त्यभावाप्रतियोगि साध्यमित्येव न गृह्णीमोऽपितु साध्यतावच्छेदकधर्मः हेत्वधिकरणवृत्त्यभावीयप्रतियोग्यनवच्छेदक इति व्याप्तिलक्षणे ब्रूमः । तथा सति गुणवानित्यादावपि नाव्याप्तिरिति । यथा गुणवान् द्रव्यत्वादित्यत्र हेतुर्द्रव्यत्वं तदधिकरणं तत्तज्जलादिद्रव्यं अभावा रूपरसगन्धाद्यभावाः तदभावप्रतियोगिता तत्तद्रूपरसादिगुणे प्रतियोगितावच्छेदकं तत्तद्रूपत्वरसत्वादि तदनवच्छेदकं साध्यतावच्छेदकं गुणत्वं तदवच्छिन्नो गुणः तत्सामानाधिकरण्यं द्रव्यत्वस्येति । पर्वतो वह्निमान् धूमवत्वादित्यादौ हेतुर्धूमस्तदधिकरणं पर्वतादिः तद्वृत्त्यभावो घटाभावः तत्प्रतियोगिता घटे प्रतियोगितावच्छेदकं घटत्वं प्रतियोगितानवच्छेदकं साध्यतावच्छेदकं वह्नित्वं तदवच्छिन्नः साध्यो वह्निः तत्सामानाधिकरण्यं धूमस्येति । धूमवान् वह्नेरित्यादौ तु हेतुर्वह्निः तदधिकरणं तप्तायःपिण्डम् तद्वृत्त्यभावो धूमाभावः तत्प्रतियोगिता धूमनिष्ठा प्रतियोगितावच्छेदकं धूमत्वं तदेव साध्यतावच्छेदकमिति न तत्र लक्षणसमन्वयः ।

**अनुवाद**—इस प्रसङ्ग में यद्यपि 'वह्निमान् धूमात्' इत्यादि में हेतुभूत धूम के अधिकरणभूत पर्वत आदि में वृत्ति के अभाव का प्रतियोगित्व उन-उन अर्थात् पर्वत में महानसीय, महानस में पर्वतीय वह्नि आदि का है, अतः उसमें अव्याप्ति है । न तो समान ( एक ही ) अधिकरण में रहने वाले वह्नि एवं धूम की ही व्याप्ति होती है, ऐसा कहना ही उचित है, क्योंकि उन-उन वह्नि आदि का भी उभयाभाव होता है और 'एक के रहने पर भी दोनों नहीं है' ऐसी प्रतीति भी होती है । ( तत्तत् वह्नि, घट इन दोनों का अभाव तो मिल ही जायेगा । ) 'गुणवान् द्रव्यत्वात्' में भी अव्याप्ति हो जायेगी ।

वैसा होने पर भी हेत्वधिकरणवृत्त्यभावप्रतियोगिता का अनवच्छेदक जो साध्यता का अवच्छेदक है, उससे अवच्छिन्न सामानाधिकरण्य को ही व्याप्ति मानना होगा, वैसा मानने पर फिर कोई दोष नहीं आयेगा ।

ननु 'रूपत्वव्याप्यजातिमत्वान् पृथिवीत्वाद्' इत्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयस्तासां च शुक्लत्वादिजातीनां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न, तत्र परम्परया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् । न हि तादृशधर्मावच्छिन्नाभावः क्वाऽपि पृथिव्यामस्ति रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः । एवं दण्डयादिसाध्ये परम्परासम्बन्धं दण्डत्वादिकमेव साध्यतावच्छेदकं तच्च प्रतियोगितानवच्छेदकमिति ।

**आलोक:**—हेत्वधिकरणवृत्त्यभावीयप्रतियोगितावच्छेदकं यत्साध्यतावच्छेदकमिति अंशमादायाव्याप्तिं शङ्कते—**नन्विति**। **'घटो रूपत्वव्याप्यजातिमत्वान् पृथिवीत्वात्' इत्यादौ**। **साध्यतावच्छेदिका** या साध्यता तस्या अवच्छेदिका **रूपत्वव्याप्यजातयः** रूपत्वव्याप्या या जातयो नीलपीतत्वाद्याः। **तासां** तथाविधानाम्। **शुक्लत्वादिजातीनां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वं** नीलो यो घटस्तदादिषु या वृत्तिस्तस्या योऽभावस्तस्याः या प्रतियोगिता तस्याः अवच्छेदकत्वम्। **अस्ति**। **अस्यायमाशयः**—अत्र हि रूपत्वव्याप्यजातिः साध्या पृथिवीत्वं हेतुः रूपत्वस्य व्याप्या जातयः शुक्लाद्याः तदधिकरणं यद्वि नीलो घटस्तत्र शुक्लाद्यभावः शुक्लाभावप्रतियोगितावच्छेदकं शुक्लत्वं तदेव च साध्यतावच्छेदकमिति तस्य प्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वेन न निर्वाह इत्यव्याप्तिः। **इति** इत्थम्। **चेत्**। **न** न तत्समीचीनम्। समाधत्ते—**तत्रेति**। **तत्र** तादृशस्थले। **परम्परया** सामान्यतस्तु साध्यतावच्छेदकसमवायसम्बन्धेन रूपत्वव्याप्यजातिमान् साध्यः साध्यतारूपत्वजातिमन्निष्ठा साध्यतावच्छेदकं रूपत्वव्याप्यजातिमत्त्वं तच्च प्रकृतिजन्यबोधे प्रकारीभूतो भाव इति रीत्या रूपत्वव्याप्यजातिमत्त्वं किन्तु परम्पराख्यस्वाश्रयसमवायसम्बन्धेन यत्र स्वं रूपत्वव्याप्यजातित्वं तदाश्रयो रूपत्वव्याप्यजातिः तत्समवायो रूपमात्रे इति। **रूपत्वव्याप्यजातित्वस्य**। **एव**। **साध्यतावच्छेदकत्वात्** **नैव** प्रतियोगितावच्छेदकत्वं तस्येति ततः। तदवच्छिन्ना स्वाश्रयाश्रयसम्बन्धेन रूपत्वव्याप्यजातिमन्तः हेतोः पृथिवीत्वस्य तत्सामानाधिकरण्यमिति न दोष इति ग्रन्थान्तरे। तदेवाह—**न हीति**। **न** नैव। हि। **तादृशधर्मावच्छिन्नाभावः** तथाविधधर्मेण योऽवच्छिन्नस्तस्याभावः **पृथिव्यां** पृथिवीमात्रे। **क्वापि** घटादौ। **अस्ति** अपितु भाव एव। तादृशाभावे सति। **रूपत्वव्याप्यजातिमान् न अस्ति**। **इति बुद्ध्यापत्तेः** ज्ञानसम्भवादिति। परम्परया साध्यतावच्छेदकत्वस्य स्थलान्तरं प्रस्तौति—**एवमिति**। **एवमित्यम्**। **दण्डयादि** मठो दण्डिमान् दण्डिसंयोगात् इत्यादि, **साध्ये** दण्डिमत्वे। **परम्परासम्बद्धं** स्वाश्रयाश्रयत्वरूपम्। **दण्डत्वादिकम्**। **एव**। **साध्यतावच्छेदकं** दण्डिमत्त्वरूपा या साध्यता तस्या अवच्छेदकम्। **तद्** दण्डत्वम्। **च**। **प्रतियोगितानवच्छेदकं** तत्तद्दण्डयभावीयप्रतियोगिताया अनवच्छेदकमिति।

**अयमाशयः**—मठो दण्डिमान् दण्डिसंयोगादित्यत्र पक्षो मठः दण्डिमत्त्वं साध्यं दण्डिसंयोगो हेतुः साध्यतावच्छेदको दण्डः दण्डिसंयोगस्य हेतोरधिकरणं मठः तद्वृत्त्यभावः तद्दण्डी नास्तीति तत्तद्दण्डयभावः; तत्तदभावीया प्रतियोगिता तत्तद्दण्डिनिष्ठा अभावप्रतियोगितावच्छेदकस्तत्तद्दण्डः। यदि स एव स्यात्तदा व्याप्तिः किन्तु स्वाश्रया भवेदाश्रयत्वरूपपरम्परासम्बन्धेन साध्यतावच्छेदकं दण्डत्वमेव। दण्डिसंयोगाश्रये मठे स्वाश्रयाश्रयत्वपरम्परासम्बन्धेन दण्डत्ववान्नास्तीति न च भवति प्रत्यय इति विस्तरोऽन्यत्र।

**अनुवाद**—घटो 'रूपत्वव्याप्यजातिमत्वान् पृथिवीत्वात्' इत्यादि में रूपत्वव्याप्य जातियाँ है साध्यता के अवच्छेदक शुक्लत्व आदि स्वरूप वाली उनका नील घट आदि की वृत्ति के अभाव की प्रतियोगिता का अवच्छेदकत्व है, अतः अव्याप्ति है; ऐसा कहना

उचित नहीं, उसमें स्वाश्रयाश्रयत्व परम्परारूप सम्बन्ध से रूपत्वव्याप्य जातित्व का ही साध्यतावच्छेदकत्व है और न ही उस प्रकार के धर्म से अवच्छिन्न का अभाव पृथिवी भर में कहीं भी है, क्योंकि वैसा होने पर रूपत्व से व्याप्य जातिमान् नहीं है, ऐसी बुद्धि हो जायेगी। इस प्रकार 'मठः दण्डिमान् दण्डिसंयोगात्' आदि में दण्डी आदि साध्य में परम्परासम्बद्ध दण्डत्व आदि ही साध्यता का अवच्छेदक है, वह भी प्रतियोगिता का अनवच्छेदक है।

साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदन्ति।

**आलोकः**—साध्यतावच्छेदकत्वव्यवस्था कुत इत्यपेक्षायामाह—**साध्यादिभेदेनेत्यादि**। **साध्यादिभेदेन** साध्यं वह्न्यादि आदिपदात् साधनं धूमादि तेषां भेदेन पार्थक्येन। **व्याप्तेः** साध्यसाधनयोरव्यभिचरितसाहचर्यनियमस्य। **भेदात्** भिन्नप्रकृतिकत्वात्। **तादृशस्थले** साध्यसाधनयोर्नानाविधत्वस्थले। 'साध्यसाधनयोर्भेदेन व्याप्तिभेदः' इति नियमात्। लक्षणान्तरमेव कर्तव्यमिति। **साध्यतावच्छेदकावच्छेदकं** साध्यताया अवच्छेदकता तस्या अवच्छेदकम्। तच्च **प्रतियोगितावच्छेदकतानवच्छेदकं** प्रतियोगितायाः हेत्वधिकरणनिष्ठाभावप्रतियोगितायाः अवच्छेदकता तस्या अनवच्छेदकं—हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकतानवच्छेदकं यत् साध्यतावच्छेदकतावच्छेदकं हेतोस्तदाश्रयावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति। एव हि। **लक्षणघटकं** लक्षणापादनम्। **इति** इत्थम्। **अपि** च। **वदन्ति** कथयन्ति शिष्टा इति। इदं परम्परासम्बन्धानङ्गीकर्तॄणां मतम्, ये हि खलु परम्परासम्बन्धकल्पनास्थाने साध्यसाधनभेदं कल्पयित्वा तदनुसारेण व्याप्तेः पृथक्पृथगेव लक्षणं कर्तव्यमिति समर्थयन्ति। तदनुसारेण हेत्वधिकरणवृत्त्यभावीयप्रतियोगितावच्छेदकतानवच्छेदकं यत्साध्यतावच्छेदकतावच्छेदकं तदवच्छिन्नावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति। लक्षणसमन्वयश्चेत्थम्—'घटो रूपत्वव्याप्यजातिमत्वान् पृथ्वीत्वात्' इत्यादौ 'मठो दण्डिमान् दण्डिसंयोगात्' इत्यादौ च हेत्वधिकरणवृत्त्यभावीयप्रतियोगितारूपत्वव्याप्यजातिमत्तन्नीलपीतादिरूपेषु तत्तद्दण्डिषु च तदवच्छेदिका रूपत्वव्याप्यनीलत्वपीतत्वादिजातयो दण्डश्च अभावीयप्रतियोगितावच्छेदकतानवच्छेदकस्तथा साध्यतावच्छेदकताया अवच्छेदकः रूपत्वव्याप्यजातित्वं तथा दण्डत्वं तदवच्छिन्ना रूपत्वव्याप्यजातयः तथा दण्डः तदवच्छिन्ननीलपीतादिगुणाः तथा दण्डी एतद्द्वयं यथाक्रमं समवायेन संयोगेन च साध्यमस्ति। तादृशसाध्येन सह पृथ्वीस्वरूपहेतोः तथा दण्डिसंयोगरूपहेतोश्च सामानाधिकरण्यमस्ति। एवं हि लक्षणं सङ्गच्छते परम्परासम्बन्धेनावच्छेदकस्य प्रयोजनं नेति विस्तरोऽन्यत्र।

**अनुवाद**—( कुछ तो परम्परा-सम्बन्ध से व्याप्ति मानकर यह मानते हैं कि ) साध्य एवं साधन के भेद से व्याप्ति से भी भिन्न-भिन्न होने से वैसे स्थल में ( जहाँ परम्परा से स्वाश्रयत्वाश्रय सम्बन्ध से साध्यतावच्छेदक माना गया है वहीं ) साध्यता

की अवच्छेदकता का अवच्छेदक वही है, जो प्रतियोगिता का अनवच्छेदक है, ऐसा ही लक्षण करना चाहिए।

हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यं, तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य नाऽव्याप्तिः। एवं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं बोध्यं, तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाऽव्याप्तिः।

**आलोकः**—स्थलान्तरेऽव्याप्तिपरिहाराय हेत्वधिकरणपदेन विवक्षितमर्थं स्पष्टयति—**हेत्वधिकरणमिति**। **हेत्वधिकरणं** हेतुमत्पदबोध्यहेत्वधिकरणम्। च हि। **हेतुतावच्छेदकविशिष्टाधिकरणं** हेतुतायाः धूमादिनिष्ठाया अवच्छेदको यो धर्मस्तद्विशिष्टस्य अधिकरणमाश्रयः। **वाच्यं** कथनीयम्। **तेन** हेत्वधिकरणस्य तथाशयेन। **'द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्'** इत्यादौ **द्रव्यत्वस्य शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वे** शुद्धाऽविशिष्टा या सत्ता तस्या अधिकरणंमाश्रयो यो गुणादिस्तन्निष्ठस्तद वृत्तिर्योऽभावो विरहस्तस्य प्रतियोगित्वे विरोधित्वे। **अपि** च। **न**। **अव्याप्तिः**। इति।

**अयमाशयः**—ननु 'घटो द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्' इत्यादौ 'शुद्धविशिष्टसत्तयोः विशिष्टं शुद्धान्नातिरिच्यते' इति नियमेन अभेदेन शुद्धसत्ताऽभिन्नविशिष्टसत्ताहेतोरधिकरणं गुणः तद्वृत्तिरभावः द्रव्यत्वं नास्तीति प्रतियोगि द्रव्यं तत्ता द्रव्यत्वनिष्ठा प्रतियोगितावच्छेदकत्वं द्रव्यत्वत्वं तदेव साध्यतावच्छेदकमिति कथं लक्षणसमन्वय इति चेन्न, हेतुतावच्छेदकविशिष्टहेत्वधिकरणवृत्त्यभावेत्यादिलक्षणकरणेनादोषात्। तथा हि हेतुरत्र गुणकर्मान्यत्वविशिष्टसत्ता हेतुता तादृशसत्तानिष्ठा हेतुतावच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्वं तद्विशिष्टा गुणकर्मान्यत्वविशिष्टसत्ता तदधिकरणं द्रव्यं तद्वृत्तिरभावः घटाभावादियंः कश्चिदपि तदप्रतियोगि साध्यं द्रव्यत्वं तदवच्छिन्नसामानाधिकरण्यसत्त्वेन हेतुना लक्षणसमन्वय इति विस्तरोऽन्यत्र।

तत्र हेतुतावच्छेदकसम्बन्धविवक्षां दर्शयति—**एवमिति**। **एवमि**त्यमेव। **हेतुतावच्छेदकसम्बन्धेन** हेतुता हेतुनिष्ठा तस्याः अवच्छेदकसम्बन्धेन। **हेत्वधिकरणं** हेतोर्धूमादेरधिकरणमाश्रयः। **बोध्यं** ज्ञेयम्। **तेन** हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्य ग्रहणेन। **समवायेन** समवायसम्बन्धेन। **धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वे**—धूमस्य हेतुभूतस्याधिकरणमाश्रयः समवायसम्बन्धेन धूमावयवः तादृशे तदवयवे धूमावयवे निष्ठा वृत्तिर्यस्य तादृशो योऽभावो वह्न्यभावस्तस्य प्रतियोगी वह्निस्तत्त्वे। **अपि**। **वह्नेः** साध्यस्य। **न**। **अव्याप्तिरि**ति।

**अयमाशयः**—हेतुतावच्छेदकविशिष्टाधिकरणत्वेन हेत्वधिकरणस्य ग्रहणेऽपि 'पर्वतो वह्निमान् धूमात्' इत्यत्राव्याप्तिर्नैव निरोद्धुं शक्यते। तथाहि हेतुर्धूमः तस्याधिकरणं समवायसम्बन्धेन धूमावयवः तद् वृत्तिर्योऽभावः स वह्न्यभावः तत्प्रतियोगी वह्निः साध्य इति चेन्न; हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्य ग्रहणाद् दोषाभावात्। तथा

हि अत्र हेतुतावच्छेदकः सम्बन्धः संयोगः, तेन सम्बन्धेन धूमत्वावच्छिन्नाधिकरणं पर्वतादिर्न तु धूमावयवः अवयवस्य समवायसम्बन्धेनैव तदधिकरणत्वात् तद्वृत्तिरभावो घटाभावादिरिति सर्वं सुस्थमेवेति ।

**अनुवाद**—हेतु का अधिकरण ( आश्रय ) हेतुता के अवच्छेदक से विशिष्ट अधिकरण मानना चाहिए। इस कारण 'द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्' इत्यादि में द्रव्यत्व के शुद्ध सत्ता के अधिकरण गुण आदि में रहने वाले अभाव के प्रतियोगी होने पर भी अव्याप्ति नहीं है।

इस प्रकार हेतु के अधिकरण को भी हेतुता के अवच्छेदक सम्बन्ध से ही लेना चाहिए। इस कारण वह्नि के समवाय सम्बन्ध से धूम के अधिकरण बने उसके अवयव में रहने वाले अभाव के प्रतियोगित्व में भी अव्याप्ति नहीं है।

अभावश्च प्रतियोगिव्यधिकरणो बोध्यः। तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ मूलावच्छेदेनैव एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाऽव्याप्तिः।

**आलोकः**—अभावपदस्य विवक्षितमर्थं निश्चिनोति—**अभाव** इति। **अभावः** हेतुमन्निष्ठाभावः। **च** तु। **प्रतियोगिव्यधिकरणः** प्रतियोगिनः हेतुमन्निष्ठाभावप्रतियोगिनः व्यधिकरणः असमानाश्रयः। **बोध्यः**। **तेन** अभावस्य प्रतियोगिव्यधिकरणत्वेन। 'कपिसंयोगि एतद् वृक्षत्वात्' इत्यादौ। **मूलावच्छेदेन** मूलव्यापकत्वेन। **एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वे** एतद्वृक्षवृत्तिरेतद्वृक्षनिष्ठो यः कपिसंयोगाभावः कपिसंयोगविरहस्तस्य प्रतियोगित्वे विरोधित्वे। **अपि**। **कपिसंयोगस्य**। **न** नैव। **अव्याप्तिरिति**।

**अयमाशयः**—'वृक्षः कपिसंयोगी एतद्वृक्षत्वात्' इत्यादि सद्धेतुस्थले कपिसंयोगः साध्यः तत्र शाखायां कपिसंयोगो मूले तदभावः हेतुरेतद्वृक्षत्वम्, तदधिकरणं वृक्षस्तद्वृत्तिरभावो मूलावच्छेदेन कपिसंयोगाभावः तत्प्रतियोगी कपिसंयोगः प्रतियोगितावच्छेदकत्वं कपिसंयोगत्वं तदेव साध्यतावच्छेदकमिति अव्याप्तिरेव। अभावस्य हि प्रतियोगिव्यधिकरणत्वेन ग्रहणे तु तद्वृत्तिरभावो घटाभावादिः ( मूलावच्छेदेन कपिसंयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात् ) तथा ग्रहणे सति अभावस्तत्प्रतियोगी च भिन्नाधिकरणवृत्ती स्यातामेव यतो न दोषः। यथा घटाभावस्य प्रतियोगी घटः तत्प्रतियोगितावच्छेदकं घटत्वं तदनवच्छेदकं यत्साध्यतावच्छेदकं कपिसंयोगत्वं तदवच्छिन्नकपिसंयोगरूपसाध्येन सह एतद्वृक्षत्वरूपहेतोः सामानाधिकरण्यमस्तीति नैवाव्याप्तिः।

**अनुवाद**—अभाव ( हेतु के अधिकरण में रहने वाला अभाव ) अभाव के प्रतियोगी से व्यधिकरण ( भिन्न अधिकरण ) वाला होना चाहिए। इस कारण 'कपिसंयोगी एतद् वृक्षत्वात्' इत्यादि में मूलावच्छेदक रूप से कपिसंयोग का एतद् वृक्ष में रहने वाले कपिसंयोग के अभाव के प्रतियोगी होने पर भी अव्याप्ति नहीं है।

न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्तिः। प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षेऽपि मूलावच्छेदेन सत्त्वात्। यदि तु प्रतियोग्यधिकरणावृत्तित्वं तदा 'संयोगी सत्त्वात्' इत्यादावतिव्याप्तिः। सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम्, हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात् स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः।

**आलोकः**—अभावे प्रतियोगिव्यधिकरणस्याशयं विवृणोति—**न चेति**। न। **च** हि। **प्रतियोगिव्यधिकरणत्वम्** अभावतत्प्रतियोगिनोर्भिन्नाश्रयत्वम्। **यदि**। **प्रतियोग्यनधिकरणवृत्तित्वं** प्रतियोगिनोऽभावविरोधिनः अनधिकरणं भिन्नाधिकरणे वृत्तिर्निष्ठा यस्य तस्य भावस्तत्त्वम्। **तदा** तथाशये। **तथैव** प्राग्वदेव। **अव्याप्तिः**। तत्र हेतुमाह—**प्रतियोगिन इति**। **प्रतियोगिनः** अभावप्रतियोगिभूतस्य। **कपिसंयोगस्य**। **अनधिकरणे** अभावाधिकरणभिन्ने। **गुणादौ** गुणे गुणो न तिष्ठतीति न्यायशास्त्रात्। **वर्तमानः** सवृत्तिकः। **यः**। **अभावः**। **तस्य**। **एव**। **वृक्षे** तरौ। **मूलावच्छेदेन** मूलव्यापकत्वेन। **सत्त्वात्** स्थितेः। यथा हेत्वधिकरणमेतद्वृक्षः तद्वृत्तिरभावः कपिसंयोगाभावः स प्रतियोग्यनधिकरणवृत्तिरेव, यतो हि अभावप्रतियोगी कपिसंयोगः तस्यानधिकरणं गुणः स एव गुणवृत्तिकपिसंयोगाभावो वृक्षे मूले लभ्यत इति तत्र प्रतियोगिव्यधिकरणत्वस्याभावे सत्त्वादव्याप्तिरेवेति। तत्परिहारस्तु प्रतियोगिव्यधिकरणत्वं तदा प्रतियोग्यधिकरणावृत्तित्वमिति गृह्यताम्। तथा सति वृक्षवृत्तिकपिसंयोगाभावः स्वप्रतियोगिनः कपिसंयोगस्याधिकरणे मूलावच्छेदेन वर्तमान इति न स प्रतियोगिव्यधिकरणः प्रतियोग्यधिकरणावृत्तिरिति न दोष इति। पक्षान्तरमाह—**यदीति**। **यदि**। **तु**। प्रतियोग्यधिकरणत्वस्याशयो **प्रतियोग्यधिकरणावृत्तित्वं** प्रतियोगिनोऽधिकरणे आश्रये अवृत्तित्वं निष्ठाभावः। **तदा** 'संयोगी सत्त्वात्' **घटः** संयोगी सत्त्वात् इत्यादौ। संयोगसाध्यकसत्ताहेतुके असद्धेतौ। अतिव्याप्तिः। तथाहि—**सत्ताधिकरणे** हेतुः सत्ता तस्या अधिकरणे आश्रये। **गुणादौ** गुणकर्मणोः। **यः**। **संयोगाभावः** संयोगरूपसाध्यस्याभावः। तस्य। **प्रतियोग्यधिकरणद्रव्यवृत्तित्वात्** अभावस्य साध्यरूपसंयोगाभावस्य प्रतियोगि विरोधि यद् द्रव्यं तत्र वृत्तित्वात् ( न तु प्रतियोग्यधिकरणावृत्तित्वम् ) इति। **वाच्यम्**। इति।

**अयमाशयः**—यदि च प्रतियोगिव्यधिकरणत्वस्य प्रतियोग्यधिकरणावृत्तित्वमित्याशयस्तदाऽपि तस्य संयोगी सत्त्वादित्याद्यसद्धेतावतिव्याप्तिः। तथा हि संयोगी सत्त्वादित्यत्र संयोगः साध्यः हेतुः सत्ता तदधिकरणं गुणकर्मादि तत्र यद्यपि संयोगरूपसाध्यस्याभावो मिलिष्यति तथापि संयोगरूपसाध्यस्याभावो नैव भविष्यति लक्षणघटकः। संयोगरूपसाध्यस्याभावः पूर्वोक्तरीत्या स्वप्रतियोग्यधिकरणा वृत्तिर्नास्ति किन्त्वव्याप्यवृत्तित्वेन स्वप्रतियोग्यधिकरणवृत्तिरेवेति। अत्रापि हेत्वधिकरणवृत्तिर्घटाद्यभावस्तादृशाभावीयप्रतियोगितावच्छेदको घटत्वादिधर्मोऽस्ति। अनवच्छेदकः साध्यतावच्छेदकः संयोगस्वरूपो धर्मः। एवञ्चालक्ष्ये लक्षणस्य गमनादतिव्याप्तिरिति।

समाधत्ते—**हेत्वधिकरण** इति । **हेत्वधिकरणे** हेतोरधिकरणे आश्रये । **प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य** प्रतियोगिनः हेत्वधिकरणनिष्ठाभावप्रतियोगिनः अनधिकरणमनाश्रयस्तत्र वृत्तित्वं वर्तनं तेन विशिष्टस्तस्य तादृशस्य । **विवक्षितत्वात** अभीष्टत्वात् । **स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावः** स्वस्य यः प्रतियोगी तदनधिकरणीभूतो यो हेतुस्तस्य यदधिकरणं तस्य वृत्तेरभावः । **इति** इत्थम् । **निष्कर्षः** फलितार्थः । हेत्वधिकरणवृत्त्यभावः स्वप्रतियोगिनोऽनधिकरणीभूतहेत्वधिकरणे वर्तमानोऽपेक्षितः । तथा सति नास्ति दोषः पूर्वोक्तोभयस्थले । तथा हि 'वृक्षः कपिसंयोगवानेतद्वृक्षत्वात्' इत्यत्र यद्यपि कपिसंयोगाभावोऽपि मूलावच्छेदेन वृक्षे तिष्ठति सोऽभावः स्वप्रतियोगिनोऽनधिकरणीभूतहेत्वधिकरणे नास्ति । किन्तु स्वप्रतियोगिनोऽधिकरणीभूतहेत्वधिकरणे तिष्ठति । तस्मात् कपिसंयोगाभावस्य लक्षणघटकत्वाभावाद् घटाद्यभावो गृह्यते तेन च लक्षणसमन्वयः । 'घटः संयोगवान् सत्त्वात्' सत्तारूपहेत्वधिकरणे गुणादौ संयोगरूपसाध्यस्याभावः स्वप्रतियोगिनोऽनधिकरणीभूतहेत्वधिकरणे तिष्ठति, तस्माल्लक्षणघटकोऽस्ति तादृशाभावीयप्रतियोगितावच्छेदक एव साध्यतावच्छेदकसंयोगस्वरूपो धर्मः अनवच्छेदको नास्तीति नातिव्याप्तिरिति जीवरामीये विस्तरः ।

**अनुवाद**—न तो अभाव के प्रतियोगी का व्यधिकरणत्व ( असमानाश्रयत्व ) यदि प्रतियोगी के अधिकरण से भिन्न अधिकरण में वृत्तित्व हो तो उसी तरह अव्याप्ति होती है, क्योंकि प्रतियोगी कपिसंयोग के अनधिकरण गुण आदि में वर्तमान जो अभाव है, उस का ही वृक्ष में मूल रहता है । यदि प्रतियोगिव्यधिकरणत्व का आशय प्रतियोगी के अधिकरण का अवृत्तित्व हो तो भी 'संयोगी सत्त्वात्' इत्यादि ( असद्धेतु ) में अतिव्याप्ति हो जाती है, क्योंकि सत्ता के अधिकरण गुण आदि में जो संयोगाभाव है, उसका प्रतियोगी के अधिकरण द्रव्य में भी वृत्तित्व है, ऐसा कहना ही उचित है ।

हेतु के अधिकरण में प्रतियोगी के अनधिकरण में वृत्तित्व होने से विशिष्ट के ही विवक्षित होने से अपने प्रतियोगी के अनधिकरणीभूत हेतु के अधिकरण में वृत्ति का अभाव, ऐसा निष्कर्ष मानना चाहिए । ( ऐसा मानने से उपर्युक्त दोनों दोष नहीं आयेंगे । )

प्रतियोग्यनधिकरणत्वञ्च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यं तेन, विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादौ विशिष्टसत्ताभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि न क्षतिः ।

एवं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यं, तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया ज्ञानाधिकरणत्वेऽपि न क्षतिः ।

इत्थञ्च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः ।

**आलोकः**—उक्तलक्षणगतं प्रतियोग्यनधिकरणत्वं सप्रपञ्चं व्याख्याति—**प्रतीति** । **प्रतियोग्यनधिकरणत्वं** प्रतियोगिनः हेत्वधिकरणनिष्ठाभावप्रतियोगिनः अनधिकरण-

त्वमनाश्रयत्वम् । **च तु । प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं** प्रतियोगितायाः हेतुमन्निष्ठाभावप्रतियोगिताया अवच्छेदकेन धर्मेण अवच्छिन्नं विशिष्टं यदनधिकरणत्वमनाश्रयत्वमिति । **वाच्यम्** । **तेन** प्रतियोग्यनधिकरणत्वस्य प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वाशयेन । **विशिष्टसत्तावान् जातेः** । इत्यादौ । **जात्यधिकरणगुणादौ** जात्यधिकरणभूतगुणकर्मादौ । **विशिष्टसत्ताभावस्य** विशिष्टसत्तायाः अभावस्य । **प्रतियोगिसमानाधिकरणत्वे अपि । न । क्षतिरिति ।**

**अयमाशयः**—अभावप्रतियोग्यनधिकरणत्वमपि प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं बोध्यम् । अन्यथा 'घटो विशिष्टसत्तावान् जातेः' इत्याद्यसद्धेतुस्थलेऽतिव्याप्तिः स्यात् । तथा हि अत्र जातेरिति हेतोरनैकान्तिकस्य व्यभिचारस्थले गुणो वा कर्म वा यतः साध्यं गुणकर्मान्यत्वविशिष्टसत्ता साध्याभावो गुणकर्मान्यत्वविशिष्टसत्ताभावः तद्वान् गुणः कर्मापीति साध्याभाववदवृत्तित्वाज्जातिहेतुर्व्यभिचारी । परमत्र व्यभिचारिस्थले जातिरूपहेत्वधिकरणे गुणे कर्मणि च विशिष्टसत्ताभावो नेतुं न शक्यते, 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायाद् विशिष्टसत्ताभावस्य प्रतियोगिन्येव शुद्धसत्ता तस्याः शुद्धसत्तायाः अभावस्तु जातिरूपहेत्वधिकरणे गुणे कर्मणि नास्ति । शुद्धसत्तायाः त्रिष्वनुगतत्वेन गुणकर्मानुगतत्वात् । साध्याभावस्य लक्षणाघटकत्वाद् घटाभावः तस्य प्रतियोगी घटः प्रतियोगितावच्छेदकत्वं घटत्वं तदनवच्छेदकं यत्साध्यतावच्छेदकं विशिष्टसत्तात्वं तादृशासाध्येन सह जातिरूपहेतोर्गुणकर्मण्यपि सामानाधिकरण्यमित्यलक्ष्ये लक्षणगमनरूपाऽव्याप्तिर्दुर्वारैवेति प्रमादो विस्तरः । प्रतियोग्यनधिकरणत्वस्य प्रतियोगितावच्छेदकावच्छिनानधिकरणत्वेऽभिप्राये तु हेतुभूतजात्यधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेऽपि न लक्षणस्य विशिष्टसत्तावान् जातेरित्यादौ नाव्याप्तिः । अर्थात् यदि तु प्रतियोग्यनधिकरणं यद्धेत्वधिकरणं तत् प्रतियोगितावच्छेदकधर्मावच्छिन्नस्यानधिकरणमुच्येत तदा जातिरूपहेत्वधिकरणे गुणादौ विशिष्टसत्तात्वेन रूपेण विशिष्टसत्ताया अभावो मिलिष्यत्येव । तादृशाभावस्य प्रतियोगिनी विशिष्टसत्ता प्रतियोगितावच्छेदकधर्मो विशिष्टसत्तात्वं तदेव च साध्यतावच्छेदकमनवच्छेदकं नास्ति इष्टञ्च तदनवच्छेदकं साध्यतावच्छेदकं तस्मात्प्रकृतेऽनवच्छेदकसाध्यतावच्छेदकाभावान्नातिव्याप्तिः । व्याप्तिश्च प्रतियोगितावच्छेदकावच्छिन्नाधिकरणं सद्धेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकावच्छिन्नाधिकरणं तद्वृत्तिर्योऽभावः तादृशाभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तद्धर्मावच्छिन्नसाध्यसामानाधिकरण्यमेवेति ।

प्रतियोग्यनधिकरणत्वे विवक्षितसम्बन्धमाह—**एवमिति । एवमित्यमेव । साध्यतावच्छेदकसम्बन्धेन** साध्यताया यदवच्छेदकं तत्सम्बन्धेन न तु येन केनचित्सम्बन्धेन । **प्रतियोग्यनधिकरणत्वं** प्रतियोगिनः अभावप्रतियोगिनः अनधिकरणत्वमनाश्रयत्वम् । **बोध्यं** ज्ञेयम् । **तेन** साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वस्य ग्रहणेन । **विषयतया 'ज्ञानवान् सत्त्वात्'** इत्यादौ । **सत्ताधिकरणघटादेः** हेतुभूतसत्ताश्रयघटादेः । विषयतया विषयतासम्बन्धेन । **ज्ञानाधिकरणत्वे** ज्ञानाश्रयत्वे । **अपि । न ।** क्षतिः इति ।

**अयमाशयः**—'ज्ञानवान् सत्त्वात्' इत्यादौ समवायेन ज्ञानसाध्यके सत्ताहेतुकव्यभिचारिस्थलेऽसद्धेतौ हेतुभूतसत्ताया अधिकरणं घटादिः तन्निष्ठोऽभावो न ज्ञानाभावः ज्ञानं विषयतासम्बन्धेन घटवृत्तिः, इति तस्य विषयतासम्बन्धेन ज्ञानरूपप्रतियोगिसामानाधिकरण्यात् प्रतियोगिव्यधिकरणत्वाभावात्। इत्यतिव्याप्तिरिति चेदुच्यते विषयतासम्बन्धेन घटे ज्ञानं वर्ततां नाम वयं तु प्रतियोगिताव्यधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन गृह्णीमः। समवायेन घटे ज्ञानं नास्तीति ज्ञानाभावः प्रतियोगिव्यधिकरणः सुलभ एवेति सुकरोऽतिव्याप्तिपरिहारः। **इत्थमेवमेव** च। प्रतियोग्यधिकरणत्वस्य साध्यतावच्छेदकसम्बन्धेन ग्रहणात्। **वह्निमान् धूमात् इत्यादौ**। **धूमाधिकरणे** हेतुभूतधूमाश्रये। **समवायेन** समवायसम्बन्धेन। **वह्निविरहसत्त्वे** वह्न्यभावसत्त्वे। **अपि च**। **न**। **क्षतिरिति**।

**अयमाशयः**—धूमाधिकरणे पर्वते समवायेन वह्न्यभावो न प्रतियोगिव्यधिकरणः, प्रतियोगिनो वह्नेः संयोगेन पर्वतवृत्तित्वादिति।

**अनुवाद**—प्रतियोगी का जो अनधिकरणत्व है, वह प्रतियोगिता के अवच्छेदक से अवच्छिन्न अनधिकरणत्व मानना चाहिए। इस कारण 'विशिष्टसत्तावान् जातेः' इत्यादि में जाति के अधिकरणभूत गुण आदि में विशिष्ट सत्ता के अभाव का प्रतियोगी के साथ समानाधिकरणत्व होने पर भी कोई हानि नहीं है।

इसी तरह साध्यता के अवच्छेदक सम्बन्ध से ही प्रतियोगी का अनधिकरणत्व मानना चहिए। इस कारण 'ज्ञानवान् सत्त्वात्' इत्यादि में सत्ता के आश्रय घट आदि का विषयता से ज्ञान के अधिकरण होने पर भी कोई हानि नहीं है।

इसी तरह 'वह्निमान् धूमात्' इत्यादि में धूम के अधिकरण पर्वत में समवाय सम्बन्ध से वह्नि का अभाव होने पर भी कोई क्षति नहीं है।

ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्प्रतियोगिनोऽनधिकरणत्व तत्सामान्यस्य वा यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम्?

आद्ये 'कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ तथैवाव्याप्तिः। कपिसंयोगाभावस्य प्रतियोगितावच्छेदकावच्छिन्नो वृक्षवृत्तिकपिसंयोगोऽपि भवति तदनधिकरणं वृक्ष इति।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः। सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्। न च वह्निमान् धूमादित्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेस्तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम्; घटाभावे यो वह्न्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणञ्च पर्वतादिरित्येवं क्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात्।

यदि च घटाभावादौ वह्न्यभावादिर्भिन्न इत्युच्यते, तथापि धूमाभाववान् वह्न्यभावात् इत्यादावव्याप्तिः। तत्र साध्यतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः, तेन सम्बन्धेन सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यनधिकरणत्वं हेत्वधिकरणस्येति।

तृतीये तु कपिसंयोगाभाववान् आत्मत्वात् इत्यादावव्याप्तिः। तत्रात्मवृत्तिककपिसंयोगाभावाभावः कपिसंयोगस्तस्य च गुणत्वात् प्रतियोगितावच्छेदकं गुणसामान्यभावत्वमपि तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्यात्मन इति।

**आलोकः**—जातिहेतुके विशिष्टसत्तासाध्यके विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय प्रतियोग्यनधिकरणत्वस्य प्रतियोगितावच्छेदकावच्छिन्नानधिकरणस्वरूपो य आशय उक्तस्तमधिकृत्य सम्भाव्यपक्षत्रयमुद्भावयति—**नन्वित्यादिना**। **ननु** इति जिज्ञासायाम्। **प्रतियोगितावच्छेदकावच्छिन्नस्य** प्रतियोगिताया योऽवच्छेदकस्तेनावच्छिन्नस्य। **यस्य कस्यचित्**। **प्रतियोगिनः** विरोधिनः। **अनधिकरणत्वमनाश्रयत्वम्**। इत्येकः पक्षः। वा इति पक्षान्तरे। **तत्सामान्यस्य** प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य अनधिकरणत्वम्। इति द्वितीयः पक्षः। अथवा यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं यत्किञ्चिद्यः प्रतियोगितावच्छेदको धर्मस्तदवच्छिन्नस्यानधिकरणत्वमिति तृतीयः पक्षः। **विवक्षितम्** अपेक्षितम्। इति। प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्प्रतियोगिनोऽनधिकरणत्वमित्येकः प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणत्वमिति द्वितीयः यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नस्यानधिकरणत्वमिति तृतीयः, इति त्रयः पक्षाः।

तत्राद्यपक्षे यस्य कस्यचित्प्रतियोगिनोऽनधिकरणत्वे दोषमाह—**आद्य** इति। **आद्ये** प्रथमपक्षे प्रतियोगितावच्छेदकावच्छिनस्य यस्य कस्यचित्प्रतियोगिनोऽनधिकरणत्वेऽर्थे। 'कपिसंयोगी एतद्वृक्षत्वाद्' इत्यादौ। **तथैव** पूर्वोक्तरीत्या एव। **अव्याप्तिः** लक्षणस्येति। कथमित्यपेक्षायामित्थम्—**कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नः** एतद्वृक्षत्वाधिकरणनिष्ठो यो मूलावच्छेदेन कपिसंयोगो नास्तीत्यभावस्तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वं तदवच्छिन्नो **वृक्षवृत्तिकपिसंयोगः** मूलावच्छेदेन वृक्षावृत्तिः कपिसंयोगः। **अपि**। **भवति**। **तदनधिकरणं** तदनाश्रयः। **वृक्षः**। **इति** इत्थम्। प्रतियोगिव्यधिकरणत्वेन कपिसंयोगाभावस्य ग्रहणेऽव्याप्तिरिति।

**अयमाशयः**—अत्र एतद्वृक्षत्वाधिकरणनिष्ठो यो मूलावच्छेदेन कपिसंयोगो नास्तीत्यभावस्तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वं तदवच्छिन्नो वृक्षवृत्तिकपिसंयोगोऽपि तदनधिकरणं हेत्वधिकरणमेतद्वृक्षस्तन्निष्ठाऽभावीयप्रतियोगितावच्छेदकत्वमेव कपिसंयोगत्वमित्यव्याप्तिरिति। तत्र प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य अनधिकरणं विवक्ष्यते तदा 'वृक्षः कपिसंयोगी एतद्वृक्षत्वात्' इत्यादौ न दोपस्तया हि प्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नसामान्यस्यानधिकरणीभूतं हेत्वधिकरणमेतद्वृक्षो नास्तीति किन्तु प्रतियोगितावच्छेदकघटत्वावच्छिन्नस्यावधिकरणं हेत्वधिकरणमेतद्वृक्षः

तद्वृत्त्यभावीयप्रतियोगितावच्छेदकं घटत्वमनवच्छेदकं कपिसंयोगत्वं तदेव साध्यतावच्छेदकमित्यव्याप्त्यभाव इति।

**द्वितीये** प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणमिति पक्षे। यदि प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्यानधिकरणत्वं विवक्ष्यते तदा। **तु**। **प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः** प्रतियोगिनो यद् व्यधिकरणं तस्याभावस्य अप्रसिद्धिः अतः वह्निमान् धूमादित्यादौ सद्धेतुस्थलेऽपि लक्षणस्यासम्भवतो यद्यपि कपिसंयोगीत्यत्र दोषपरिहारः। तथाहि हेतुर्धूमस्तदधिकरणं पर्वतः तद्वृत्तिरभावः पूर्वं यो घटाभाव उक्तः स इदानीं न सम्भवति, यतो हि **सर्वस्य** सर्वविधस्य। **एव हि**। **अभावस्य** विरहस्य। **पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्** पूर्वक्षणवृत्तित्वं यत्स्वं घटाभावादिस्तस्य योऽभावस्तदात्मको यः प्रतियोगी तस्य समानाधिकरणकत्वात्। घटाभावाद्यधिकरणेऽपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावादेरभावस्योत्तरक्षणावच्छेदेन सत्त्वादित्याशयः। न च पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेरभावः स्वस्याभावस्य प्रतियोगी न तु घटाभावस्यापीति वाच्यं, पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेर्योऽभावः स पूर्वक्षणवृत्तित्वविशिष्टघटाभावान्नैवातिरिक्तः, यतो हि विशिष्टं शुद्धान्नातिरिच्यते इति न्यायाद् विशिष्टाभावप्रतियोग्यपि शुद्धघटाभावप्रतियोगी भवत्येव, तेन च प्रतियोगिव्यधिकरणाभावस्याऽसम्भवः।

**अयमाशयः**—अत्र घटो हि स्वप्रतियोगिसमानाधिकरणः। योऽयं पर्वते पूर्वक्षणवृत्तित्वविशिष्टो घटाभावस्तस्यैवोत्तरक्षणे अभावोऽपि इत्युत्तरक्षणावच्छेदेन पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावः विशिष्टं क्षणान्नातिरिच्यते इति रीत्या शुद्धघटाभावो विशिष्टघटाभावस्वरूपः इति यथा घटाभावस्याप्रतियोगी घटः तथा घटाभावस्य घटाभावाभावस्वरूपतया तत्प्रतियोगी घटाभावाभावो द्वितीयाभावश्चेति घटरूपप्रतियोगिनोऽसत्त्वेऽपि पर्वते पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिघटाभावस्य प्रतियोगिव्यधिकरणत्वालाभात्। एवं हि सर्वस्याऽप्यभावस्य प्रतियोगिव्यधिकरणता नैव स्यादित्यसम्भव इत्यन्यत्र विस्तरः।

यदि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वं समर्थ्यते इत्युच्यते, तत्रोच्यते—**न हीति**। **न नैव**। **च हि**। **वह्निमान् धूमात् इत्यादौ** धूमहेतुकसद्धेतुकस्थले प्रसिद्धानुमाने। **घटाभावादेः** हेतुमन्निष्ठाभावरूपघटाभावादेः। **यद्यपि पर्वतादेः** हेतुमतः। **पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं** पूर्वक्षणवृत्तित्वं यत्स्वं घटाभावादिस्तस्य घटाभावादेर्योऽभावस्तदात्मको यः प्रतियोगी तस्याधिकरणत्वमाश्रयत्वम्। **तथापि**। **साध्यतावच्छेदकसम्बन्धेन** संयोगरूपसाध्यतावच्छेदकसम्बन्धेन। **तत्प्रतियोग्यनधिकरणत्वं** स्वाभावात्मकप्रतियोगिनोऽनधिकरणत्वम्। **अस्ति**। **एव**। **इति हेतोः**। **कथम्**। **प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः** प्रतियोगिनो व्यधिकरणस्य योऽभावः तस्य अप्रसिद्धिरसम्भवः। **इति**। वाच्यम्। **घटाभावे** हेतुमन्निष्ठघटाभावे। **यः**। **वह्न्यभावः**। **तस्य**। **घटाभावात्मकतया** घटाभावे वह्निर्नास्तीत्याकारकप्रत्ययात् घटाभावाद् वह्न्यभावस्य चाभिन्नत्वाच्च। **घटाभावस्य**। **वह्निः** साध्यः। **अपि च**।

प्रतियोगी विरोधी। तदधिकरणं वह्न्यधिकरणम्। च। पर्वतादिः। इति हेतोः। एवं-क्रमेण एवंरीत्या। प्रतियोगिव्यधिकरणस्य प्रतियोग्यनाश्रयत्वस्य। अप्रसिद्धत्वात् असम्भवत्वात्। यदि। च इति अथवा। घटाभावादौ। वह्न्यभावादिः भिन्नः पृथगेव। इति। उच्यते। तदापि घटाभावादेर्वह्न्यभावादेर्भिन्नत्वे अपि। 'धूमाभाववान् वह्न्यभावात्' इत्यादौ। अव्याप्तिः। तत्र धूमाभाववानित्यादौ। साध्यतावच्छेदक-सम्बन्धः स्वरूपसम्बन्धः स्वरूपेण सम्बन्धः। तेन स्वरूपेण। सम्बन्धेन। सर्वस्य। एव। अभावस्य। पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं पूर्वक्षणवृत्तित्व-विशिष्टं स्वं तस्य अभावात्मकप्रतियोग्यनधिकरणत्वम्। हेत्वधिकरणस्य। इति।

**अयमाशयः**—प्रतियोग्यनधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन यथा विवक्षितं तथा पूर्वक्षणवृत्तित्वविशिष्टघटाभावरूपप्रतियोगिनः स्वरूपसम्बन्धेन पर्वते सत्त्वेऽपि साध्य-तावच्छेदकसंयोगसम्बन्धेन तथात्वाभावाद् घटाभावस्य प्रतियोगिव्यधिकरणत्वं युज्यत एवेति कथमसम्भव इति चेन्न; 'अभावाधिकरणकोऽभावोऽधिकरणस्वरूप' इति न्यायेन ( उदयनाचार्यसम्मतेन ) घटाभावे यो वह्न्यभावः सोऽधिकरणस्वरूपः ( घटाभाव-स्वरूपः ) इति यथा घटाभावस्य घटः प्रतियोगी तथा वह्निरपि तदधिकरणञ्च पर्वता-दिरिति नासौ घटाभावः प्रतियोगिव्यधिकरणो भवति एवमन्येऽप्यभावाः इति भवेदेवा-सम्भवः। न च अभावनिष्ठोऽभावो न अभावस्वरूपः, किन्तु भिन्न एवेति मते उक्तरीत्या न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं तथा सति धूमाभाववान् वह्न्यभावा-दित्यादिसद्धेतौ स्वरूपसम्बन्धेन धूमाभावसाध्यके वह्न्यभावहेतुकेऽव्याप्तिः। साध्यता-वच्छेदकेन स्वरूपसम्बन्धेन अभावमात्रस्य पूर्वक्षणवृत्तित्वविशिष्टत्वाभावात्मकप्रति-योग्यधिकरणत्वेन प्रतियोगिव्यधिकरणत्वाभावादिति।

तृतीये पक्षे दोषमुद्भावयति—**तृतीय** इति। **तृतीये** यत्किञ्चित्प्रतियोगितावच्छेद-कावच्छिन्नाधिकरणत्वे विवक्षिते। यद्यपि तथाविवक्षिते हेत्वधिकरणस्य घटाभावीय-यत्किञ्चित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य पर्वते सत्त्वेन प्रतियोगि-व्यधिकरणाभावप्रसिद्ध्या समन्वये प्रसिद्धानुमाने नासम्भवशङ्का। **तथापि**। **कपि-संयोगाभाववान् आत्मत्वात्। इत्यादौ** कपिसंयोगाभावसाध्यके आत्मत्वहेतुके सद्धेतौ। **अव्याप्तिः**। **तत्र** तथाऽनुमाने। **आत्मावृत्तिकपिसंयोगाभावाभावः** आत्मनः अवृत्तिः कपिसंयोगाभावस्य अभावः। **सः**। कपिसंयोगः। **तस्य** कपिसंयोगस्य। **गुणत्वात्**। **तत्प्रतियोगितावच्छेदकम्**। कपिसंयोगगुणयोरवच्छेदकम्। **गुणसामान्याभावत्वम्**। **अपि च। तदवच्छिन्नानधिकरणत्वं** गुणसामान्याभावत्वानधिकरणत्वम्। **हेत्वधिकरणस्य** आत्मत्वरूपहेत्वाश्रयस्य। **आत्मनः**। इति।

**अयम्भावः**—यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेत्वधिकरण-स्येति पक्षे प्रसिद्धानुमानेऽसम्भवदोषपरिहारेऽपि ( घटाभावविषययत्किञ्चित्प्रति-योगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य पर्वतेऽपि सत्त्वात् ) 'कपिसंयोगा-भाववान् आत्मत्वात्' इत्यादौ कपिसंयोगाभावसाध्यके आत्मत्वहेतुके सद्धेतौ अव्याप्तिः

स्यात्, साध्याभावग्रहणस्य प्राप्तेः। तथाहि—साध्याभावः कपिसंयोगाभावाभावः कपिसंयोगरूपः तत्र कपिसंयोगे कपिसंयोगत्वं गुणत्वञ्च धर्मौं तिष्ठतः। साध्याभावप्रतियोगितावच्छेदकं कपिसंयोगाभावत्वं गुणसामान्याभावत्वञ्च। तेन प्रतियोगितावच्छेदकत्वं गुणसामान्याभावत्वमेव न तु तदवच्छिन्नाधिकरणो हेत्वधिकरण आत्मेति।

**अनुवाद**—जो प्रतियोगी का अनधिकरणत्व है, वह प्रतियोगिता के अवच्छेदक से अवच्छिन्न किसी भी प्रतियोगी का विवक्षित है, अथवा प्रतियोगिसामान्य का विवक्षित है, अथवा यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्न का अनधिकरणत्व विवक्षित है।

प्रथम पक्ष में ( प्रतियोगिता के अवच्छेदक से अवच्छिन्न जिस किसी प्रतियोगी के अनधिकरणत्व की विवक्षा में ) 'कपिसंयोगी एतद् वृक्षत्वात्' इत्यादि में उसी तरह अव्याप्ति होती है, क्योंकि कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्न वृक्ष में अवृत्ति कपिसंयोग भी होगा, उसका अनधिकरण वृक्ष ही होगा।

दूसरे पक्ष के मानने पर उक्त दोष का परिहार तो होगा लेकिन फिर भी प्रतियोगिव्यधिकरण के अभाव की अप्रसिद्धि हो जायेगी, क्योंकि सभी प्रकार के अभाव का पूर्वक्षणवृत्तित्वविशिष्ट स्व के अभावात्मक प्रतियोगी का समानाधिकरणत्व होता है। न तो 'वह्निमान् धूमात्' इत्यादि में घटाभाव आदि का पूर्वक्षणवृत्तित्वविशिष्ट स्व के अभावात्मक प्रतियोगी का अधिकरणत्व यद्यपि पर्वत आदि का है, तथापि साध्यता के अवच्छेदक सम्बन्ध से उसके प्रतियोगी का अनधिकरणत्व है ही तो कैसे प्रतियोगी के व्यधिकरण के अभाव की अप्रसिद्धि है, ऐसा कहना उचित है, क्योंकि घटाभाव में जो वह्न्यभाव है, उसके भी घटाभावात्मक होने से घटाभाव का वह्नि भी प्रतियोगी होता है और उसके अधिकरण पर्वत आदि भी; इस प्रकार के क्रम से प्रतियोगी का व्यधिकरण अप्रसिद्ध होता है।

यदि घटाभावादि में वह्न्यभाव आदि भिन्न हैं, ऐसा कहा जाता है तब भी 'धूमाभाववान् वह्न्यभावात्' इत्यादि में अव्याप्ति होती है, क्योंकि उसमें साध्यतावच्छेदक सम्बन्ध स्वरूपसम्बन्ध है। उस सम्बन्ध से सभी प्रकार के अभाव का हेतु के अधिकरण का पूर्वक्षणवृत्तित्वविशिष्ट स्व के अभावात्मक प्रतियोगी का अधिकरणत्व हो जायेगा।

तीसरे पक्ष में ( यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्व के पक्ष में ) उक्त दोष का परिहार हो जाने पर भी 'कपिसंयोगाभाववान् आत्मत्वात्' इत्यादि में अव्याप्ति होती है। उसमें आत्मावृत्तिकपिसंयोगाभावाभाव कपिसंयोग है और उसका गुण होने से उसका प्रतियोगिता के अवच्छेदक गुणसामान्याभावत्व भी है, जो कि हेतु के अधिकरणभूत आत्मा का तदवच्छिन्न अनधिकरणत्व ही है।

मैवम्; यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्।

**आलोकः**—तृतीयं पक्षमाश्रित्य समाधत्ते—**मैवमित्यादिना**। एवं यत्प्रागुक्तं तदखिलम्। **मा** नैवोपयुक्तमिति। तत्र हेतुमाह—**यादृशेति**। **हेतुमतः** हेत्वधिकरणस्य।

**यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं** यादृशं यद्विधं प्रतियोगितावच्छेदकावच्छिन्नम् अनधिकरणत्वम्। **तादृशप्रतियोगितानवच्छेदकत्वस्य** तादृशस्य तथाविधस्य एव प्रतियोगिताया अनवच्छेदकत्वस्य। **विवक्षितत्वात्**। नोक्तदोष इति। 'कपिसंयोगाभाववान् आत्मत्वात्' इत्यादौ प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं तत्प्रतियोगितानवच्छेदकं साध्यतावच्छेदकं कपिसंयोगाभावत्वं तदवच्छिन्नसामानाधिकरण्यलक्षणनिर्वाहान्न दोष इति। अत्र हि प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं तन्निष्ठप्रतियोगिताया अनवच्छेदकः साध्यतावच्छेदकश्च धर्मः कपिसंयोगाभावत्वं तदवच्छिन्नं साध्यं कपिसंयोगाभावस्तेन सहात्मत्वहेतोः सामानाधिकरण्यमिति नो दोष इति।

**अनुवाद**—यह ठीक नहीं है। हेतु के अधिकरण में जिस प्रकार के प्रतियोगितावच्छेदकावच्छिन्न का अनधिकरणत्व है, वैसे ही प्रतियोगिता के अनधिकरण के विवक्षित होने से कोई दोष नहीं है।

ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः। हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात्।

अत्र केचित्—महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणो महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात् महाकाले महाकालभेदाभावात्।

वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्सम्बद्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्। व्यापकसामानाधिकरण्यञ्च व्याप्तिः।

यत्सम्बन्धः साध्यतावच्छेदकसम्बन्धः यद्धर्मः साध्यतावच्छेदकधर्मः, तत्र यदि यद्धर्मावच्छिन्नत्वाभावमात्रमित्युच्यते तदा समवायेन यो वह्न्यभावस्तस्य प्रतियोगितावच्छेदकसम्बन्धः समवायस्तेन प्रतियोग्यधिकरणपर्वतादिवृत्तिः, स एव, तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिः स्यात्। यदि च यत्सम्बन्धावच्छिन्नत्वाभावमात्रमित्युच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वसत्त्वादव्याप्तिः स्यादत उभयमुपात्तम्।

इत्थञ्च कालो घटवान् कालपरिमाणादित्यादौ संयोगसम्बन्धेन घटाभावप्रतियोगिनोऽपि घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावः तस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः।

धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय सामान्यपदमुपात्तम्।

**आलोकः**—सर्वलक्षणाव्याप्तिमाशङ्क्य समाधानाय प्रकरणमारभते—**नन्विति । ननु** इति जिज्ञासायाम् । 'कालो घटवान् कालपरिमाणात्' इत्यत्र कालपक्षके कालिकसम्बन्धेन घटसाध्यके कालपरिमाणहेतुके सद्धेतौ । **प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः** प्रतियोगिनो व्यधिकरणस्य योऽभावस्तस्य अप्रसिद्धिरसम्भव इति । तथा हि **हेत्वधिकरणस्य** हेतोर्हेतुभूतस्य कालपरिमाणस्याधिकरणमाश्रयः कालस्तस्य । **महाकालस्य । जगदाधारतया** जगतामाधारतयाऽऽश्रयतया । **सर्वेषाम् । एव । अभावानाम् । साध्यतावच्छेदकसम्बन्धेन** कालिकसम्बन्धेन घटत्वं साध्यता तदवच्छेदकसम्बन्धेन । **कालिकविशेषणतया** कालिकविशेषणतासम्बन्धेन **प्रतियोग्यधिकरणत्वात्** प्रतियोगिनः अधिकरणत्वादाश्रयत्वात् । न तु प्रतियोगिव्यधिकरणत्वादिति ।

**अयमाशयः**—'कालो घटवान् कालपरिमाणत्वात्' इत्यत्र कालः पक्षः कालिकसम्बन्धेन घटः साध्यं कालपरिमाणो हेतुः कालपरिमाणस्य हेतोरधिकरणं महाकालः, स च जगतामाश्रय इति सर्वस्याभावस्य प्रतियोगी ( अत्र साध्यतावच्छेदकसम्बन्धः कालिकसम्बन्धः हेतुतावच्छेदकसम्बन्धः समवायसम्बन्धः ) साध्यतावच्छेदकेन कालिकसम्बन्धेन तत्र महाकाले वर्तत इति न कोऽप्यभावः प्रतियोगितया लब्धुं शक्यः इति पूर्वपक्षः ।

तत्राऽऽह—**अत्रेति । अत्र** प्रसङ्गेऽस्मिन् । **केचित्** एकादेशीयाः । वदन्तीति शेषः । **तत्र** अनुमाने तस्मिन् । **महाकालभेदविशिष्टघटाभावः** महाकालस्य भेदेन विशिष्टो यो घटाभावः—यत्र भूतले घटो वर्तते तत्रैव स्वरूपेण महाकालभेदोऽपीति सामानाधिकरण्य( एकाधिकरणवृत्तित्व )सम्बन्धेन घटो महाकालविशिष्टो भवति, इति महाकालभेदविशिष्टो यो घटस्तस्याभावः । **प्रतियोगिव्यधिकरणः** प्रतियोगिनो व्यधिकरणोऽसमानाश्रयः । **महाकालस्य । घटाधारत्वे । अपि । महाकालभेदविशिष्टघटानाधारत्वात्** महाकालभेदविशिष्टस्य घटस्य अनाधारत्वात् **महाकाले । महाकालभेदाभावात्** महाकालभेदविरहात् ।

**अयमाशयः**—यत्र भूतले घटो वर्तते तत्रैव स्वरूपेण महाकालभेदोऽपीति एकाधिकरणवृत्तित्वसम्बन्धेन घटो महाकालभेदविशिष्टो भवति तस्य च महाकालभेदविशिष्टस्य घटस्याभावो महाकाले लभ्यते इति स भवति प्रतियोगिव्यधिकरणः । महाकालभेदविशिष्टघटाभावीया प्रतियोगिता महाकालभेदविशिष्टघटनिष्ठा प्रतियोगितावच्छेदकं महाकालभेदविशिष्टघटत्वं तदनवच्छेदकं शुद्धसाध्यतावच्छेदकं घटत्वं तदवच्छिन्नसामानाधिकरण्यं कालपरिमाणहेतोरिति दोषाभावात् इत्यन्यत्र विस्तरः ।

तत्र स्वाभीष्टसिद्धान्तमाह—**वस्तुत** इति । वस्तुतः यथार्थतः । **तु । प्रतियोगितावच्छेदकसम्बन्धेन** प्रतियोगिताया योऽवच्छेदकस्तत्सम्बन्धेन । **प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये** प्रतियोगिनः अनधिकरणीभूतो यो हेत्वधिकरणस्तद्वृत्तिस्तत्र विद्यमानो योऽभावस्तस्य प्रतियोगिसामान्ये प्रतियोगिमात्रे । **यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः** यद्धर्मत्वावच्छिन्नत्वं यद्धर्मावच्छिन्नत्वञ्चेत्येतस्योभयस्य अभावः । **तेन । । सम्बन्धेन । तद्धर्मावच्छिन्नस्य** तेन धर्मेण अवच्छिन्नस्य । **तद्धेतुव्यापकत्वं** तस्य पदार्थस्य हेतोर्व्यापकत्वम् । **बोध्यं** ज्ञेयम् । **व्याप्यस्य व्यापकसामाना-**

**धिकरण्यं** व्यापकेन ऐकाधिकरण्यम् । **व्याप्तिरिति** । **तत्र यत्सम्बन्धः** इति । **साध्यतावच्छेदकसम्बन्धः** साध्यताया अवच्छेदकसम्बन्धः । **यद्धर्मः** । इति । **साध्यतावच्छेदकधर्मः** । **तत्र** इति लक्षणे । **यदि** । **यद्धर्मावच्छिन्नाभावमात्रं** न तु यत्सम्बन्धावच्छिन्नत्वाभावोऽपि । **इति** । **उच्यते** कथ्यते । **तदा** । **समवायेन** समवायसम्बन्धेन । **यः** वह्न्यभावः हेत्वधिकरणभूते पर्वते वह्निविरहः । **तस्य** वह्न्यभावस्य । **प्रतियोगितावच्छेदकसम्बन्धः** । **समवायः** । **तेन** समवायसम्बन्धेन । **प्रतियोग्यधिकरणपर्वतादिवृत्तिः** प्रतियोग्याश्रयपर्वतादिवृत्तिकः । **सः** वह्न्यभावः । एव । **तत्प्रतियोगितावच्छेदकं** तत्प्रतियोगिता वह्नौ **तदवच्छेदकं वह्नित्वम्** । तदेव साध्यतावच्छेदकमिति लक्षणस्य **अव्याप्तिः** स्यात् । पक्षान्तरे । **यदि** । **च** । **यत्सम्बन्धावच्छिन्नत्वाभावमात्रम्** । **इति** । उच्यते । **तदा** । हेत्वधिकरणपर्वतादौ । **संयोगेन** संयोगसम्बन्धेन । **तादृशस्य** वृत्तेः । **घटाभावस्य** । **प्रतियोगितायां** प्रतियोगितामात्रे । **संयोगसम्बन्धावच्छिन्नत्वसत्त्वात्** साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नत्वभावात् । **अव्याप्तिः** । **स्यात्** । **अतः** । **उभयं** यद्धर्मावच्छिन्नत्वं यत्सम्बन्धावच्छिन्नत्वञ्च **उपात्तं** गृहीतमिति ।

**अयम्भावः**—पर्वतो वह्निमान् धूमादित्यादौ संयोगेन घटाभावः तत्र प्रतियोगिता घटनिष्ठा प्रतियोगितावच्छेदकसम्बधः संयोगः । तेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणपर्वतवृत्त्यभावप्रतियोगितासामान्ये साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकवह्नित्वधर्मावच्छिन्नत्वोभयाभावस्तेन संयोगसम्बन्धेन साध्यतावच्छेदकावच्छिन्नस्य वह्नित्वावच्छिन्नस्य वह्नेस्तद्धेतुभूतधूमव्यापकत्वमिति तत्सामानाधिकरण्यं धूमहेतोर्व्याप्तिः ।

एवं हि कालो घटवानित्यत्र च कालपरिमाणहेत्वधिकरणे महाकाले संयोगेन घटाभावो ग्राह्यः । तथा च प्रतियोगितावच्छेदकेन संयोगसम्बन्धेन घटात्मकप्रतियोग्यनधिकरणीभूतहेत्वधिकरणमहाकालवृत्तिसंयोगसम्बन्धावच्छिन्नघटाभावीयघटप्रतियोगितासामान्ये साध्यतावच्छेदककालिकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकघटत्वावच्छिन्नत्वोभयाभावः, तेन साध्यतावच्छेदकेन कालिकसम्बन्धेन साध्यतावच्छेदकघटत्वधर्मावच्छिन्नो घटस्तद्धेतुव्यापकः तत्सामानाधिकरण्यं हेतोः कालपरिमाणस्येति न दोष इति विस्तरोऽन्यत्र ।

**इत्थमिति** । **इत्थम्** एवमेव । **'कालो घटवान् कालपरिमाणात्'** इत्यादौ प्राग्वर्णितलक्षणेऽनुमाने । **संयोगसम्बन्धेन** । **घटाभावप्रतियोगिनः** । **घटस्य** । **अनधिकरणे** अनाश्रये । **हेत्वधिकरणे** हेतोः कालपरिमाणस्याधिकरणे आश्रये । **महाकाले** । **वर्तमानः** विद्यमानः । **स** । **एव** । **संयोगेन** संयोगसम्बन्धेन । **घटाभावः** । **तस्य** घटाभावस्य **प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्व-घटत्वावच्छिन्नत्वोभयाभावसत्त्वात्** कालिकसम्बन्धावच्छिन्नत्वाभावघटत्वावच्छिन्नत्वाभावद्वयसत्त्वात् । **न** । **अव्याप्तिरिति** ।

लक्षणे सामान्यपदग्रहणप्रयोजनमाह—**धूमवानिति** । **'धूमवान् वह्नेः'** इत्यादौ धूमसाध्यके वह्निहेतुके असद्धेतुस्थले । **अतिव्याप्तिवारणाय** लक्षणातिप्रसङ्गवारणाय ।

**सामान्यपदं** प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये इत्यत्र सामान्यपदम् । उपात्तं गृहीतमिति ।

**अयमाशयः**—प्रतियोगितासामान्ये इत्येतस्य स्थाने यत्किञ्चित्प्रतियोगितायामित्येव कथने उपस्थितिकृतं लाघवं स्यात् किन्तु स्याद् 'धूमवान् वह्नेः' इत्यादावतिव्याप्तिः। यत्किञ्चिच्छब्दग्राह्यघटनिष्ठप्रतियोगितायां पूर्वोक्तोभयाभावस्य प्राप्तत्वेन लक्षणं सङ्गच्छते । यावदर्थकसामान्यपदग्रहणे तु यावदन्तर्गतायाः संयोगेन धूमाभावीयप्रतियोगितायाः ग्रहणं भवति । संयोगेन धूमाभावो हेत्वधिकरणे लोहपिण्डेऽपि मिलति, किन्तु तत्र संयोगेन धूमाभावीयप्रतियोगितायामुभयाभावो नास्ति अपितु उभयमेवेत्यतो नातिव्याप्तिरिति ।

**अनुवाद**—'कालो घटवान् कालपरिमाणात्' इत्यादि में प्रतियोगी के व्यधिकरण के अभाव की अप्रसिद्धि होती है, क्योंकि हेतु के अधिकरण महाकाल का जगत् का आधार होने से सभी प्रकार के अभावों का साध्यतावच्छेदक सम्बन्ध से कालिक विशेषण के रूप में प्रतियोगी का व्यधिकरणत्व है ।

इस पर कुछ ( एकदेशीय ) कहते हैं कि उसमें महाकाल के भेद से विशिष्ट घट का अभाव ही प्रतियोगी का व्यधिकरण है । महाकाल के घट के आधार होने पर भी महाकाल के भेद से विशिष्ट घट का आधार नहीं है और महाकाल में महाकाल के भेद का अभाव होता है । वास्तव में तो प्रतियोगितावच्छेदक सम्बन्ध से प्रतियोगी के अनधिकरणीभूत हेतु के अधिकरण में विद्यमान अभाव के प्रतियोगिता मात्र में यत्सम्बन्धावच्छिन्नत्व एवं यद्धर्मावच्छिन्नत्व दोनों अभाव हों, उस सम्बन्ध से तद्धर्मावच्छिन्न का तद्धेतुव्यापकत्व जानना चाहिए । व्यापक का व्याप्य के साथ सामानाधिकरण्य ही व्याप्ति है । यत्सम्बन्ध का अर्थ साध्यतावच्छेदक सम्बन्ध है और यद्धर्म का अर्थ साध्यतावच्छेदक धर्म है । उसमें यदि यद्धर्मावच्छिन्नत्व का अभाव मात्र कहा जाय तो समवाय से जो वह्न्यभाव है, उसका प्रतियोगितावच्छेदक सम्बन्ध समवाय है, उससे प्रतियोगी के अधिकरण पर्वत आदि में विद्यमान वही है और उसका प्रतियोगितावच्छेदक वह्नित्व है, अतः अव्याप्ति है । यदि यत्सम्बन्धावच्छिन्नत्वाभाव मात्र कहा जाय तो संयोग से उस प्रकार के घटाभाव की प्रतियोगिता में संयोगसम्बन्धावच्छिन्नत्व के होने से अव्याप्ति होगी, अतः दोनों लिये गये हैं ।

इस प्रकार 'कालो घटवान् कालपरिमाणात्' इत्यादि में संयोगसम्बन्ध से घटाभावप्रतियोगी भी घट के अनधिकरण हेतु के अधिकरण महाकाल में वर्तमान वही संयोग से घटाभाव है । उसकी प्रतियोगिता में कालिकसम्बन्धावच्छिन्नत्व एवं घटत्वावच्छिन्नत्व दोनों के अभाव होने से अव्याप्ति नहीं है ।

'धूमवान् वह्नेः' इत्यादि में अतिव्याप्ति के निवारण के लिए 'सामान्य' पद का ग्रहण किया गया है ।

ननु 'प्रमेयवह्निमान् धूमात्' इत्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्ध गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न; कम्बुग्रीवादिमान्नास्तीति प्रतीत्या

कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादिति सङ्क्षेपः ॥ ६९ ॥

**आलोकः**—पूर्वोक्तलक्षणानामव्याप्तिमाशङ्क्य समाधत्ते—**नन्वित्यादिना** । **ननु** । **प्रमेयवह्निमान् धूमात् इत्यादौ** । **प्रमेयवह्नित्वावच्छिन्नत्वं** प्रमेयवह्नित्वेन अवच्छिन्नत्वम् । अप्रसिद्धमसम्भवः । **गुरुधर्मस्य** प्रमेयवह्नित्वरूपगुरुधर्मस्य । **अनवच्छेदकत्वात्** अवच्छेदकत्वाभावात् । अत्र साध्यतावच्छेदको धर्मः प्रमेयवह्नित्वमेव, किन्तु अवच्छेदकस्तु वह्नित्वरूपधर्म एव । प्रमेयवह्नित्वस्य गुरुत्वात् । एवमवच्छेदकाप्रसिद्धिनिबन्धनोऽव्याप्तिदोष इति । **इति** । **चेत्** । **न** । **कम्बुग्रीवादिमान् नास्ति** । **इति** । **प्रतीत्या कम्बुग्रीवमत्वावच्छिन्नप्रतियोगिताविषयीकरणेन** कम्बुग्रीवादिमत्वेन अवच्छिन्ना या प्रतियोगिता तस्या विषयीकरणेन । **गुरुधर्मस्य** । **अपि** । **अवच्छेदकत्वस्वीकारात्** अवच्छेदकरूपग्रहणात् । **इति** । **सङ्क्षेपः** सारमेव ।

**अयमाशयः**—'प्रमेयवह्निमान् धूमात्' इत्यादौ 'सम्भवति लघौ धर्मे गुरौ तदभावात्' इति नयेन लघुधर्मस्यैवावच्छेदकत्वस्वीकाराद् धूमाधिकरणपर्वतवृत्त्यभावप्रतियोगितासामान्ये यद्धर्मा( साध्यतावच्छेदकप्रमेयवह्नित्वा )वच्छिन्नत्वमप्रसिद्धमिति कथं लक्षणसमन्वय इति चेन्न; कम्बुग्रीवादिमान्नास्तीत्यादौ कम्बुग्रीवादिमतोऽभावः प्रतीयते, तत्र प्रतीतिबलेन प्रतियोगितायां कम्बुग्रीवादिमत्त्वावच्छिन्नत्वं मन्यते तथा च प्रतियोगितावच्छेदकं कम्बुग्रीवादिमत्त्वं मान्यमेव । प्रतीतिबलाद् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः इति नयेन गुर्वपि प्रमेयवह्नित्वं प्रतियोगितावच्छेदकं भवत्येवेति ।

**अनुवाद**—'प्रमेयवह्निमान् धूमात्' इत्यादि में प्रमेयवह्नित्वावच्छिन्नत्व अप्रसिद्ध है, क्योंकि 'गुरु धर्म अनवच्छेदक होता है' यदि ऐसा कहा जाय तो ठीक नहीं है। 'कम्बुग्रीवादिमान् नास्ति' इत्यादि की प्रतीति से कम्बुग्रीवादिमत्त्व से अवच्छिन्न प्रतियोगिता के विषयीकरण से गुरु धर्म का भी अवच्छेदकत्व स्वीकार किया गया है। यह संक्षेप में बतलाया गया ॥ ६९ ॥

**सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।**
**स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥**

पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह—सिषाधयिषेति । सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता तद्वान् पक्ष इत्यर्थः । सिषाधयिषामात्रं न पक्षता विनाऽपि सिषाधयिषां घनगर्जितेन मेघानुमानात् । अत एव साध्यसन्देहोऽपि न पक्षता विनाऽपि सन्देहं तदनुमानात् । सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव । अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम् । तथा च यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता । यत्र च सिषाधयिषाऽस्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता । यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता, सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात् ।

**आलोकः**—व्याप्यस्य पक्षवृत्तित्वधीः परामर्शः इति परामर्शलक्षणे उक्तं तत्र किं पक्षता ? इत्यपेक्षायामाह परममूले—**सिषाधयिषयेति**। यत्र सिषाधयिषया शून्या सिद्धिः न विद्यते स पक्षः तत्र वृत्तित्वज्ञानाद् अनुमितिः भवेत् इति। **यत्र** यस्मिन् पदार्थे। **सिषाधयिषया** साधयितुमिच्छा सिषाधयिषा अनुमित्सा तया। **शून्या** विरहिता। **तदभाव-विशिष्टा**। **सिद्धिः** साध्यनिश्चयः। **न**। **तिष्ठति** वर्तते। **सः** तादृशः अनुमित्सा भाव-विशिष्टसाध्यनिश्चयाभाववान्। **पक्षः** पक्षपदवाच्य इति। साध्यविशिष्टो धर्मो पक्ष इति न्यायसारकारः। सन्दिग्धसाध्यवान् पक्ष इत्यन्नम्भट्टः। **तत्र** पक्षे। हेतोः **वृत्तित्वज्ञानात्** वृत्तित्वस्य विद्यमानतायाः ज्ञानात्परामर्शात्मकादवबोधनात्। **अनुमितिः** अनुमा। **भवेत्** जायेतेति। यत्र हि पर्वतो वह्निमानिति प्रत्यक्षेण निश्चयो जायते तत्र निश्चयस्य प्रत्य-क्षात्मकत्वात् अनुमितिर्नैव भवति। सत्यपि प्रत्यक्षनिश्चये यदि कश्चित् पर्वते वह्न्यनु-मितिर्मे जायतामिति इच्छति तदा प्रत्यक्षादिनिश्चयसत्त्वेऽपि भवेदेवानुमितिः, न च भवति तत्र प्रत्यक्षादिनिश्चयो बाधकः, प्रतिबन्धिका तु सिषाधयिषाविरहविशिष्टा सिद्धिरेव।

मूले पक्षतानिरूपणे सङ्गतिप्रदर्शनपुरस्सरं कारिकाशयं विवृणोति—**पक्षेति**। **पक्ष-वृत्तित्वमित्यत्र** व्याप्यस्य पक्षवृत्तित्वधीः परामर्श इत्यत्र। **पक्षत्वं** पक्षता। **किं** किं स्वरूपम्। इत्यपेक्षायाम्। **तत्** पक्षस्वरूपम्। **आह**—**सिषाधयिषयेति**। **सिषाधयिषा-विरहविशिष्टसिद्ध्यभावः** सिषाधयिषायाः अनुमित्सायाः विरहोऽभावस्तेन विशिष्टा सम्पन्ना या सिद्धिर्निश्चयस्तस्या अभावः पक्षता। **तद्वान्** पक्षतावान्। **पक्षः** इत्यर्थ इति। तत्र प्राचामुक्तिं खण्डयति—**सिषाधयिषेति**। **सिषाधयिषामात्रम्** अनुमित्सामात्रम्। यथा केचिद् वदन्ति। **न** नैव। **पक्षता** पक्षवृत्तिधर्मः। **सिषाधयिषाम्** अनुमित्साम्। **विना**। **अपि**। **घनगर्जितेन** मेघनिर्घोषेण। **मेघानुमानात्** मेघस्यानुमितेः।

**अयमाशयः**—यदुच्यते सिषाधयिषामात्रं पक्षतेति तन्न। तथा मते 'पर्वतो वह्नि-मान्' इत्यादिस्थले लक्षणसङ्गतावपि गगनं मेघवद् घनगर्जनादित्यादावव्याप्तिः। अत्र हि सिषाधयिषाया अभावेऽपि गृहाभ्यन्तरस्थस्य पुरुषस्य मेघगर्जनतो मेघानुमितेरप्रति-हतत्वमेवेति।

साध्यसन्देहः पक्षता इति वादिनां मतमपि दूषयति—**अत** इत्यादिना। **अत एव** सिषाधयिषां विनाऽपि अनुमितेः सत्त्वादेव। **साध्यसन्देहः** साध्यस्य वह्न्यादेः सन्देहः संशयः पर्वते वह्निर्वर्तते न वेत्यादिः। **अपि** च। **न** नैव। **पक्षता** पक्षवृत्तिर्धर्मः। **सन्देहं** संशयम्। **विना**। **अपि**। **तदनुमानात्** तस्य साध्यस्यानुमानात् यथा पूर्वोदाहरणे एवेति। तत्र साध्यरूपमेघासन्देहेऽपि तदनुमानसत्त्वात्।

सिषाधयिषाविषये विशेषमाह—**सिद्धावित्यादिना**। **सिद्धौ** साध्यवत्तानिश्चये चाक्षुषप्रत्यक्षेण। **सत्यां** सम्पन्नायाम्। **अपि** च। **सिषाधयिषासत्त्वे** अनुमितिर्मे भूया-दिति अनुमित्सा सिषाधयिषा तस्याः सत्त्वे भावे। **अनुमितिरनुमा**। **भवति**। **एव**। यथा पर्वतो वह्निमान् इति चाक्षुषप्रत्यक्षे जातेऽपि यदि तत्र वह्निविषयकानुमितिर्मे जायतामिति इच्छायामुत्पन्नायां साध्यवत्तानिश्चयेनानुमितेः प्रतिबन्धेऽपि सिषाधयिषा-

जन्योत्तेजनया वह्नेरनुमितिज्ञानं भवत्येव। तेन न सिद्धिमात्रमनुमितेः प्रतिबन्धकमपितु सिषाधयिषाभावविशिष्टा सिद्धिरेव तत्प्रतिबन्धिका। अतः अस्माद्धेतोः। **सिषाधयिषाविरहविशिष्टत्वम्** अनुमित्साऽभावविशिष्टता। **सिद्धौ** साध्यनिश्चये। **विशेषणम्** इति। **तथा** एवमेव। **च**। **यत्र** साध्यविषये। **सिद्धिः** निश्चयः। **नास्ति**। **तत्र** तादृशस्थले। **सिषाधयिषायाम्** अनुमित्सायाम्। **सत्यां** वर्तमानायाम्। असत्याम् अविद्यमानायाम्। **अपि** च। **पक्षता**। **यत्र** पक्षे। **सिषाधयिषा** अनुमित्सा। अस्ति। **तत्र** तादृशस्थले। **सिद्धौ** साध्यनिश्चये। **सत्याम्**। **असत्याम्**। अपि। पक्षता। भवत्येव। पक्षान्तरे **यत्र**। **सिद्धिः** साध्यनिश्चयः। अस्ति। **सिषाधयिषा**। **च** तु। नास्ति। **तत्र** तादृशस्थले। **न**। **पक्षता** इति। तत्र **सिषाधयिषाविरहविशिष्टसिद्धेः** अनुमित्साभावविशिष्टसाध्यनिश्चयस्य। **सत्त्वाद्** भावादिति।

अत्र हि सिद्धिर्विशेष्या सिषाधयिषाविरहस्तद्विशेषणम्। विशिष्टाभावश्च त्रिविधः—विशेषणाभावप्रयुक्तः, विशेष्याभावप्रयुक्तः विशेषणविशेष्योभयाभावप्रयुक्तश्च। यत्र सिषाधयिषा सिद्धिश्चोभे तत्र सिषाधयिषाविरहरूपविशेषणाभावाद् विशेषणाभावप्रयुक्तो विशिष्टाभावः, यत्र तु सिषाधयिषा न वर्तते सिद्धिश्च नास्ति तत्र सिषाधयिषाविरहरूपविशेषणसत्त्वेऽपि सिद्धिरूपविशेष्याभावाद् विशेष्याभावप्रयुक्तो विशिष्टाभावः, यत्र तु सिषाधयिषाऽस्ति सिद्धिस्तु न तत्र सिषाधयिषाविरहरूपविशेषणसिद्धिरूपविशेष्योभयाभावाद् विशेषणविशेष्योभयाभावप्रयुक्तविशिष्टाभावः। एतेषु हि पक्षता सम्पद्यते। अनुमितौ हि पक्षता कारणम्। सा च न सिषाधयिषा तथा सति तदभावस्थले 'गगनं मेघवद् मेघगर्जनात्' इत्यादौ मेघानुमितिर्न स्यात्। न च सा साध्यसन्देहस्तथा सत्यपि तत्रैवानुमितिर्न स्यात्। सा तु सिषाधयिषाविरहविशिष्टसिद्ध्यभाव एव। पक्षतावान् पक्षः। अनुमितिज्ञाने सिषाधयिषा उत्तेजिका एवं सिषाधयिषाभावविशिष्टा सिद्धिः ( न केवला सिद्धिः ) प्रतिबन्धिका। प्रतिबन्धकसत्त्वेऽपि कार्यजनकत्वमुत्तेजकत्वं कार्यविघातकत्वं प्रतिबन्धकत्वम्।

**अनुवाद**—साधन ( अनुमान ) करने की इच्छा से शून्य सिद्धि जहाँ नहीं है, वह पक्ष कहलाता है। उसमें वृत्तित्व के ज्ञान से अनुमिति होती है।

'पक्षवृत्तित्व' में पक्षत्व क्या है? उसे कहते हैं—**सिषाधयिषयेति**। सिषाधयिषा ( साध्य को साधन करने की इच्छा ) के अभाव से विशिष्ट सिद्धि का अभाव पक्षता है और उससे ( पक्षता से ) युक्त पक्ष होता है, इसका ऐसा अर्थ है।

सिषाधयिषा मात्र पक्षता नहीं है, क्योंकि सिषाधयिषा के बिना भी बादल के गर्जन से मेघ का अनुमान होता है।

इसी कारण साध्य का संशय भी पक्षता नहीं है, क्योंकि सन्देह के बिना भी साध्य का अनुमान होता है।

सिद्धि अर्थात् साध्यनिश्चय के होने पर सिषाधयिषा के रहने पर भी अनुमिति होती है। इसी कारण सिषाधयिषा के अभाव से विशिष्ट सिद्धि में विशेषता है।

इसी तरह जहाँ सिद्धि नहीं है वहाँ सिषाधयिषा के रहने एवं न रहने पर भी पक्षता होती है। जहाँ सिषाधयिषा है वहाँ सिद्धि के रहने एवं न रहने पर भी पक्षता होती है। जहाँ सिद्धि है किन्तु सिषाधयिषा नहीं है वहाँ पक्षता नहीं होती, क्योंकि वैसे में सिषाधयिषा के विरह ( अभाव ) से विशिष्ट सिद्धि रहती है।

ननु यत्र परामर्शानन्तरं सिद्धिस्ततः सिषाधयिषा, तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः। यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेर्नाशात् प्रतिबन्धकाभावादेवानुमितिः। यत्र सिषाधयिषासिद्धिपरामर्शाः सन्ति तत्र परामर्शकाले सिषाधयिषैव नास्ति। एवमन्यत्रापि सिद्धिकाले परामर्शकाले वा न सिषाधयिषा, योग्यविभुविशेषगुणानां यौगपद्यनिषेधात्, तत्कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न, यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा, ततः सिषाधयिषा तत्र पक्षतासम्पत्तये तद्विशेषणस्यावश्यकत्वात्।

आलोकः—सिषाधयिषाया उत्तेजकत्वमाशङ्क्य समाधत्ते—**नन्विति**। **ननु**। **यत्र**। **परामर्शानन्तरं** प्रथमं परामर्शस्ततः। **सिद्धिः** साध्यनिश्चयः। **ततः** तदनन्तरम्। **सिषाधयिषा** अनुमित्सा। **तत्र** तादृशस्थले। **सिषाधयिषाकाले** अनुमित्सावसरे। **परामर्शनाशात्** परामर्शाभावात्। **न**। **अनुमितिः** अनुमा। **यत्र**। **सिद्धिपरामर्शसिषाधयिषाः** सिद्धिः साध्यनिश्चयः परामर्शः व्याप्यस्य पक्षवृत्तित्वधीः सिषाधयिषा अनुमित्सा च। **क्रमेण** एकमनु एकम्। **भवन्ति** सम्पद्यन्ते। **तत्र** तादृशस्थले। **सिषाधयिषाकाले** अनुमित्सावसरे। **सिद्धेः** साध्यनिश्चयस्य। **नाशात्** अभावात्। **प्रतिबन्धकाभावाद्** बाधकतत्त्वविरहात्। **एव** हि। **अनुमितिः** अनुमा। **यत्र** यस्मिन् स्थले। **तु**। **सिषाधयिषासिद्धिपरामर्शाः** अनुमित्सासाध्यनिश्चयपरामर्शाः। **सन्ति** सम्पद्यन्ते। **तत्र** तादृशस्थले। **परामर्शकाले** परामर्शावसरे। **सिषाधयिषा** अनुमित्सा। **एव** हि। **नास्ति** न भवति। **एवम्** इत्थम्। **अन्यत्र** स्थलान्तरे। **अपि**। **सिद्धिकाले** साध्यनिश्चयावसरे। **वा** अथवा। **परामर्शकाले**। **सिषाधयिषा** अनुमित्सा। **न** नैव भवति। **योग्यविभुविशेषगुणानां** योग्याः प्रत्यक्षयोग्याः ये विभूनां व्यापकानामात्माकाशानां विशेषगुणाः ज्ञानेच्छाशब्दादयस्तेषाम्। **यौगपद्यनिषेधाद्** यौगपद्यस्य एककालावच्छेदेनोत्पत्तेर्निषेधात् असम्भवात्। **तत्** तस्माद्धेतोः। **कथं** केन प्रकारेण। **सिषाधयिषाविरहविशिष्टत्वम्** अनुमित्साभावसंवलितत्वम्। **सिद्धेः** साध्यनिश्चयस्य। **विशेषणम्**। इति।

**अयमाशयः**—जन्यं हि ज्ञानं स्वोत्पत्तितृतीयक्षणे नश्यत्येव, यथा जन्यज्ञानस्य स्वभावः। यत्र परामर्शसिद्धिसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले परामर्शरूपकारणनाशान्नानुमितिः। यत्र च सिषाधयिषासिद्धिपरामर्शानां क्रमेण मानस्तत्र परामर्शकाले सिषाधयिषानाशात्प्रतिबन्धकसद्भावेन नानुमितिः। यत्र तु सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तत्र सिषाधयिषाकाले सिद्धेरभावात्प्रतिबन्धकाभावेन अनुमितिरिति रीत्या भवत्येव कार्यनिर्वाहः। यदि नाम सिषाधयिषादिकमेककालावच्छेदेन

भवेत्तदाऽपि सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणं सङ्गच्छेतेति किन्तु न तथा, न ह्यात्मनो विशेषगुणा इच्छाज्ञानाद्या युगपद्भवन्त्यपितु भवन्ति ते क्रमेणेति नैयायिकनयः। अतः 'सिद्धयभावः पक्षता' इत्येतावदेव वक्तुं युक्तं, न तु सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणम्।

**इति** इत्थम्। **कथ्यते चेत्**। न नैव। **यत्र** यस्मिन्स्थले। **वह्निव्याप्यधूमवान्** वह्न्यविनाभावधूमयुक्तः। **पर्वतः**। **वह्निमान्**। **इति** इत्थम्। **प्रत्यक्षं** प्रत्यक्षज्ञानम्। **स्मरणं** स्मृतिः संस्कारजन्यज्ञानम्। **वा**। **ततः** प्रत्यक्षज्ञानानन्तरं स्मरणानन्तरम्। **वा**। **सिषाधयिषा** अनुमित्सा। **तत्र** तादृशस्थले। **पक्षतासम्पत्तये** पक्षतासिद्धये। **तद्विशेषणस्य** तस्याः सिषाधयिषाविरहविशिष्टेति सिद्धेर्विशेषणस्य। **आवश्यकत्वात्** अनिवार्यत्वात्।

**अयमाशयः**—यदि हि तादृशविशेषणस्योपादानं न क्रियते एवं सिद्धिमात्रस्य प्रतिबन्धकत्वं स्वीक्रियते तदा अनुमितीष्टसाधनताविषयके वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्यादौ इष्टाऽप्यनुमितिर्न स्यात्, तत्र तथाविधायाः सिद्धेः सत्त्वात्। एतादृशस्थलेऽनुमितिस्तु निर्विवादैव। न चात्र केवलः सिद्धयभावो येनानुमितिरुद्भवेत्, किन्तु सिद्धयात्मकपरामर्शस्य विद्यमानता विशेषणग्रहणे तु सिषाधयिषाविरहविशिष्टसिद्धयभावरूपा पक्षता निराबाधेति। अतो हि तद्विशेषणमावश्यकं तथा सति सिषाधयिषाविरहविशिष्टा सिद्धिरेव प्रतिबन्धिका न सिद्धिमात्रं न च सिषाधयिषा सहकृता सिद्धिः प्रतिबन्धिकेति।

**अनुवाद**—यदि जहाँ परामर्श के वाद सिद्धि होती है और उसके वाद सिषाधयिषा, इस प्रकार के स्थान में सिषाधयिषा के अवसर में परामर्श के नाश हो जाने से ( क्योंकि प्रत्येक जन्य ज्ञान अपनी उत्पत्ति के तीसरे क्षण में नाश होता है ) अनुमिति नहीं हो पाती। जहाँ सिद्धि, परामर्श एवं सिषाधयिषा क्रम से ( एक के बाद एक ) होते हैं, वहाँ सिषाधयिषाकाल में सिद्धि का नाश होने से, प्रतिबन्धक का अभाव होने से ही अनुमिति हो पाती है। जहाँ सिषाधयिषा, सिद्धि एवं परामर्श हैं, वहाँ परामर्शकाल में सिषाधयिषा नहीं रहती। इसी तरह अन्यत्र भी सिद्धि काल में अथवा परामर्श काल में सिषाधयिषा नहीं रहती अर्थात् आत्मा आकाश आदि के जो ज्ञान, इच्छा, शब्द आदि योग्य गुण होते हैं उनका योगपद्य अर्थात् एक काल में होना निषिद्ध है, तब कैसे यह कहा जाता है कि 'सिषाधयिषा के विरह से विशिष्टत्व सिद्धि का विशेषण है'। यदि ऐसा कहा जाता है तो यह ठीक नहीं है, क्योंकि जहाँ 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' ऐसा प्रत्यक्ष का स्मरण एवं उसके बाद सिषाधयिषा होती है, वहाँ पक्षता की सिद्धि के लिए सिद्धि का वैसा विशेषण आवश्यक होता है।

अत्रेदं बोध्यम्। यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्धयभावस्तल्लिङ्गकानुमितौ पक्षता। तेन सिद्धिपरामर्शसत्त्वेऽपि यत्किञ्चिज्ज्ञानं जायतामितीच्छायामपि

नानुमितिः। वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं वह्निज्ञानं जायतामितीच्छायां तु भवत्येव। एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमियामितीच्छायामपि नानुमितिः।

**आलोकः**—सिषाधयिषाविरहविशिष्टेति विशेषणस्वरूपं निर्दिशति—**अत्रेति**। **अत्र** प्रकरणेऽस्मिन्। **इदं** वक्ष्यमाणतथ्यम्। **बोध्यं** ज्ञेयम्। **यादृशयादृशसिषाधयिषासत्त्वे** यत्प्रकारकानुमित्साभावे। **सिद्धिसत्त्वे** साध्यनिश्चयसद्भावे। **यल्लिङ्गकानुमितिः** यद्धेतुकानुमा। **तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावः** तद्विधानुमित्साभावसंवलितसिद्धेरभावः। **तल्लिङ्गकानुमितौ** तद्धेतुकानुमितौ। करणीभूता **पक्षता**। **तेन** हेतुना। **सिद्धिपरामर्शसत्त्वे** सिद्धेः साध्यनिश्चयस्य च परामर्शस्य व्याप्यस्य पक्षवृत्तित्वज्ञानस्य च **सत्त्वे** सद्भावे। **अपि च**। **यत्किञ्चिज्ज्ञानं जायतां** किमपि ज्ञानमस्तु। **इति** इत्थम्। **इच्छायां** वाञ्छायां सत्यामपि। **अपि च**। **न** नैव। **अनुमितिः**। **वह्निव्याप्यधूमवान् पर्वतो वह्निमान्**। **इति** इत्थम्। **प्रत्यक्षसत्त्वे** प्रत्यक्षज्ञाने। **प्रत्यक्षातिरिक्तं** प्रत्यक्षभिन्नम्। **ज्ञानम्** अवबोधः। **मे**। **जायतां** सम्पद्यताम्। **इति** इत्याकारायाम्। **इच्छायां** सिषाधयिषायाम्। **तु** तदतिरिक्तम्। **अनुमितिर्भवत्येव**। **एवम्** इत्थमेव। **धूमपरामर्शसत्त्वे** धूमपरामर्शस्य सत्त्वे भावे। **आलोकेन** प्रकाशेन। **वह्निम्** अग्निम्। **अनुमियाम्** अनुमितिविषयं कुर्याम्। **इति**। **इच्छायाम्**। **अपि च**। **न**। **अनुमितिः** अनुमा। इति।

**अयमाशयः**—यत्र सिद्धिः परामर्शश्च तत्र यत्किञ्चिज्ज्ञानं मे जायतामित्याकारेच्छायामपि इच्छाविरहविशिष्टसिद्ध्यभावेन अनुमितिर्भवेदेवेति चेन्न, यादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यद्धेतुकानुमितिः प्रामाणिकी तादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तद्धेतुकानुमितौ पक्षतेति न तु यस्याः कस्या अपीच्छायाः पक्षतालक्षणसङ्गतिरिति। सिषाधयिषाया आकारस्तु एतत्पक्षकैतत्साध्यैकतद्धेतुकानुमितिर्मे जायतामित्येव। अत्र अनुमितित्वं प्रकारः सिषाधयिषा च तत्प्रकारिकैव। अतः 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' इति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं मे जायतामिति प्रत्यक्षातिरिक्तत्वप्रकारकसिषाधयिषासत्त्वेऽनुमितिः। एवं यल्लिङ्गकः परामर्शस्तल्लिङ्गिका सिषाधयिषा तल्लिङ्गकानुमितौ साधिकेति धूमलिङ्गकपरामर्शालोकलिङ्गकसिषाधयिषयोः सत्त्वे तु नानुमितिरिति।

**अनुवाद**—इस प्रसङ्ग में यह जान लेना चाहिए कि जिस-जिस प्रकार की सिषाधयिषा के रहने पर सिद्धि की उपस्थिति में जिस लिङ्ग ( हेतु ) की अनुमिति होती है उस-उस प्रकार की सिषाधयिषा के अभाव से विशिष्ट सिद्धि का अभाव उस हेतुक अनुमिति में पक्षता होती है। इस कारण सिद्धि एवं परामर्श के रहने पर भी 'जो कुछ भी ज्ञान हो जाय' ऐसी इच्छा में भी अनुमिति नहीं होती। 'वह्निव्याप्यधूमवान् पर्वतो वह्निमान्' इत्यादि में प्रत्यक्ष के रहने पर प्रत्यक्ष के अतिरिक्त ज्ञान हो, ऐसी इच्छा में भी अनुमिति होती है। इसी तरह धूमपरामर्श के रहने पर आलोक के द्वारा वह्नि का अनुमान करें, ऐसी इच्छा में भी अनुमिति नहीं होती।

सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नानुमितिस्तादृशी सिद्धिर्विशेष्यैव तत्तदनुमितौ प्रतिबन्धिका वक्तव्या। तेन पर्वतस्तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः।

**आलोकः**—सिद्ध्यनुमित्योः प्रतिबध्यप्रतिबन्धकभावस्वरूपं निरूपयति—**सिषाधयिषेति। सिषाधयिषाविरहकाले** अनुमित्साभावसमये। **यादृशसिद्धिसत्त्वे** यत्प्रकारकसाध्यनिश्चयसद्भावे। **न। अनुमितिः** अनुमा। **तादृशी** तथाविधा। तद्रूपावच्छिन्ना सिद्धिः साध्यनिश्चयः। **विशेष्यैव** विशेषरूपा। पृथक्पृथगेव। **तत्तदनुमितौ** सिद्धिः तत्तत्साध्यकानुमितिव्यक्तौ। **प्रतिबन्धिका। वक्तव्या। अयम्भावः**—सिषाधयिषाऽभावक्षणे यद्रूपावच्छिन्ननिश्चयात्मकज्ञानसद्भावे नानुमा तद्रूपावच्छिन्ननिश्चयात्मकज्ञानमेव तत्तत्साध्यकानुमितौ प्रतिबन्धकं भवतीति। **तेन** हेतुना। **'पर्वतस्तेजस्वी पाषाणमयो वह्निमान्'। इति** इत्थम्। **ज्ञानसत्त्वे** धीसद्भावे। **अपि** च। **न। विरोधः** विसंवादितेति।

**अयमाशयः**—तद्विशेष्यकतत्प्रकारकानुमितिं प्रति तद्विशेष्यकतत्तत्प्रकारकसिद्धिज्ञानमेव प्रतिबन्धकं नान्यदिति 'पर्वतस्तेजस्वी, पाषाणमयो वह्निमानि'ति निश्चयात्मकज्ञानं नानुमितौ प्रतिबन्धकम्। यतो हि पर्वतो वह्निमानित्यादौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन सिद्धिज्ञानमेवानुमितेः प्रतिबन्धकम्। पर्वतस्तेजस्वी इत्यत्र तु पर्वतत्वावच्छिन्नविशेष्यतानिरूपितमपि ज्ञानं वह्नित्वावच्छिन्नप्रकारताकं 'पाषाणमयो वह्निमान्' इत्यत्र वह्नित्वावच्छिन्नप्रकारताकमपि न पर्वतत्वावच्छिन्नविशेष्यतानिरूपितमपितु पाषाणमयत्वावच्छिन्नविशेष्यतानिरूपितमिति।

**अनुवाद**—सिषाधयिषा के अभाव के क्षण में जिस प्रकार की सिद्धि के रहने पर अनुमिति नहीं होती, उसी प्रकार की सिद्धि विशेष रूप में उन-उन अनुमिति में प्रतिबन्धक होती है। इसी कारण 'पर्वतः तेजस्वी' 'पाषाणमयो वह्निमान्' इत्यादि ज्ञान होने पर भी अनुमिति का कोई विरोध नहीं है। (क्योंकि 'पर्वतो वह्निमान्' में पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारता युक्त निश्चय ही प्रतिबन्धक हो सकता है, जो कि दोनों में उससे भिन्न है। पहले में वह्नित्वावच्छिन्नप्रकारता से युक्त नहीं है और दूसरे में पर्वतत्वावच्छिन्नविशेष्यतानिरूपित नहीं है।)

परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका, पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि।

**आलोकः**—सिद्ध्यनुमित्योः प्रतिबध्यप्रतिबन्धकभावे विशेषं निरूपयति—**परन्त्विति। परन्तु** तथा सत्यपि। **पक्षतावच्छेदकसामानाधिकरण्येन** पक्षतायाः पर्वतादिनिष्ठाया अवच्छेदकं निरूपकं यत्पर्वतत्वादि तस्य सामानाधिकरण्येन तदधिकरण-

यत्किञ्चित्पर्वतवृत्तित्वेन। **साध्यसिद्धौ** साध्यस्य वह्न्यादेः सिद्धौ ज्ञाने। **अपि च**। क्वचिदेकत्र सिद्धिमनुमाय। **तदवच्छेदेन** तस्य पर्वतत्वस्यावच्छेदेन पक्षतावच्छेदकावच्छेदेनेति। यावत्पर्वतानुद्दिश्य सर्वेषु पर्वतेषु वह्निमत्त्वस्य। **अनुमितिदर्शनात्** अनुमालाभात्। **पक्षतावच्छेदकावच्छेदेन** पर्वतत्वावच्छेदेन यावत्पर्वतवृत्तित्वेनेति। **अनुमितिम्** अनुमाम्। **प्रति**। **पक्षतावच्छेदकावच्छेदेन** पर्वतत्वावच्छेदेन यावत्पर्वतवृत्तित्वेन। **साध्यसिद्धिः** साध्यनिर्णयः। **एव हि**। **प्रतिबन्धिका** निरोधिका। **पक्षतावच्छेदकसामानाधिकरण्येन** यत्किञ्चित्पर्वतवृत्तित्वेन। **अनुमितिम्**। **प्रति**। **तु** तद्विपरीतम्। **सिद्धिमात्रं** पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन सिद्धिरेव। **विरोधि** प्रतिबन्धकमिति।

**अयमाशयः**—अनुमितिर्द्विधा—पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च। तत्र पक्षतावच्छेदकावच्छेदेन याऽनुमितिस्तां प्रति पक्षतावच्छेदकावच्छेदेन साध्यासिद्धिः प्रतिबन्धिका, किन्तु पक्षतावच्छेदकसामानाधिकरण्येन याऽनुमितिस्तां प्रति पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च साध्यसिद्धिः प्रतिबन्धिका भवतीति।

**अनुवाद**—परन्तु पक्षतावच्छेदक ( पर्वतत्व ) सामानाधिकरण्य से साध्य की सिद्धि होने पर भी पक्षतावच्छेदक के अवच्छेद से अनुमिति पाई जाती है, अतः पक्षतावच्छेदकावच्छेद से अनुमिति के प्रति पक्षतावच्छेदकावच्छेद से साध्य की सिद्धि प्रतिबन्धक होती है और पक्षतावच्छेदकसामानाधिकरण्य से होने वाली अनुमिति के प्रति तो सिद्धि मात्र विरोधी होती है।

इदन्तु वोध्यम्। यत्रायं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञानं तत्रासत्यामनुमित्सायां पुरुषस्य प्रत्यक्षं भवति न त्वनुमितिरतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत्स्वातन्त्र्येण प्रतिबन्धिका।

एवं परामर्शानन्तरं विनाऽपि प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका ॥ ७० ॥

**आलोकः**—ननु पुरुषोऽयं न वेति संशयोत्तरं पुरुषत्वव्याप्यकरादिमानयमिति विशेषदर्शने पुरुषत्वविधेयकानुमितिः कथं न जायते, पुरुषत्वप्रत्यक्षसामग्र्या इव पुरुषत्वानुमितिसामग्र्या अपि सत्त्वादित्यत आह—**इदमित्यादिना**। **इदं** वक्ष्यमाणतथ्यम्। **तु**। **बोध्यम्** अवधेयम्। **यत्र**। **अयं पुरुषो न वा** पुरुषत्ववान् तदभाववान् वा। **इति** इत्थम्। **संशयानन्तरं** सन्देहे समुत्पन्ने, ततश्च सम्यक् चक्षुः सम्प्रयोगेण। **अयम्** एषः। **पुरुषत्वव्याप्यकरादिमान्** पुरुषत्वव्याप्यहस्तचरणादियुक्तः। **इति** इत्थम्। **ज्ञानम्** अवबोधः। **तत्र** तादृशस्थले। **अनुमित्सायाम्** अनुमानेच्छायाम्। **असत्याम्** अविद्यमानायाम्। **पुरुषस्य**। **प्रत्यक्षं** प्रत्यक्षात्मकमेव ज्ञानम्। **भवति**। **न**। **तु**। **अनुमितिः** अनुमा। ( सत्यां त्वनुमित्सायां प्रत्यक्षं प्रबाध्य भवत्येवानुमितिः। ) **अतः** हेतोरस्मात्।

**अनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री** अनुमित्साविरहेण अनुमानेच्छाभावेन विशिष्टा संवलिता समानविषया उभयत्रान्यूनातिरिक्तविषया यद्विषयकानुमितिसामग्री तद्विषयिणीति परामर्शस्य ये विषयाः पुरुषत्वं तद्व्याप्यकरादयः पुरुषश्चेति त एव विषया विषया यस्यास्तादृशी चक्षुःसंयोगादिरूपा प्रत्यक्षसामग्री । **कामिनीजिज्ञासाविवत्** यथा स्त्रीकामिनः कामिनीविषयकजिज्ञासा सकलज्ञानप्रतिबन्धिका तथा । **स्वातन्त्र्येण** पक्षताकुक्षौ निवेशं विनैव । **अनुमितिं प्रति । प्रतिबन्धिका** निरोधिका । भवतीति । यथा हि कामिनो रमणीसङ्गमेच्छा इच्छान्तरस्य स्वभावेनैव प्रतिबन्धिका, तथैव अनुमित्साविरहविशिष्टा समानविषयाऽपि प्रत्यक्षसामग्री अनुमितिं प्रति स्वभावेनैव प्रतिबन्धिकेति । **एवम्** इत्थमेव । **परामर्शानन्तरं** 'वह्निव्याप्यधूमवान् अयं पर्वतः' इति परामर्शानन्तरम् । **प्रत्यक्षेच्छां** प्रत्यक्षज्ञानं मे जायतामितीच्छाम् । **विना** । अपि । **पक्षादेः** पक्षादिपक्षविषयस्य । **प्रत्यक्षानुत्पत्तेः** प्रत्यक्षज्ञानासम्भवात् । **प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री** प्रत्यक्षेच्छाशून्यसंवलितानुमासामग्री । **भिन्नविषयकप्रत्यक्षे** परामर्शस्य ये विषयाः वह्नितद्व्याप्यधूमपर्वतास्तेभ्यो भिन्नो न्यूनोऽतिरिक्तो वा पर्वत एव विषयो यस्य एतादृशप्रमात्मकप्रत्यक्षे । **प्रतिबन्धिका** । इति अर्थात् अनुमितिभिन्नविषयके प्रत्यक्षे प्रत्यक्षेच्छाभावविशिष्टानुमितिसामग्री प्रतिबन्धिका भवतीति ॥ ७० ॥

**अनुवाद**—यह तो समझ लेना चाहिए। जहाँ 'यह पुरुष है या नहीं' इस प्रकार के संशय के बाद यह पुरुषत्वव्याप्य हस्त आदि से युक्त है, ऐसा ज्ञान होता है वहाँ अनुमित्सा के न रहने पर पुरुष का प्रत्यक्ष होता है, न कि अनुमिति का। इस कारण अनुमित्सा के अभाव से विशिष्ट समान विषय वाली भी प्रत्यक्षसामग्री रमणीजिज्ञासा की तरह स्वतन्त्र रूप से ( पक्षता-कुक्षि में आये बिना ही ) प्रतिबन्धक होती है। ( अनुमित्सा के रहने पर तो वैसे में प्रत्यक्ष को बाँध कर अनुमिति ही होती है। ) इसी प्रकार परामर्श के बाद प्रत्यक्षेच्छा के बिना भी पक्षादि के प्रत्यक्ष की उत्पत्ति न होने से प्रत्यक्षेच्छा के विरह से विशिष्ट अनुमिति की सामग्री अनुमिति से भिन्न विषय वाले प्रत्यक्ष में प्रतिबन्धक होती है ॥ ७० ॥

**अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।**
**कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ ७१ ॥**

हेतुप्रसङ्गाद्धेत्वाभासान् विभजते—अनैकान्त इति । तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् । तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः । यद्विषयकत्वञ्च यादृशविशिष्टविषयकत्वं बोध्यम् । तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि न क्षतिः । तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वान्न हेतुदोषः ।

**आलोकः**—अथ प्रसङ्गानुरोधेन हेत्वाभासानाह परममूले—**अनैकान्त** इति । अनैकान्तः विरुद्धः च अप्रसिद्धः प्रतिपक्षितः अपि कालात्ययापदिष्टः च हेत्वाभासाः तु

पञ्चधा इति । **अनैकान्तः** एकः साध्यमेव अन्तः नियामको यस्य एकान्तः साध्यनिरूपित-व्याप्तिमान् तत्सम्बद्ध ऐकान्तः न ऐकान्तः अनैकान्तः साध्यनिरूपितव्याप्तिशून्यः साध्य-निरूपितव्याप्तिग्रहप्रतिबन्धकग्रहविषयविशिष्ट इति । तेन व्यभिचारीति । स त्रिविधः—साधारणोऽसाधारणोऽनुपसंहारी च । तत्र साध्याभाववद्वृत्तिः साधारणः, यथा पर्वतो वह्निमान् प्रमेयत्वादित्यादौ प्रमेयत्वस्य वह्न्यभाव वति ह्रदादावपि विद्यमानत्वात् । सर्वसमक्षविपक्षव्यावृत्तोऽसाधारणः, यथा शब्दो नित्यः शब्दत्वादित्यादौ शब्दत्वस्य सर्वविधनित्यानित्यव्यावृत्तिपुरस्सरं शब्दमात्रवृत्तित्वात् । अन्वयव्यतिरेकदृष्टान्तरहितो-ऽनुपसंहारी, यथा सर्वमनित्यं प्रमेयत्वादित्यादौ सर्वस्यैव प्रमेयत्वेन पक्षत्वाद् दृष्टान्ता-भावात् । **विरुद्धः** साध्याभावव्याप्तत्वं विरोधः तद्वान् विरुद्धः साध्याभावव्याप्यः । यथा शब्दो नित्यः कृतकत्वादित्यादौ कृतकत्वस्य नित्यत्वाभावेनानित्यत्वेन व्याप्तत्वात् । **असिद्धः** प्रमात्मकसिद्ध्यविषयः आश्रयासिद्धाद्यन्यतमत्वमसिद्धत्वम् । सोऽपि त्रिविधः—आश्रयस्वरूपव्याप्यत्वासिद्धभेदात् । आद्यो यथा 'गगनारविन्दं सुरभि अरविन्दत्वा-दि'त्यादौ आश्रयस्य गगनारविन्दस्यासिद्धिरभावात् । शब्दो गुणश्चाक्षुषत्वादित्यादौ स्वरूपासिद्धत्वं शब्दे श्रावणत्वेन चाक्षुषत्वाभावात् । अपरस्तु सोपाधिकः, उपाधिस्तु व्यापकत्वे सति साधनाव्यापकः । **प्रतिपक्षितः** प्रतिपक्षः सञ्जातोऽस्येति । स एव सत्प्रतिपक्षः सन् विद्यमानः प्रतिपक्षो यस्येति सन्निति स्वसाध्यस्याभावसाधकत्वेन वर्तमानः प्रतिपक्षः शत्रुरूपो हेतुर्यस्येति । साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रति-पक्षः । अयमेव प्रकरणसमोऽपि । यथा शब्दोऽनित्यः कार्यत्वाद् घटवदिति । **कालात्य-यापदिष्टः** यस्मिन् काले पक्षे साध्यं वर्तते स साध्यस्य कालः, यस्मिन् काले साध्यं नोत्पन्नं नष्टं वा स साध्यकालस्य अत्ययः, साध्यस्य कालेऽत्यये सति अपदिष्टः प्रयुक्तः कालात्ययापदिष्टः, स एव बाधितो यस्य साध्याभावः प्रमाणान्तरेण निश्चितः । यथा उत्पत्तिकालीनघटो गन्धवान् पृथिवीत्वात् इत्यादौ वह्निरनुष्णो द्रव्यत्वादित्यादौ वा । **च** इति । **हेत्वाभासाः** हेतुवदाभासन्त इति हेत्वाभासाः असद्धेतवः । उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वाद्धेतुवदाभासते इति हेत्वाभासस्य रहस्यम् । अहेतुर्दुष्ट-हेतुर्वा हेत्वाभासः । **पञ्चधा** पञ्चविधाः भवन्तीति ।

सङ्गतिनिर्देशपुरस्सरं कारिकाशयं विवृणोति—**हेत्विति** । **हेतुप्रसङ्गात्** हेतोः सद्धेतोः प्रसङ्गात्सङ्गतितः असद्धेतोरपि हेतुनिष्ठव्याप्तिपक्षधर्मताविरहवत्वसम्बन्धेन स्मरणात् स्मृतस्य चोपेक्षानर्हत्वात् । **हेत्वाभासान्** सद्धेतवो व्याप्त्यादिविशिष्टहेतवस्ते च केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकिभेदात्मकाः तत्रान्वयमात्रव्याप्तिकः केवलान्वयी, यथा 'घटोऽभिधेयः प्रमेयत्वात्' इत्यादौ सर्वस्य प्रमेयत्वादभिधेयत्वाच्च प्रमेयत्वाभिधेयत्वयोर्न व्यतिरेकव्याप्तिः । व्यतिरेकमात्रव्याप्तिकः केवलव्यतिरेकी, यथा 'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्' इत्यादौ यद्गन्धवत्तदितरभिन्नमिति नान्वय-दृष्टान्तः, पृथिवीमात्रस्य पक्षत्वात् । यत्रान्वयव्यतिरेकाभ्यामेव व्याप्तिमान् सोऽन्वय-व्यतिरेकी । यथा 'यत्र वह्निस्तत्र धूमो यथा महानस' इति अन्वयव्याप्तिः, यत्र 'वह्नि-र्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद' इति व्यतिरेकव्याप्तिः । तेषामाभासाः दोषाः

कतिपयरूपोपपन्नत्वात्तथा प्रतीतिमन्तः तान् । दोषाश्च व्यभिचार-विरोध-सत्प्रतिपक्ष-
असिद्धि-बाधाः तैर्विशिष्टा हेत्वाभासा इति तेऽपि पञ्चैव—सव्यभिचारी (अनैकान्तिकः)
विरुद्धः, सत्प्रतिपक्षः, असिद्धः बाधितश्चेति । **विभजते** विभागशो वक्ति । अनैकान्त
इति । लक्षणात्मकसाधारणधर्मे ज्ञाते एव विशेषे जिज्ञासा भवतीत्यतो दोषसामान्यलक्षण-
माह—**तदिति । तल्लक्षणं** तस्य हेत्वाभाससामान्यस्य लक्षणं स्वरूपम् । **तु** हि । **यद्विषय-
कत्वेन** यद्विषयसम्बद्धत्वेन, अत्र तृतीयार्थोऽवच्छिन्नत्वमिति तेन यद्विषयकत्वावच्छिन्न-
मिति । **ज्ञानस्य** । अत्र षष्ठ्यर्थो वर्तमानत्वम् । **अनुमितिविरोधित्वम्** अनुमिति 'पर्वतो
वह्निमान्' इत्याद्यनुमां प्रति विरोधित्वं प्रतिबन्धकत्वम् । **तत्त्वं** दोषत्वमिति । यद्विषयकं
ज्ञानमनुमितिप्रतिबन्धकं तत्त्वं दोषत्वमिति । अथवा यद्विषयकत्वावच्छिन्ना ज्ञाननिष्ठा
अनुमितिप्रतिबन्धकता तत्त्वं हेत्वाभासत्वमिति । यथा 'पर्वतो वह्निमान् प्रमेयत्वात्'
इत्यादौ प्रमेयत्वहेतोर्व्यभिचारित्वज्ञानस्य 'पर्वतो वह्निमान्' इत्यनुमितिम्प्रति प्रति-
बन्धकत्वमेव हेत्वाभासत्वमिति । तदेव स्पष्टीकरोति—**तथा** हीति । **तथा** हि । **व्यभि-
चारादिविषयकत्वेन** व्यभिचारोऽनैकान्तता आदिपदाद् विरोधासिद्धिसत्प्रतिपक्षबाधादीनां
ग्रहणं तद्विषयकत्वेन । व्यभिचारादिदोषान्यतमविषयकत्वावच्छिन्नस्येति । **ज्ञानस्य**।
**अनुमितिविरोधित्वात्** अनुमा-तत्करणान्यतरप्रतिबन्धकत्वात् । **ते** अनैकान्तादिहेत्वा-
भासादयः । **दोषाः** दुष्टहेतवः अहेतवो वा । **यद्विषयकत्वं** दोषलक्षणे यद्विषयकत्वेनेति
पदे यद्विषयकत्वम् । **च** हि । **यादृशविशिष्टविषयकत्वं** यद्रूपावच्छिन्नविषयकत्वम् । तेन
यद्रूपावच्छिन्नदोषनिष्ठविषयतानिरूपितविषयित्वग्रहणेन यः पक्षः साध्याभावविशिष्टो
भवति तादृशबाधस्यैव ग्रहणात् । **बाधभ्रमस्य** पक्षविशेष्यकसाध्याभावप्रकारकबाध-
भ्रमस्य । **अनुमितिविरोधित्वे** अनुमानिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावत्त्वे । **अपि
च । न । क्षतिः** साध्याभाववत्पक्षस्य दोषत्वापत्त्या हेतोर्दुष्टत्वापत्तिरिति । तत्र पक्ष-
विशेष्यकसाध्याभावप्रकारकभ्रमस्थले । **पर्वतो वह्न्यभाववान् इति । विशिष्टस्य**
साध्याभावविशिष्टपक्षस्य अर्थाद् वह्न्यभावविशिष्टपर्वतस्य । **अप्रसिद्धत्वात्** यादृश-
विशिष्टविषयकपदेन बाधभ्रमस्य ग्रहीतुमशक्यत्वात् । **न । हेतुदोषः** हेतोर्दुष्टत्वं नेति ।
यावत्कालं भ्रमस्तावदनुमितिप्रतिबन्धमात्रं, नष्टे तु भ्रमे तद्भाव एवेत्याशयः ।

**अयम्भावः**—यद्यपि सव्यभिचारदोषो व्याप्तिज्ञानप्रतिबन्धकः, एवं विरोधदोषः
परामर्शस्य, तथैवासिद्धिरपि न त्वनुमितेस्तथापि अनुमितिपदस्यात्राजहत्स्वार्थलक्षणया
अनुमितितत्कारणान्यतरपरकत्वेन ग्रहणान्न दोषः । तथा च यद्विषयकत्वेनेति व्यभि-
चारादिविषयकत्वेन वह्निर्धूमव्यभिचारी इत्यादि ज्ञानस्यानुमितिप्रतिबन्धकताऽस्ति तेन
व्यभिचारादयो दोषाः । लक्षणघटकस्य यद्विषयकपदस्य यादृशविशिष्टविषयकमित्यर्थः,
तच्च यद्रूपावच्छिन्नविषयकमिति । एवं च 'पर्वतो वह्निमान्' इत्यादिसद्धेतुस्थले नाति-
व्याप्तिः । यद्यपि वह्न्यभावप्रकारकपर्वतविशेष्यकत्वेन 'पर्वतो वह्न्यभाववान्' इत्या-
कारकज्ञानस्य 'पर्वतो वह्निमान्' इत्याकारकानुमितिं प्रति विरोधिताऽस्ति, तस्मात्तद्विषये
वह्न्यभावादावतिव्याप्तिः समागता, तथापि यद्विषयकपदस्य यादृशविशिष्टविषयकार्थ-
ग्रहणेन प्रकृते वह्न्यभावविशिष्टपर्वतस्य ग्रहणात्तस्य चाप्रसिद्धत्वान्नास्त्यतिव्याप्तिः ।

बाधस्तु पक्षे वास्तवरीत्या साध्याभावसत्त्वे एव नेतरत्र, प्रकृते तु पक्षे साध्याभावस्य भ्रम एवास्ति। भ्रमस्तु यावत्कालं तिष्ठति तावत्कालमेव प्रतिबन्धको भवति, नष्टे तु भ्रमेऽनुमितिर्भवत्येव। अतः प्रकृतहेतुर्नैव दुष्ट इति।

**अनुवाद**—अनैकान्त, विरुद्ध, असिद्ध, प्रतिपक्षित एवं कालात्ययापदिष्ट—इस प्रकार हेत्वाभास पाँच प्रकार के होते हैं। ( जो केवल हेतु जैसे लगते हैं, लेकिन हेतु नहीं होते, वे हेत्वाभास हैं। )

हेतु के प्रसङ्ग से हेत्वाभासों का विभाग करते हैं—**अनैकान्त** इति। उसका लक्षण तो जिस विषयक के रूप में ज्ञान का अनुमिति का विरोधित्व है, वही होना है। जैसे कि व्यभिचार आदि ( व्यभिचार, विरोध, असिद्धि, सत्प्रतिपक्ष, बाधा ) विषयक के रूप में ज्ञान का अनुमिति का प्रतिबन्धक होने से ये व्यभिचार आदि दोष हैं। यद्विषयकत्व अर्थात् जिस विषयक के रूप में भी जिस रूप से विशिष्ट विषयक होना है, इस कारण बाधभ्रम के अनुमितिविरोधित्व में भी कोई हानि नहीं है, अर्थात् कोई हेतु दुष्ट नहीं होता। उसमें 'पर्वतो वह्न्यभाववान्' ऐसे विशिष्ट की अप्रसिद्धि होने से हेतुदोष नहीं होता।

न च वह्न्यभावव्याप्यपाषाणमयत्वान् पर्वत इति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात्, तत्र वह्न्यभावव्याप्यवान् पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यमिष्टापत्तेः। अन्यथा बाधस्यानित्यदोषत्वापत्तेः तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वं, भ्रमादनुमितिप्रतिबन्धकमात्रं, हेतुस्तु न दुष्टः। इत्थञ्च साध्याभाववद्वृत्तिहेत्वादिकं दोषः, तद्वत्त्वञ्च हेतौ येन केनापि सम्बन्धेनेति नव्याः।

**आलोकः**—सत्प्रतिपक्षस्यानित्यदोषत्वमाशङ्क्य समाधत्ते—**न चेति**। न नैव। **च** हि। **वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वतः**। **इति**। **परामर्शकाले** ज्ञानावसरे सत्प्रतिपक्षभ्रमदशायामिति। **वह्निव्याप्यधूमस्य** सद्धेतोः। **आभासत्वं** दोषत्वं सत्प्रतिपक्षत्वम्। **न**। **स्यात्**। **वह्न्यभावव्याप्यवान् पक्षः इति**। **विशिष्टस्य** पाषाणमयत्वे वह्न्यभावव्याप्यताविशिष्टत्वस्य। **अप्रसिद्धत्वात्** तदाश्रयदोषस्याप्यप्रसिद्धत्वमिति। **इति**। **वाच्यम्**। **इष्टापत्तेः** सद्धेतूनां प्रतिपरामर्शभ्रमेऽपि दुष्टत्वापत्तेस्तथाविधस्थले दोषत्वागमनमिष्टमेवेति।

**अयमाशयः**—यत्र पर्वतो वह्निमान् धूमादित्यत्र धूमहेतुना वह्निव्याप्यधूमवान् पर्वत इति परामर्शो जातस्तत्रैव तदानीमेव वह्न्यभावपाषाणमयत्ववान् पर्वत इति परामर्शभ्रमो जातः। तत्र परामर्शभ्रमात्मकसत्प्रतिपक्षेण प्रथमपरामर्शविषयहेतोर्धूमस्य यत्सत्प्रतिपक्षत्वं युक्तं तन्न स्यात्, यादृशविशिष्टविषयकत्वार्थग्रहणे पाषाणमयत्वे वह्न्यभावव्याप्यताविशिष्टवत्त्वस्याप्रसिद्धत्वात्तदाश्रयदोषस्याप्यप्रसिद्धेरिति अर्थात् पाषाणमयत्वहेतोर्वह्न्यभावनिरूपिता व्याप्यता नास्ति ततो धूमो हेत्वाभासो नैव भवितुमुचित इति चेदुच्यते तदिष्टमेव नः। विरोधिहेतुसत्त्वेऽपि धूमादिसद्धेतुषु न हेत्वाभासव्यवहार इति।

अतथास्वीकारे दोषमाह—अन्यथेति। अन्यथा तादृशस्थले अनिष्टापत्तौ। प्रतिबन्धकीभूतभ्रमविषयस्यापि दोषत्वेन स्वीकारे। बाधस्य बाधदोषस्य। पक्षे साध्याभावस्य भ्रमेण पर्वतो वह्न्यभाववानिति बाधस्यापि। अनित्यदोषत्वापत्तेः अविशिष्टस्थलेऽपि सद्धेतौ अयं बाधित इति व्यवहारप्रवर्तकत्वापत्तेरिति। यद्वा वह्निव्याप्यधूमस्याप्याभासत्वस्वीकारे बाधोऽप्यनित्यदोषः स्यात्कादाचित्कत्वेनेति। तस्माद् बाधस्यानित्यदोषत्वापत्तिर्न स्यादिति। तत्र धूमात्मकसद्धेतुस्थले। वह्न्यभावव्याप्यपाषाणमयत्ववान्। इति इत्थम्। परामर्शकाले ज्ञानावसरे। द्वितीयक्षणे इति। वह्निव्याप्यधूमस्य सद्धेतोः। न। आभासत्वं दुष्टत्वम्। किन्तु भ्रमाद् वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शभ्रमात्। अनुमितिप्रतिबन्धमात्रं पर्वतो वह्निमानिति अनुमाप्रतिबन्धमात्रम्। हेतुः। तु। न दुष्टः सत्प्रतिपक्षित इति प्रतिपरामर्शभ्रमनाशे सति अनुमितेरुत्पत्तेरिति। अतो हि पक्षे साध्याभावस्य भ्रमेण हेतुर्न दुष्यति। इत्थं यादृशविशिष्टविषयकत्वेन ज्ञानस्य प्रतिबन्धकत्वं तादृशविशिष्टस्य दोषत्वमिति स्वीकारेण। च हि। साध्याभाववद्वृत्तिहेत्वादिकं साध्यस्य अभावो यत्र साध्याभाववान् पक्षः, तत्र साध्याभाववति वृत्तिर्निष्ठा यस्य तादृशो यो हेतुः आदिपदात् साध्याभावविशिष्टः पक्षोऽपि। दोषः व्यभिचारदोषः। तद्वत्त्वं हेतौ तादृशविशिष्टदोषवत्त्वम्। च। येन केनाऽपि सम्बन्धेन यत्र यः सम्बन्धः प्रसिद्ध्यति तेन सम्बन्धेन। इति। नव्याः आधुनिकाः।

अस्यायमाशयः—एतादृशदोषवत्ता हि व्यभिचारादिस्थले तादात्म्यसम्बन्धेन बाधादिस्थले साध्याभाववान् पक्षो हेतुश्चेतिप्रकारकैकज्ञानविषयत्वेन सम्बन्धेन ज्ञेयेति नव्यनैयायिकानां मतं, तन्मते हेतुवदाभासन्त इति हेत्वाभासाः इति हेत्वाभासपदं दुष्टहेतुपरमेवेति विस्तरोऽन्यत्र।

अनुवाद—न तो 'वह्न्यभावव्याप्यपाषाणमयत्ववान्' ऐसे परामर्शकाल में वह्नि से व्याप्य धूम का आभासत्व ( दोषत्व ) न होगा, क्योंकि उसमें 'वह्न्यभावव्याप्ययुक्त पक्ष' ऐसे विशिष्ट की प्रसिद्धि नहीं है, ऐसा कहना उचित है। अर्थात् यद्विषयकत्व का अर्थ यादृशविशिष्टविषयकत्व करने पर 'पर्वतो वह्निमान् धूमात्' ऐसे ज्ञान के साथ-साथ 'वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत' ऐसा भ्रमात्मक ज्ञान होने पर बाध के रहते हुए भी वह्निव्याप्य धूम का आभासत्व न होगा, क्योंकि 'वह्न्यभावव्याप्यवान् पक्ष' ऐसा प्रसिद्ध नहीं है। क्योंकि यह तो अभीष्ट ही है। अर्थात् वैसे में हेतु की सत्प्रतिपक्षता अभीष्ट भी नहीं है। वैसा होने पर तो बाध में भी अनित्य दोष आ जायेगा। इस कारण उसमें 'वह्न्यभावव्याप्यपाषाणमयत्ववान्' ऐसे परामर्श काल में वह्निव्याप्य धूम का दुष्टत्व नहीं होता। उसमें केवल भ्रम से अनुमिति की प्रतिबन्धकता होती है, हेतु तो दुष्ट नहीं होता। इस प्रकार साध्याभाव से युक्त में वृत्ति वाले हेतु एवं साध्याभावविशिष्ट पक्ष भी दुष्ट होता है और दोष से युक्त होना भी हेतु में जिस किसी सम्बन्ध से हेतु में दोष का रहना ही है, ऐसा नव्यनैयायिक मानते हैं।

परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम्। सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा। तद्वत्त्वञ्च हेतोर्ज्ञानरूपसम्बन्धेन।

न चैवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात्सद्धेतोरपि बाधितत्वापत्तिरिति वाच्यं, तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात्। अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्। तत्र बाधित इति व्यवहाराभावादित्याहुः। अनुमितिविरोधित्वञ्च अनुमितितत्करणान्यतरविरोधित्वं, तेन व्यभिचारिणि नाव्याप्तिः। दोषज्ञानञ्च यद्धेतुविषयकं तद्धेतुकानुमितौ प्रतिबन्धकम्। तेनैकहेतौ व्यभिचारग्रहे हेत्वन्तरेणानुमित्युत्पत्तेस्तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेऽपि न क्षतिरिति सङ्क्षेपः। यादृशपक्षसाध्यहेतौ यावन्तो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वम्। पञ्चत्वकथनं तु तत्सम्भवस्थलाभिप्रायेण।

**आलोकः**—सत्प्रतिपक्षस्यानित्यदोषत्ववादिनां प्राचां मतमुद्धरति—**परे त्विति।** **परे** अन्ये सत्प्रतिपक्षस्यानित्यदोषत्ववादिनः। **तु** तद्विलक्षणम्। यन्मते हेतुवदाभासन्त इति हेत्वाभासा इति हेत्वाभासपदं व्यभिचारादिदोषपरं दोषवत्ता च सर्वत्रैव एकज्ञानविषयत्वसम्बन्धेनेति ते हि। अस्य आहुरित्यनेन सम्बन्धः। **यद्विषयकत्वेन** यद्विषयसम्बद्धत्वेन। **ज्ञानस्य। अनुमितिविरोधित्वम्** अनुमाप्रतिबन्धकत्वम्। **तद्वत्त्वं** तद्युक्तत्वम्। **हेत्वाभासत्वम्** इति। यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद् दोषत्वं तादृशदोषवत्त्वं हेत्वाभासत्वमिति अर्थाद् व्यभिचारादिदोषवत्सु हेतुषु साध्यव्याप्त्यभाववान् पक्षो हेतुश्चेत्याकारकैकज्ञानविषयत्वसम्बन्धेन हेत्वाभासपदव्यवहार इति। **सत्प्रतिपक्षे** सत्प्रतिपक्षादिस्थले। **विरोधिव्याप्त्यादिकं** साध्याभावव्याप्तिविरोधिपरामर्शो वा। **तथा** दोष इति। **एव** इति एवकारेण तादृशव्याप्तिविशिष्टहेतोः क्वचित्तादृशदोषविशिष्टपक्षस्य चाप्रसिद्धत्वेऽपि न क्षतिः एकदेशस्यापि दोषत्वे बाधकाभावात् सत्प्रतिपक्षस्यानित्यदोषत्वात् तत्र धूमे दुष्टत्वस्येष्टत्वादित्यर्थः। **तद्वत्त्वं** दोषवत्त्वम्। **च** तु। **हेतोः। ज्ञानरूपसम्बन्धेन** स्वविषयकज्ञानविषयप्रकृतहेतुनावच्छेदकत्वसम्बन्धेन। **न** नैव। **च** हि। **एवं** लक्षणे यादृशविशिष्टविषयकत्वस्याग्रहणेन स्वरूपसम्बन्धरूपावच्छेदकतायाः प्रवेशे एकज्ञानविषयत्वसम्बन्धेन च दोषवत्तास्वीकारे। **'वह्निमान् धूमात्' इत्यादौ** पर्वते वह्निसत्त्वेऽपि कस्यचिज्जायमानस्य **पक्षे** पर्वतादौ। **बाधभ्रमस्य** वह्न्यभाववान् पर्वत इति बाधभ्रमस्य। **साध्याभावविषयकत्वेन** साध्योऽत्र वह्निस्तदभावविषयकत्वेन। **अनुमितिविरोधित्वात्** पर्वतो वह्निमानित्यनुमाप्रतिबन्धकतया। **ज्ञानरूपसम्बन्धेन** भ्रमात्मकैकज्ञानविषयत्वसम्बन्धेन। **तद्वत्त्वस्य** वह्न्यभाववत्त्वस्य। **अपि च। सत्त्वाद्** भावात्। **सद्धेतोः** धूमस्य। **अपि च। बाधितत्वापत्तिः** बाधितत्वम्। **इति** इत्थम्। **वाच्यं** कथनीयम्। **तत्र** बाधकालीनधूमादिसद्धेतौ। **ज्ञानस्य** स्वविषयकज्ञानविषयप्रकृतहेतुतावच्छेदकत्वात्मकस्य। **सम्बन्धत्वाकल्पनात्** सम्बन्धकताकल्पनाभावात्। **अत्र** प्रतिपरामर्शकालीनधूमादिसद्धेतौ। **सत्प्रतिपक्षित** अयं हेतुः सत्प्रतिपक्षितः। **इति** इत्थम्। **व्यवहारेण** अनुभवसत्त्वेन। **तत्कल्पनात्** तस्य हेतोः कल्पनात् अर्थाद् व्यवहारविषयप्रकृत-

४ न्या०

हेतुतावच्छेदकतत्त्वात्मकसम्बन्धकल्पनात्। तत्र बाधभ्रमकालीने सद्धेतौ धूमे। तु। **बाधितः** अयं बाधितः। **इति** इत्थम्। **व्यवहाराभावाद्** हेतुर्बाधित इति व्यवहारासत्त्वात्प्रत्युत पुरुष एव भ्रान्त इति व्यवहारात्। **इति** इत्थम्। **आहुः** कथयन्ति।

**अयमाशयः**—येषां मते सत्प्रतिपक्षादिदोषाणामनित्यत्वं तेषां मते हेत्वाभासशब्दो दोषपरः। दोषवत्ता तु हेतौ एकज्ञानविषयत्वसम्बन्धेन सर्वत्र तिष्ठति। तन्मते यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वमिति लक्षणं दोषाणामेव। तथाविधदोषवत्सु एकज्ञानविषयत्वसम्बन्धेन हेत्वाभासव्यवहारः। सत्प्रतिपक्षादिस्थले विरोधिव्याप्त्यादिकमेव दोषरूपेण गृह्यते। तादृशदोषवत्ता हेतौ अयं विरुद्धव्याप्तिविशिष्टो हेतुरित्याकारकैकज्ञानविषयत्वसम्बन्धेन। न चैवं रीत्या सत्प्रतिपक्षस्यानित्यत्वेन बाधस्याप्यनित्यता वाच्या, यद्यपि वह्निमान् धूमादित्यादिसद्धेतौ पक्षे साध्याभावस्याभावेन बाधो नास्ति तथापि पर्वतो वह्न्यभाववानित्याकारकबाधभ्रमः सम्भवति। स एव साध्याभावविषयकत्वेन पर्वतो वह्निमानित्याकारकानुमितेर्विरोधी मतेऽस्मिन् यद्विषयकत्वेनेत्यस्य यत्प्रकारकत्वेनेत्यर्थकतया यत्पदेन वह्न्यभावस्य ग्रहणात्तद्वत्त्वं वह्न्यभावो धूमश्च इत्याकारकैकज्ञानविषयत्वेन धूमरूपहेताविति सद्धेतोरपि बाधितत्वापत्तिरिति चेन्न, तत्र बाधकालीनधूमादिसद्धेतौ एकज्ञानविषयत्वरूपसम्बन्धस्य कल्पनाऽपि न सद्धेतौ 'अयं हेतुर्बाधितः' इति व्यवहाराभावात्। प्रतिपरामर्शकालीनधूमादिसद्धेतौ 'अयं हेतुः सत्प्रतिपक्षितः' इत्याकारकव्यवहारेणोक्तरीत्या ज्ञाने सम्बन्धत्वकल्पना भविष्यति। तेन सत्प्रतिपक्षस्यानित्यदोषत्वस्वीकारे न दोष इति। आहुरित्यनेनास्वरसः सूचितः।

नन्वनुमितिविरोधित्वं तु साक्षाद् बाधादेरेव व्यभिचारादिना तु साध्याभाववद्वृत्तित्वादिरूपेण व्याप्तिज्ञानप्रतिबन्ध एव क्रियते, कथं तत्रानुमितिविरोधित्वहेत्वाभासत्वमित्याशङ्कायामाह—**अनुमितिविरोधित्वमिति**। **अनुमितिविरोधित्वं** लक्षणघटके ज्ञानस्यानुमितिविरोधित्वमित्यत्रानुमितिविरोधित्वपदम्। **अनुमितितत्करणान्यतरविरोधित्वम्** अनुमितेरनुमायास्तत्करणान्यतरस्य तस्या अनुमितेः कारणानि पक्षसाध्यहेतवस्तेष्वेकस्य विरोधित्वं प्रतिबन्धकत्वम्। **तेन** यादृशविशिष्टविषयकत्वेन ज्ञानस्यानुमितितत्करणान्यतरविरोधित्वं तत्त्वं हेत्वाभासत्वमिति स्वीकरणेन। **व्यभिचारिणि** व्यभिचारस्थलीय हेतौ पर्वतो धूमवान् वह्नेरित्यत्र धूमवदन्यवृत्तित्ववति वह्नौ। **न**। **अव्याप्तिः** नागमनम्। **दोषज्ञाने** व्यभिचारादिदोषज्ञानम्। **च**। **यद्धेतुविषयकं** यादृशहेतुसम्बद्धं स्वविषयकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन यद्धेतुमाश्रित्य दोषो भवति। **तद्धेतुकानुमितौ** तथाविधहेतुभूतानुमायाम्। **प्रतिबन्धकम्** निरोधकम्। **तेन** यद्धेत्वाविघटितलक्षणकरणेन। **एकहेतौ** प्रमेयत्वादिहेतौ। **व्यभिचारग्रहे** दोषापत्तौ। **हेत्वन्तरेण** धूमादिनाऽन्येन हेतुना। **अनुमित्युत्पत्तेः** अनुमासम्भवात्। **तदभावाद्यनवगाहित्वात्** साध्या( ग्राह्या )भावाद्यनवगाहित्वात्। **च**। **व्यभिचारज्ञानस्य** व्यभिचारदोषज्ञानस्य। **अनुमितिविरोधित्वाभावे** अनुमितिप्रतिबन्धकताविरहे। अपि च बाधादिदोषाणां साक्षादनुमितिप्रतिबन्धकत्वाद् व्यभिचारस्य स्वतयात्वात्। **न**। **क्षतिः** हेत्वाभाससामान्यलक्षणस्य धूमवान् वह्नेरित्यादौ नाव्याप्तिरपितु व्याप्तिरेवेति। **सङ्क्षेपः**

सारं विस्तरस्तु आकरग्रन्थेषु द्रष्टव्यमिति । निष्कर्षमाह--**यादृशेति । यादृशपक्षसाध्यहेतौ** यद्रूपे पक्षे साध्ये हेतौ च । **यावन्तः** यावद्विधाः । **दोषाः** । **तावत्** तावत्सङ्ख्याकम् ! **अन्यान्यत्वं** भिन्नभिन्नत्वम् । **तत्र** । **हेत्वाभासत्वं** यत्पक्षके यत्साध्यके यद्धेतुके च यावन्तो दोषाः प्रतीयन्ते तावन्त एव तत्र भिन्ना भिन्ना हेत्वाभासा मन्तव्या इति । **पञ्चत्वकथनं** हेत्वाभासस्य पञ्चविधत्वकथनम् । **तत्सम्भवस्थलाभिप्रायेण** तेषां प्राधान्येन सम्भवस्थलाशयेनैव न तु सम्भाव्यमानहेत्वाभासान्तरव्यावृत्त्यर्थ इति ।

**अयमाशयः**—लक्षणघटके 'अनुमितिविरोधित्वपदमनुमितितत्करणान्यतरविरोधितार्थपरम् । तेन व्यभिचारस्थले अयं हेतुर्व्यभिचारी इत्याकारकज्ञानस्य साक्षादनुमितिविरोधिता नास्तीति हेत्वाभासाव्याप्तिर्न । तथार्थग्रहणे तु तथाविधहेतोर्व्याप्तिज्ञानप्रतिबन्धकत्वादनुमितिप्रतिबन्धकत्वेन नाव्याप्तिः । एवं यद्धेतुविषयकं दोषज्ञानं तद्धेतुविषयिकाया एवानुमितेः प्रतिबन्धकं भवति । पर्वतो वह्निमान् प्रमेयत्वादित्यादौ प्रमेयत्वहेतोः वह्निरूपसाध्याभाववति ह्रदेऽपि विद्यमानत्वात् इत्येतादृशदोषज्ञानं तद्धेतुकाया एवानुमितेः प्रतिबन्धकं न तु धूमहेतुकायास्तस्याः । तेन एकहेतौ व्यभिचारग्रहेऽपि हेत्वन्तरेण अनुमासम्भवाद् व्यभिचारादीनां साध्याभावाद्यनवगाहित्वाच्च तेषां ज्ञानस्यानुमितिविरोधित्वाभावेऽपि धूमवान् वह्नेरित्यादौ लक्षणस्य नाव्याप्तिः । पक्षसाध्यहेत्वनुसारेण दोषाणां पार्थक्यादनेकत्वाच्च हेत्वाभासा अप्यनेकविधाः, तेषां पञ्चविधत्वकथनं तु सम्भवस्थलाशयेन तु सम्भाव्यमानहेत्वाभासान्तरव्यावर्तनायेति ।

**अनुवाद**—दूसरे तो ( कहते हैं ) 'जिस विषयक होने से ज्ञान का अनुमितिविरोधित्व होता है, उससे युक्त होना हेत्वाभासत्व है' । सत्प्रतिपक्ष में विरोधी की व्याप्ति आदि ही वैसे ( दोष ) हैं । हेतु का उससे युक्त होना ज्ञानरूप सम्बन्ध से होता है । न तो इस प्रकार 'वह्निमान् धूमात्' इत्यादि पक्ष में बाधभ्रम का साध्य के अभाव विषय के रूप में अनुमिति के विरोधी होने से ज्ञानरूप सम्बन्ध से उससे युक्त होने का भी होने से सद्धेतु के भी बाधित होने की स्थिति ही मानना ठीक है, क्योंकि उसमें ज्ञान के सम्बन्धत्व की कल्पना नहीं होती । यहाँ 'सत्प्रतिपक्षित' ऐसा मानना व्यवहार से उसकी कल्पना से है, उसमें 'बाधित' ऐसा व्यवहार नहीं होता है, ऐसा कहते हैं ।

अनुमितिविरोधित्व भी अनुमिति एवं उसके करणों ( पक्ष साध्य हेतु ) में से किसी एक का विरोधी होना है । इस कारण व्यभिचारी हेतु में अव्याप्ति नहीं है । दोष का ज्ञान भी जिस हेतु का विषयक है, उसी हेतु की अनुमिति में ही प्रतिबन्धक होता है । इस कारण एक हेतु में व्यभिचार ग्रहण करने पर भी दूसरे हेतु से भी अनुमिति की उत्पत्ति होने से और साध्याभाव आदि में अनवगाही होने से भी व्यभिचार ज्ञान का अनुमितिविरोधित्व के अभाव में भी कोई क्षति नहीं होती । यह संक्षेप में कहा गया ।

जिस प्रकार के पक्ष साध्य एवं हेतु में जितने दोष होते हैं, उतने ही भिन्न-भिन्न हेत्वाभास होते हैं । उनका पञ्चत्व ( पाँच प्रकार का ) कहना तो उनके सम्भव स्थल के अभिप्राय से है ।

एवञ्च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम्। साधारणः साध्यवदन्य-
वृत्तिर्हेतुः। तेन च व्याप्तिग्रहप्रतिबन्धः क्रियते। असाधारणः साध्यासमा-
नाधिकरणो हेतुः। तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते। तथा शब्दो
नित्यः शब्दत्वादित्यादावसाधारण्यं शब्दोऽनित्यः शब्दत्वादित्यादौ त्वसाधार-
ण्यभ्रमः। अन्ये तु सपक्षावृत्तिरसाधारणः। सपक्षश्च निश्चितसाध्यवान्। इत्थञ्च
शब्दोऽनित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदा नासाधारण्यं तत्र
हेतुनिश्चयादिति वदन्ति। अनुपसंहारी चात्यन्ताभावाप्रतियोगिसाध्यकादिः।
अनेन च व्यतिरेकव्याप्तिज्ञानप्रतिबन्धः क्रियते।

**आलोकः**—अनैकान्तिकं लक्षयति—**एवमिति**। **एवम्** इत्थम्। **च** हि। **साधारणा-**
**द्यन्यतमत्वं** साधारणासाधारणानुपसंहारिष्वन्यतमत्वम्। **अनैकान्तिकत्वम्** अनैकान्तिक-
हेत्वाभासत्वमिति। तत्र साधारणभेदं विवृणोति—**साधारण** इति। **साधारणः** साधारणा-
नैकान्तिकः। **साध्यवदन्यवृत्तिहेतुः** साध्यं विद्यतेऽस्मिन्निति साध्यवान्, तस्मादन्यस्मिन्
वृत्तिर्निष्ठा यस्य तादृशो हेतुः। **तेन** साधारणानैकान्तिकहेत्वाभासेन। **व्याप्तिग्रहप्रति-**
**बन्धः** व्याप्तिः साध्यवदन्यावृत्तित्वरूपा साध्यसामानाधिकरण्यरूपा वा, तस्याः ग्रहो ज्ञानं
तस्य प्रतिबन्धः। **क्रियते** विधीयत इति। यथा पर्वतो वह्निमान् प्रमेयत्वादित्यत्र
प्रमेयत्वं वह्निरूपसाध्यवदन्यह्रदवृत्तित्वाद् पक्षसपक्षविपक्षसाधारणेन व्यभिचारी।
द्वितीयमसाधारणाख्यभेदं विवृणोति—**असाधारण** इति। **असाधारणः** तदाख्योऽनै-
हेतुस्तु। **साध्यासमानाधिकरणः** साध्यस्य साधयितुमभीष्टस्य असमानाधिकरणः
असमानाश्रयः। **हेतुः**। **तेन** असाधारणेनानैकान्तिकेन हेत्वाभासेन। **साध्यसामानाधि-**
**करण्यग्रहः** साध्यसामानाधिकरण्यात्मकव्याप्तिज्ञानम्। **प्रतिबध्यते** विरुध्यते। यथा
'शब्दो नित्यः शब्दत्वात्' इत्यादौ शब्दत्वहेतोः। **असाधारण्यं** ( शब्दः पक्षः नित्यत्वं
प्रागभावध्वंसप्रतियोगित्वं स्वरूपेण साध्यं शब्दत्वजातिः समवायेन हेतुः। शब्दत्व
प्रागभावध्वंसप्रतियोगित्वेन हेतौ ) साध्यासमानाधिकरणत्वम्। **'शब्दो नित्यः शब्द-**
**त्वात्' इत्यादौ**। **तु**। **असाधारण्यभ्रमः** साध्यासमानाधिकरणत्वभ्रमः। एव न तु
वस्तुतोऽसाधारण्यमिति। मीमांसका हि शब्दनित्यत्ववादिनः, ते हि शब्दोऽनित्यः शब्द-
त्वादित्यत्र शब्दत्वस्य हेतोः साध्याऽसामानाधिकरण्यं मन्यन्ते, तन्मते शब्दो नित्यः शब्द-
त्वादित्यत्र तु शब्दत्वस्य साध्यसामानाधिकरण्यात्। तद्विपरीतं नैयायिकास्तु शब्दत्व
प्रागभावध्वंसप्रतियोगित्वं मन्यन्तेऽतस्ते शब्दानित्यवादिनः। तन्मते तत्र अनित्यत्व-
सामानाधिकरण्यवति शब्दत्वे अनित्यत्वसामानाधिकरण्याभाववत्ताज्ञानं भ्रम इति।
तत्र प्राचां मतमाह—**अन्ये** इति। **अन्ये** अपरे प्राञ्चः। **तु** तद्विपरीतम्। **सपक्षावृत्तिः**
निश्चितसाध्यवान् सपक्षस्तत्र न विद्यते वृत्तिर्निष्ठा यस्य तादृशो हेतुः। **असाधारणः**
इति। सपक्षं व्याचष्टे—**सपक्ष** इति। **सपक्षः** सपक्षपदवाच्यः। **च** तु। **निश्चितसाध्यवान्**
असन्दिग्धसाध्ययुक्तः, यथा महानसः। **इत्थम्** असाधारण्यघटकसपक्षत्वस्य। निश्चय-
घटितत्वे। **च** हि। **शब्दोऽनित्यः शब्दत्वादित्यादौ**। **यदा**। **पक्षे शब्दे**। **साध्यनिश्चयः**

अनित्यत्वविवेकः । **तदा । न । असाधारण्यम् ।** तत्र तादृशकथने । **हेतोः** शब्दत्वस्य । **निश्चयात्** विवेकात् । **इति । वदन्ति** कथयन्ति । अनुपसंहारिभेदं विवृणोति—**अनुपसंहारीति ।** अनुपसंहारी तदाख्यो व्यभिचारिभेदः । **च तु । अत्यन्ताभावाप्रतियोगिसाध्यकादिः** अत्यन्ताभावस्य न प्रतियोगी साध्यकादिः साध्यं पक्षो हेतुश्च यत्र तथा । यत्र साध्यं पक्षो हेतुश्चैतत्त्रयमेव केवलान्वयि सोऽनुपसंहारीति । **अनेन** अनुपसंहारिणा । **च हि । व्यतिरेकव्याप्तिज्ञानप्रतिबन्धः** व्यतिरेकव्याप्तेः साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपायाः व्याप्तेः ज्ञानस्य प्रतिबन्धः । **क्रियते ।** इति । यथा 'सर्वमनित्यं प्रमेयत्वात्' इत्यत्र सर्वस्यापि पक्षत्वाद् व्याप्तिसञ्चारणस्थलाभावः तत्प्रतिबन्धे चानुमितिप्रतिबन्ध इति ।

**अयमाशयः**—साधारणासाधारणानुपसंहार्यन्यतमत्वमनैकान्तिकान्तिकत्वम् । तत्र यः साध्यवान् तद्भिन्नेष्वपि वृत्तिमान् हेतुः साधारणः । यथा पर्वतो वह्निमान् प्रमेयत्वादित्यादौ प्रमेयत्वस्य हेतोः वह्निरूपसाध्यवत्पर्वतभिन्नह्रदवृत्तित्वात् पक्षविपक्षसपक्षसाधारणेन व्यभिचारित्वमिति साधारण्येनानैकान्तिकत्वम् । अनेन व्याप्तिज्ञानं प्रतिबध्यते, तेन चानुमितिः । साध्यस्यासमानाश्रयोऽसाधारणः । यथा शब्दो नित्यः शब्दत्वादित्यादौ न्यायनये शब्दस्य प्रागभावध्वंसप्रतियोगित्वेनानित्यत्वात् शब्दत्वस्य हेतोः साध्यस्य नित्यत्वस्यासमानाश्रयत्वेनासाधारणत्वम् । शब्दनित्यत्ववादिनो मीमांसकास्तु शब्दोऽनित्यः शब्दत्वादित्यत्र शब्दत्वस्यासाधारणत्वं मन्यन्ते । नैयायिकमते तु तत्रासाधारण्य भ्रम एव । प्राचीनानां मते तु सपक्षावृत्तिरसाधारणः । निश्चितसाध्यवान् सपक्षो यथा महानसः, सन्दिग्धसाध्यवान् पक्षो यथा पर्वतः, निश्चितसाध्याभाववान् विपक्षो यथा महाह्रदः । सकलसपक्षव्यावृत्तो ह्यसाधारणः । तत्र पक्षे साध्यनिश्चयसत्त्वे हेतोर्निश्चयान्नासाधारण्यं, तदानीं पक्षस्यैव सपक्षत्वेन निश्चितसाध्यवद् व्यावृत्तत्वाभावात् । यदा तु पक्षे साध्यसन्देहस्तदाऽसाधारण्यमिति अस्यानित्यदोषतेति तन्मतम् । असाधारणेन साध्यसमानाश्रयग्रहः प्रतिबध्यते, तेन चानुमितिः । अनुपसंहारी तु हेतुस्तत्र यत्र पक्षो हेतुः साध्यमित्येतत्त्रयमेव केवलान्वयि । केवलान्वयिसाध्यकेऽपि अन्वयव्याप्तिज्ञानादेवानुमितेः । अनेन व्यतिरेकव्याप्तिज्ञानं प्रतिबध्यते । यथा सर्वमनित्यं प्रमेयत्वादित्यादौ सर्वस्यापि पक्षत्वाद् व्याप्तिसञ्चारणस्थलाभावाद्धेतोरनुपसंहारित्वमिति ।

**अनुवाद**—इसी तरह साधारणत्व, असाधारणत्व, अनुपसंहारित्व में से किसी एक का होना अनैकान्तिकत्व है । साध्यवान् से भिन्न में वृत्ति वाला हेतु साधारण होता है । इससे व्याप्ति के ज्ञान का प्रतिबन्ध किया जाता है । साध्य से असमान अधिकरण वाला हेतु असाधारण होता है । इससे साध्य के सामानाधिकरण्य का ज्ञान प्रतिबन्धित होता है । 'शब्दो नित्यः शब्दत्वात्' इत्यादि में असाधारण्य है । 'शब्दः अनित्यः शब्दत्वात्' इत्यादि में तो असाधारण्य भ्रम ही है ।

दूसरे ( प्राचीन ) तो "सपक्ष में वृत्ति न होने वाला असाधारण है । निश्चित साध्य से युक्त सपक्ष होता है । इस प्रकार 'शब्दो नित्यः शब्दत्वात्' इत्यादि में जब पक्ष में साध्य का निश्चय होता है तब असाधारण्य नहीं होगा, क्योंकि वहाँ हेतु निश्चित

होता है". ऐसा कहते हैं। अनुपसंहारी अत्यन्ताभाव का प्रतियोगी नहीं है साध्य पक्ष हेतु जिसका, वह होता है। इससे व्यतिरेकव्याप्ति के ज्ञान का प्रतिबन्ध किया जाता है।

विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी। अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः। सत्प्रतिपक्षे तु प्रतिहेतुः (द्वितीयहेतुः) साध्याभावसाधकः। अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव हेतुः साध्यसाधकत्वेनोपन्यस्त इति अशक्तिविशेषोपस्थापकत्वाच्च विशेषः। सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः। अगृहीताप्रामाण्यकसाध्यव्याप्यवत्वोपस्थितिकालीनागृहीताप्रामाण्यकसाध्याभावव्याप्यवत्त्वोपस्थितिविषयस्तथेत्यन्ये। अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धः फलम्।

**आलोकः**—विरुद्धहेत्वाभासं लक्षयति—**विरुद्ध** इति। **विरुद्धः** 'साध्याभावव्याप्तत्वं विरोधस्तद्वान् हेतुः। **तु** तद्विपरीतम्। **साध्यव्यापकीभूताभावप्रतियोगी** साध्यं साध्याधिकरणे व्यापकीभूतो वर्तमानो योऽभावो विरहस्तस्य प्रतियोगी विरुद्धः। साध्याभावव्याप्तो हेतुर्विरुद्ध इति। यथा 'शब्दो नित्यः कृतकत्वात्' इत्यत्र शब्दनित्यत्वसाधनाय प्रयुक्तः 'कृतकत्वाद्' इति हेतुः साध्याभावेनानित्यत्वेन व्याप्त इति विरुद्ध इति। अत्र यत्र यत्र कृतकत्वं तत्र तत्रानित्यत्वमिति व्याप्तेराश्रयः। तेन साध्यसाधनाय प्रयुक्तः, किन्तु साध्याभावसाधको हेतुर्विरुद्ध इत्याशयः। यथाऽऽह सूत्रकृदपि—'सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः' इति। **अयं** विरुद्धो हेतुः। **साध्याभावग्रहसामग्रीत्वेन** साध्याभावस्य साध्यविरहस्य यो ग्रहो ज्ञानं तस्य सामग्रीत्वेन समुत्साहकतया। **प्रतिबन्धकः**। अनित्यत्वव्याप्यकृतकत्ववानयं शब्द इत्याकारकविरोधिपरामर्शज्ञानात् नित्यः शब्दः इत्याकारानुमितेः प्रतिबन्ध इत्याशयः। विरुद्धसत्प्रतिपक्षयोः समाने साध्याभावसाधकत्वे को विशेषः? इत्याशङ्कायामाह—**सत्प्रतिपक्ष** इति। **सत्प्रतिपक्षे** प्रतिपक्षयुक्ते हेत्वाभासे। **तु** हि। **प्रतिहेतुः** द्वितीयहेतुः। न तु हेतुरेव। **साध्याभावसाधकः** साध्यस्य योऽभावो विरहस्तस्य साधको राधकः। **अत्र** विरुद्धे। **तु** तद्विपरीतम्। **हेतुः** लिङ्गम्। एक एव हेतुः, स एव साध्याभावसाधकः। **इति** इत्थम्। **विशेषः** वैशिष्ट्यम्। सत्प्रतिपक्षे द्वौ हेतू परस्परं व्याप्तिज्ञानप्रतिबन्धकौ विरुद्धे तु एक एव हेतुः साध्याभावेन व्याप्तो व्याप्तिज्ञानप्रतिबन्धकतयाऽनुमितिप्रतिबन्धक इत्याशयः। तयोर्भेदकान्तरमप्याह—**साध्याभावसाधक** इति। विरुद्धे **साध्याभावसाधकः** साध्यविरहसमर्थकः। **एव** नान्यः। **हेतुः** लिङ्गम्। **साध्यसाधकत्वेन** साध्यसमर्थकरूपेण। **उपन्यस्तः** प्रयुक्तः। **इति** इत्थम्। **अशक्तिविशेषोपस्थापकत्वात्** प्रयोक्तुः अशक्तिरज्ञानं भ्रमस्तद्विशेषस्य उपस्थापकत्वात्संसूचकत्वात्। **च** अपि। **विशेषः** वैशिष्ट्यम्। सत्यपि साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्षः साध्यव्यापकीभूताभावप्रतियोगी विरुद्धो हेतुरिति, तयोः स्पष्टतया स्वरूपभेदे यथा साधारणादीनां परस्परवैलक्षण्येऽपि दूषकताबीजस्यैक्येन नैकहेत्वाभासत्वं तथाऽनयोरपि विरोध्यनुमितिसामग्रीत्वेन प्रतिबन्धकतारूपदूषकताबीजस्यैक्यादेकहेत्वाभासत्वं स्यादेवेत्याशङ्कायामुच्यते—विरुद्धे यः साध्याभाव-

समर्थको हेतुः स एव भ्रमवशादशक्तितः साध्यसाधकत्वेनोपन्यस्यते, सत्प्रतिपक्षे तु हेतु-प्रतिहेतुरूपेण द्वौ हेतू भवत इति स्पष्टं तयोरन्तरमिति ।

सत्प्रतिपक्षं लक्षयति—**सत्प्रतिपक्ष** इति । **सत्प्रतिपक्षः** प्रतिपक्षयुक्तो हेतुः । **साध्याभावव्याप्यवान्** साध्यस्याभावेन व्याप्यो यो हेतुस्तद्वान् । **पक्षः** इति । यथा 'ह्रदो वह्निमान् धूमात्' 'ह्रदो वह्न्यभाववान् जलात्' इत्यादौ ह्रदपक्षे वह्निसाध्यसिद्धये प्रयुक्तो धूमहेतुः तत्प्रतिपक्षभूतो जलहेतुः साध्यस्य वह्नेरभावेन व्याप्यः तादृशसाध्या-भावव्याप्यहेतुमान् ह्रदपक्षः तत्र सत्प्रतिपक्षः । अत्र द्वावेव हेतू परस्परं विरोधिनाविति उभयत्रैव सत्प्रतिपक्षव्यवहारः । इदं दीधितिकृन्मतेन । प्राचां मतेन सत्प्रतिपक्षमाह—**अगृहीतेति । अगृहीतप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीनागृहीताप्रामाण्यकसाध्या-भावव्याप्यवत्तोपस्थितिविषयः** न गृहीतं निश्चितम् अप्रामाण्यं यस्य तदगृहीता-प्रामाण्यकं तादृशं यत्साध्यं वह्न्यादि तस्य यद् व्याप्यवत्त्वं तस्य योपस्थितिः ज्ञानं साध्यव्याप्यहेतुमानिति ज्ञानं तत्कालीनं यत् अगृहीताप्रामाण्यकम् अनिर्णीताप्रामाण्यकं साध्याभावव्याप्यवत्त्वं साध्यविरहव्याप्यवत्ता तस्य उपस्थितिज्ञानं तस्य विषयः । **तथा** सत्प्रतिपक्षः । **इति** इत्थम् । **अन्ये प्राञ्च** इति ।

**अयम्भावः**—साध्यव्याप्यहेतुमानयं पक्ष इत्याकारकपरामर्शज्ञानकाले यस्मिन् हेतौ अप्रामाण्यनिश्चयो न भवति तस्मिन्नेव हेतौ यदि साध्याभावव्याप्यहेतुमानयं पक्ष इत्या-कारकः परामर्शोऽपि अप्रामाणिको निश्चितो न भवति, तदाऽसौ हेतुः सत्प्रतिपक्ष इत्यु-च्यत इति विस्तरोऽन्यत्र । अन्ये इत्यस्वरसः एकस्मिन्नेव हेतौ साध्यतदभावविषयक-परामर्शस्यासम्भवात् ।

सत्प्रतिपक्षस्य दूषकताबीजमाह—**अत्रेति । अत्र** सत्प्रतिपक्षे । **च** अपि । **परस्प-राभावव्याप्यवत्ताज्ञानात्** अन्योऽन्यविरहव्याप्यवत्त्वज्ञानतः । **परस्परानुमितिप्रतिबन्धः** अन्योऽन्यानुमानिरोधः । **फलं** परिणतिः । इति । 'ह्रदो वह्निमान् धूमात्' 'ह्रदो वह्न्य-भाववान् जलात्' इत्यादौ पूर्वत्र साध्यं वह्निरित्यत्र वह्न्यभावः तयोरभावो वह्न्यभाव-वह्न्यभावाभावः ( वह्निः ) च तयोश्च व्याप्यवत्पक्षात्मकपरामर्शज्ञानात् 'ह्रदो वह्नि-मान्' 'ह्रदो वह्न्यभाववान्' इत्युभयानुमितिप्रतिबन्धः परिणतिरिति सारमस्य ।

**अनुवाद**—विरुद्ध तो साध्यव्यापकीभूत जो अभाव है, उसका प्रतियोगी है । यह साध्य के अभाव ज्ञान के सामग्री के रूप में अनुमिति का प्रतिबन्धक होता है । सत्प्रतिपक्ष में तो प्रतिहेतु अर्थात् दूसरा हेतु साध्य के अभाव का साधक होता है । यहाँ ( विरुद्ध ) में तो हेतु ही वैसा होता है, यही विशेष अन्तर है । साध्याभाव का साधक हेतु ही साध्य के साधक के रूप में उपन्यस्त होता है, अतः अशक्ति विशेष के उपस्थापक होने से भी इस ( विरुद्ध ) में विशेष है ।

सत्प्रतिपक्ष वह होता है जहाँ पक्ष साध्याभावव्याप्य हेतु से युक्त होता है । दूसरे तो 'निश्चित नहीं है प्रामाण्य जिसका, ऐसे साध्य के व्याप्यवत्त्व के ज्ञान के समकालीन अनिश्चितप्रामाण्यसाध्याभावव्याप्यवत्त्व के ज्ञान का विषय, वैसा ( सत्प्रतिपक्ष ) होता

है' ऐसा कहते हैं। यहाँ ( सत्प्रतिपक्ष में ) भी परस्पर अभाव के व्याप्यवत्त्व के ज्ञान से परस्पर की अनुमिति का प्रतिबन्ध फल है।

अत्र केचित्—यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते। यथा च शङ्खे सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीर्जायते। एवं कोटिद्वयव्याप्यदर्शनेऽपि कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति। तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव। यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः। फलबलेन चाधिकसमबलभावः कल्प्यत इति वदन्ति। तन्न। तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयाल्लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्। न तूपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकता गौरवात्। तथा च प्रतिबन्धकसत्त्वात्कथमनुमितिः ? न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी, येनानुमितिभिन्नत्वेनाऽपि विशेषणीयम्। यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात् संशयो नान्यथाऽगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति।

आलोकः—सत्प्रतिपक्षविषये रत्नकोषकृन्मतमुद्धृत्य दूषयितुमुपक्रमते—अत्रेत्यादिना। **अत्र** सत्प्रतिपक्षविषये। **केचित्** केचन आचार्याः रत्नकोषकृदादयो विशेषतः। **यथा। घटाभावव्याप्यवत्ताज्ञाने** घटविरहव्याप्यवत्त्वावबोधे। **विद्यमाने** वर्तमाने। **अपि** च। **घटचक्षुःसंयोगे** घटस्य रूपविषयस्य चक्षुषो तदिन्द्रियभूतनेत्रयुगलस्य संयोगे। **सति। घटवत्ताज्ञानं** भूतलं घटवदिति तस्य घटवत्त्वस्य ज्ञानम्। **जायते** उत्पद्यते। यत्र भूतलेऽन्धकारादिना वस्तुव्यवधानेन वा प्रथमं घटाभावव्याप्यभूतलत्ववत्ता ज्ञानेऽपि तत्र प्रदीपादिसहकारिवशाद् घटेन सहालोकादिसहकृते चक्षुःसंयोगे सति घटवद् भूतलमिति प्रत्यक्षं जायते। **यथा। च। शङ्खे** तदाख्यश्वेतगुणविशिष्टपदार्थे। **पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने** पीतगुणविरहव्याप्यशङ्खत्ववत्त्वावबोधे। **सति। अपि। पित्तादिदोषे** पीतगुणविशिष्टादिदोषे। **सति** विद्यमाने। **पीतः। शङ्खः। इति** इत्थम्। **धीः** मतिः। **जायते** समुत्पद्यते। **एवम्** इत्थमेव। **कोटिद्वयव्याप्यदर्शने** स्थाणुत्वव्याप्यवत्ताकोटरादिमानयं, स्थाणुत्वाभावव्याप्यकरचरणादिमानयं, पुरुषत्वव्याप्यकरचरणादिमानयं पुरुषत्वाभावव्याप्यकोटरादिमानयमिति च परस्परविरोधिकोटिद्वयव्याप्यवत्ताप्रत्यक्षात्मकपरामर्शे विद्यमाने। **अपि। कोटिद्वयस्य** स्थाणुर्न वेति पुरुषो न वेति वा स्थाणुत्वस्थाणुत्वाभावयोः पुरुषत्वपुरुषत्वाभावयोश्च। **प्रत्यक्षरूपः** प्रत्यक्षात्मकः। **संशयः। भवति** सञ्जायते। **तथा** तेनैव प्रकारेण। **सत्प्रतिपक्षस्थले। संशयरूपानुमितिः** साध्यतदभावप्रकारिका ह्रदो वह्निमान् न वा इत्याद्यात्मिकाऽनुमा। **भवति** सञ्जायते। **एव** हि। **यत्र। च। एककोटिव्याप्यदर्शनं** स्थाणुत्वपुरुषत्वान्यतरात्मकभावकोटिव्याप्यवत्तानिश्चयः। **तत्र** तादृशस्थले। **अधिकबलतया** समधिकबलत्वेन। **द्वितीयकोटिभानप्रति-**

**बन्धात्** स्थाणुत्वाभावपुरुषत्वभावान्यतरात्मकाभावकोटिव्याप्यवत्ताज्ञानप्रतिबन्धात् । **न नैव** । **संशयः** सन्देहः तदभाववत्ताप्रमितिर्न जायते किन्तु तद्वत्ताप्रमितिरेव तथैव वैपरीत्येनाऽपि । तत्रोभयोर्भावाभाववत्ताज्ञानयोरजायमानतया न संशयोऽपितु एककोटिका स्वसामग्र्यनुरूपा प्रत्यक्षात्मिका अनुमित्याद्यात्मिका वा प्रमितिरेवेति । तत्र **फलबलेन** भावाभावफलाश्रयेण । **च** । **अधिकसमबलभावः** अधिकतुल्यबलभावः । **कल्प्यते** । भावकोटिका प्रमा चेद् भावकोटिकव्याप्यवत्ताज्ञानेऽधिकबलं यदि प्रमा अभावकोटिका तदाऽभावकोटिकव्याप्यवत्ताज्ञानेऽधिकबलं यावन्नोभयप्रमे न जायेयातां तावदुभयकोटिव्याप्यवत्ताज्ञाने समबलभावोऽनुमीयते । यथा पीततासाक्षात्कारसामग्री बलवती सत्यपि शङ्खे शुक्लत्वज्ञाने पीतः शङ्खः इत्यनुभवात् । स्थाणुर्वा पुरुषो वेति संशयसामग्री समबलवती उभयकोट्यवगाहिज्ञानजनकत्वात् । तद्दूषयति—**तन्नेति** । **तत्** सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवतीति कथनम् । **न** नैवोपयुक्तम् । तथाभवने हेतुमाह—**तदभावेति** । **तदभावव्याप्यवत्ताज्ञाने** लौकिकसन्निकर्षेण एकस्मिन् पर्वते वह्न्यभावव्याप्यवत्ताज्ञाने । **सति** । **तदुपनीतभानविशेषशाब्दबोधादेः** तदुपनीतस्तत्संसूचितो भानविशेषः अलौकिकज्ञानलक्षणः सन्निकर्षजन्यसाक्षात्कारः शाब्दबोधश्च आदिपदादनुमितिश्च तदादेः । **अनुदयात्** अनुत्पादात् । **लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे** लौकिकसन्निकर्षाजन्यं दोषविशेषाजन्यं च यज्ज्ञानं तन्मात्रं प्रति । **तस्य** तदभावव्याप्यवत्ताज्ञानस्य । **प्रतिबन्धकता** । **लाघवात्** । **न** नैव । **तु हि** । **उपनीतभानविशेषे** संसूचितालौकिकतद्वत्ताप्रत्यक्षे । **शाब्दबोधे** तद्वत्ताशाब्दबुद्धि प्रति तद्वत्ताऽनुमितिं प्रति च । **पृथक्** पार्थक्येन । **प्रतिबन्धकता गौरवात्** । **तथा च** एवं हि । **प्रतिबन्धकसत्त्वात्** प्रतिबन्धकभावेन । **कथम्** । अनुमितिः ? अनुमा अपितु नेति । **न** । **हि** । **लौकिकसन्निकर्षस्थले** यत्र विषयेण सहेन्द्रियस्य लौकिकसन्निकर्षस्तत्र । **प्रत्यक्षं** प्रत्यक्षात्मकज्ञानम् । **इव** यथा । **सत्प्रतिपक्षस्थले** यत्र हेतुः सत्प्रतिपक्षितस्तत्र । **संशयाकारानुमितिः** सन्देहात्मकानुमा । **प्रामाणिकी** प्रमाणसिद्धा । **येन अनुमितिभिन्नत्वेन** संशयाकारानुमितिभिन्नत्वेन । **अपि च** । **विशेषणीयं** तद्वत्ताबुद्धिविशेषणीयत्वेन भाव्यं किन्तु न तथेति । **यत्र प्रत्यक्षस्थले च** । **कोटिद्वयव्याप्यवत्ताज्ञानं** स्थाणुत्वव्याप्यकोटरादिमान् पुरुषव्याप्यकरादिमान् इति प्रत्यक्षपरामर्शज्ञानम् । **तत्र** तादृशस्थले । **उभयत्राप्रामाण्यज्ञानात्** उभयत्र ज्ञाने अप्रामाण्यज्ञानात् स्थाणुत्वव्याप्यकोटरादिमानयमिति ज्ञानमप्रमा पुरुषत्वव्याप्यकरादिमानिति ज्ञानमप्रमा चेत्याकारकात् कारणात् । **संशयः** स्थाणुर्वा पुरुषो वेति सन्देहः । **जायते** । **न** नैव । **अन्यथा** कारणाभावात् । **परस्परविरुद्धतदभावव्याप्यवत्ताज्ञानमात्रात्** । **अगृहीताप्रामाण्यकस्य** उभयकोटिकतदभावव्याप्यवत्तापरामर्शस्य । **विरोधिज्ञानस्य** । **प्रतिबन्धकत्वात्** प्रतिबन्धकभावात् । **इति** ।

**अयमाशयः**—रत्नकोशकारमते तु सत्प्रतिपक्षः साध्यतदभावयोः संशयं जनयति न त्वनुमितिं प्रतिबध्नाति, न च तदभावव्याप्यवत्ताज्ञानस्यानुमितिप्रतिबन्धकत्वे किमपि प्रमाणमिति । यथा हि तमसा वस्त्वन्तरव्यवधानेन वा भूतलस्य घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि प्रदीपादिसहकारेण घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते, यथा च

सत्यपि शङ्खे पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने पित्तादिदोषवशात्पीतत्वं शङ्खस्य भासते, तथा चोभयकोटिव्याप्यदर्शनेऽपि कोटिद्वयस्य स्थाणुरयं पुरुषोऽयं वेति संशयो जायते, तथा सत्प्रतिपक्षस्थलेऽपि संशयरूपानुमितिर्भवत्येवेति तन्मतम्। तत्र नानुमितिः, प्रतिबन्धकसत्त्वादिति प्रकृतग्रन्थकृन्मतम्। तदनुसारेण तदभावव्याप्यवत्ताज्ञाने सति तज्ज्ञानलक्षणालौकिकसन्निकर्षजन्यज्ञानशाब्दबोधानुमितीनां नोत्पादः, तेन तस्य प्रतिबन्धकता लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे न तु तदुपनीतभानविशेषे शाब्दबोधे च पार्थक्येन, तथा सति गौरवापत्तेः। न लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिश्च भवति प्रामाणिकी, तेन नानुमितिभिन्नत्वस्य विशेषणीयताऽपि। संशयोऽपि कोटिद्वयव्याप्यवत्ताज्ञाने उभयत्र अप्रामाण्यज्ञानादेव भवति, नान्यथा किञ्च प्रतिबन्धकत्वमपि अगृहीतप्रामाण्यकस्यैव विरोधिज्ञानस्येति।

**अनुवाद**—इस विषय में कुछ आचार्य ( रत्नकोशकार ) "जैसे घटाभावव्याप्यवत्ता का ज्ञान होने पर भी घट एवं चक्षु के संयोग में घटवत्ता का ज्ञान होता है; जैसे कि शंख में पीतत्वाभावव्याप्यशंखवत्त्व के ज्ञान होने पर भी पित्त आदि के दोष होने पर 'शङ्ख पीला है' ऐसी बुद्धि हो जाती है। इसी तरह दोनों कोटियों में व्याप्य दर्शन में भी अर्थात् 'स्थाणुत्वव्याप्य कोटर वाला है यह', 'स्थाणुत्वाभावव्याप्य कर-चरण आदि वाला है यह', 'पुरुषत्वव्याप्य कर आदि वाला है यह', 'पुरुषत्वाभावव्याप्य कोटर वाला है यह' ऐसा दर्शन होने पर भी दोनों कोटियों का प्रत्यक्षरूप संशय हो जाता है। उसी तरह सत्प्रतिपक्षस्थल में भी संशयरूप अनुमिति होती है। जहाँ एककोटिव्याप्य दर्शन है वहाँ अधिक बल होने से दूसरे कोटि के भान के प्रतिबन्ध होने से संशय नहीं होता। फल के बल द्वारा अधिक एवं सम बलभाव की कल्पना की जाती है" ऐसा कहते हैं। यह कहना ठीक नहीं है। तदभावव्याप्यवत्ता का ज्ञान होने पर उसके ज्ञानलक्षण शाब्दबोध अनुमिति आदि का उदय न होने से लौकिक सन्निकर्ष से अजन्य दोष विशेष से अजन्य ज्ञानमात्र में ही उसकी प्रतिबन्धकता होती है, क्योंकि इसी में लाघव है; न कि उपनीत भान विशेष शाब्दबोध अनुमिति आदि में पृथक् रूप से प्रतिबन्धकता होती है, क्योंकि उसमें गौरव पड़ता है। इस तरह प्रतिबन्धक के रहने से कैसे अनुमिति होती है ? न तो लौकिक सन्निकर्षस्थल में, प्रत्यक्ष जैसे सत्प्रतिपक्ष स्थल में संशयाकार अनुमिति ही प्रामाणिक होती है, जिससे अनुमिति भिन्नत्व से विशेषित किया जाय। जहाँ भी कोटिद्वयव्याप्यवत्ता का ज्ञान है वहाँ दोनों में अप्रामाण्य होने से संशय होता है, अन्यथा नहीं, क्योंकि अनिश्चित प्रामाण्य ही विरोधी ज्ञान का प्रतिबन्धकत्व होता है।

असिद्धिस्त्वाश्रयासिद्ध्याद्यन्यतमत्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः। यत्र च काञ्चनमयः पर्वतो वह्निमानिति साध्यते तत्र पर्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमये पर्वते परामर्शप्रतिबन्धः फलम्। स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्य हेतोरभावः। अत्र च ह्रदो द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ता-

ज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम्। साध्याप्रसिद्धिरपि व्याप्यत्वासिद्धिः। सा च साध्ये साध्यतावच्छेदकस्याभावः। तथा च काञ्चनमयवह्निमानित्यादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ता-ज्ञानरूपपरामर्शप्रतिबन्धः फलम्। एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः। यथा च काञ्चनमयधूमादित्यादौ। अत्र हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभावात्तद्धेतुकव्याप्तिज्ञानादेरभावः फलम्। एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वं हेतुतानवच्छेदकमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति।

**आलोकः**—असिद्धिं निरूपयति—**असिद्धिरिति**। **असिद्धिः** असिद्धहेत्वाभासत्वम्। **आश्रयासिद्धयाद्यन्यतमत्वम्** आश्रयासिद्धिः आश्रयस्य हेतोराधारस्यासिद्धिरसम्भवता आदिपदात् व्याप्यत्वासिद्धेः स्वरूपासिद्धेश्च ग्रहणं तदन्यतमत्वम्। आश्रयासिद्धयादि-भेदाभाववान् समुदायोऽसिद्धिरिति। आद्यामसिद्धिं लक्षयति—**आश्रयासिद्धिरिति**। **आश्रयासिद्धिः** आश्रयस्याधारस्यासिद्धिः। **पक्षे** पक्षभूते पर्वतादौ। **पक्षतावच्छेदकस्य** पक्षत्वनिरूपकधर्मस्य। **अभावो** विरहः। तदुदाहरति—**यत्रेति**। **यत्र**। 'काञ्चनमयः पर्वतो वह्निमान्'। **इति** इत्थम्। **साध्यते** साध्यविषयीक्रियते। **तत्र** तादृशस्थले। **'पर्वतो न काञ्चनमयः'** न हि गिरिः स्वर्णमयोऽपितु पाषाणमयः। **इति** इत्थम्। **ज्ञाने** अवबोधे। **विद्यमाने** सति। **काञ्चनमये** स्वर्णमये। **पर्वते** गिरौ साध्याश्रये। **परामर्शप्रतिबन्धः** वह्निव्याप्यधूमवत्काञ्चनपर्वत इति ज्ञाननिरोधः। **फलं** परिणतिः। अत्र पक्षे काञ्चनमयपर्वते पक्षतावच्छेदकधर्मो हि काञ्चनमयत्वं तस्याभावे नात्र हेतुराश्रयासिद्ध इति। द्वितीयां स्वरूपासिद्धिं लक्षयति—**स्वरूपासिद्धिरिति**। **स्वरूपासिद्धिः** स्वरूपेण असिद्धिः। **तु** हि। **पक्षे** पक्षभूते ह्रदादौ। **व्याप्यत्वाभिमतस्य** व्याप्यतया सम्मतस्य। **हेतोः**। **अभावः** विरहः। **अत्र** प्रसङ्गेऽस्मिन्। **'ह्रदो द्रव्यं धूमात्'** **इत्यादौ**। **पक्षे** ह्रदे। **व्याप्यत्वाभिमतस्य** व्याप्यत्वेन सम्मतस्य। **हेतोः** धूमस्य। **अभावे** विरहे। **ज्ञाते** अवबुद्धे। **सति**। **पक्षे** ह्रदे। **साध्यव्याप्यहेतुमत्ताज्ञानरूपस्य** द्रव्यत्वव्याप्यधूमवान् ह्रद इति ज्ञानात्मकस्य। **परामर्शस्य**। **प्रतिबन्धः**। **फलं** परिणतिः। अत्र द्रव्ये धूमस्याव्याप्यत्वेन हेतोः स्वरूपासिद्धिरिति। व्याप्यत्वासिद्धिं विवृणोति—**साध्येति**। **साध्याप्रसिद्धिः** साध्यस्य अप्रसिद्धिः क्वचित् साध्याप्रसिद्धयादय इत्यपि पाठः। अनेन सम्बन्धाप्रसिद्धिप्रतियोगित्वाप्रसिद्धिज्ञानाप्रसिद्धयादीनामपि ग्रहणं भवति। **अपि च**। **व्याप्यत्वासिद्धिः** व्याप्यत्वासिद्धिमध्येऽन्तर्भूताः। व्याप्यत्वासिद्धिरित्युपलक्षणं, तेन व्यापकत्वाप्रसिद्धिरपि दोष एवेति आचार्याः। तां लक्षयति—**सेति**। **सा** व्याप्यत्वासिद्धिः। **च** अपि। **साध्ये** साध्यभूते। **साध्यतावच्छेदकस्य** साध्यतानिरूपकधर्मस्य। **अभावः** विरहः। **तथा च** एवं हि। **'काञ्चनमयवह्निमान्' इत्यादौ** 'पर्वतः काञ्चनमयवह्निमान् धूमात्' इत्यादौ। **साध्ये** काञ्चनमयवह्नौ। **साध्यतावच्छेदकाभावे** साध्यतावच्छेदकस्य काञ्चनमयत्वस्य अभावे विरहे। **ज्ञाते**। **साध्यतावच्छेदकविशिष्टसाध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धः** साध्यतावच्छेदकेन काञ्चनमयत्वेन विशिष्टं यत्साध्यं

वह्निस्तस्य व्याप्यवत्ताज्ञानरूपपरामर्शः काञ्चनमयवह्निव्याप्यधूमवानिति परामर्शनिरोधः। **फलं** परिणतिः। साधनाप्रसिद्धि लक्षयति—**एवमिति**। **एवम्** इत्थम्। **हेतौ** लिङ्गे। **हेतुतावच्छेदकताभावः** हेतुत्वनिरूपकधर्मविरहः। **साधनाप्रसिद्धिः**। साधनाप्रसिद्धिदोषः। **यथा**। **च**। **काञ्चनमयधूमात्** पर्वतो वह्निमान् काञ्चनमयधूमात्। **इत्यादौ**। **अत्र** उदाहरणेऽस्मिन्। **हेतुतावच्छेदकविशिष्टहेतोः** काञ्चनमयत्वविशिष्टधूमस्य। **ज्ञानाभावात्** अप्रसिद्धया। **तद्धेतुकव्याप्तिज्ञानादेः** तादृशधूमहेतुभूतव्याप्तिज्ञानादेः। **अभावः** विरहः। **फलं** परिणतिः। प्राचीनमतेन व्याप्यत्वासिद्धिमुदाहरति—**एवमिति**। एवम् इत्थम्। **'वह्निमान् नीलधूमात्'** इत्यादौ। 'पर्वतो वह्निमान् नीलधूमात्' इत्यादौ। **गुरुतया** धूमत्वापेक्षया गुरुधर्मतया। **नीलधूमत्वम्**। **हेतुतानवच्छेदकं** धूमत्वानिरूपकम्। **अपि च**। **व्याप्यत्वासिद्धिः**। **इति** इत्थम्। **वदन्ति** प्राचीना आचार्याः इति शेषः। एवं नीलधूमत्वविशिष्टहेतौ वह्निव्याप्तिज्ञानाभावः फलं ततो नानुमितिः, किञ्च तन्मते नीलधूमत्वं न हेतुतावच्छेदकमपितु धूमत्वमेव तथा। येषां मते गुरुधर्मस्याप्यवच्छेदकत्वं तन्मते तु नीलधूमादिति सद्धेतुरेव न तु हेत्वाभासः इति।

**अनुवाद**—आश्रयासिद्धि आदि में से किसी एक का होना असिद्धि है। पक्ष में पक्षतावच्छेदक का अभाव आश्रयासिद्धि है। यदि 'काञ्चनमयः पर्वतो वह्निमान्' इस प्रकार की साधना की जाती है तो वहाँ पर्वत काञ्चनमय नहीं है, ऐसे ज्ञान के हो जाने पर काञ्चनमय पर्वत में परामर्श का प्रतिबन्ध फल है। स्वरूपासिद्धि तो पक्ष में व्याप्यत्व के रूप में अभिमत हेतु का अभाव है। यहाँ भी 'ह्रदो द्रव्यं धूमात्' इत्यादि पक्ष में व्याप्यत्वाभिमत हेतु के अभाव के ज्ञात होने पर पक्ष में साध्यव्याप्य हेतुमत्ता के ज्ञानरूप परामर्श का प्रतिबन्ध फल है। साध्याप्रसिद्धि भी व्याप्यत्वासिद्धि ही है। वह भी साध्य में साध्यतावच्छेदक का अभाव है। इसी तरह 'काञ्चनवह्निमान्' (पर्वतः काञ्चनवह्निमान् धूमात्') इत्यादि साध्य में साध्यतावच्छेदक के अभाव के ज्ञात होने पर साध्यतावच्छेदकविशिष्ट साध्यव्याप्यवत्ताज्ञानरूप परामर्श का प्रतिबन्ध फल है।

इसी तरह हेतु में हेतुता के अवच्छेदक का अभाव साधनाप्रसिद्धि है। जैसे कि 'काञ्चनमयधूमात्' ( पर्वतो वह्निमान् काञ्चनमयधूमात् ) इत्यादि में। यहाँ हेतुता के अवच्छेदक से विशिष्ट हेतु के ज्ञान के अभाव से तद्धेतुक व्याप्तिज्ञान आदि का अभाव फल है। इसी तरह 'वह्निमान् नीलधूमात्' इत्यादि में धूम की अपेक्षा नील धूम के गुरु होने से नीलधूमत्व के हेतुता का अनवच्छेदक होना भी व्याप्यत्वासिद्धि है, ऐसा भी कहते हैं। (ऐसा न मानने वाले के मत में तो यह (नील धूम हेतु) सद्धेतु ही है।)

**बाधस्तु पक्षे साध्याभावादिः। एतस्यानुमितिप्रतिबन्धः फलम्। तद्धर्मिकतदभावनिश्चयो लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति। न तु संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणं**

**तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तम्। अप्रसिद्धसाध्यकानुमित्यनापत्तेः, साध्यसंशयादिकं विनाऽप्यनुमित्युत्पत्तेश्च।**

**आलोकः**—बाधं निरूपयति—**बाध** इति। **बाधः** तदाख्यदोषः। **तु** हि। **पक्षे**। **साध्याभावादिः** साध्यविरहादिः, अत्र आदिपदेन साध्यवदन्यत्वस्य पक्षावृत्तिसाध्यादेश्च ग्रहणम्। तद्वान् हेतुर्बाधितो हेत्वाभास इति। यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधित इति। **एतस्य** बाधस्य। **अनुमितिप्रतिबन्धः** अनुमाननिरोधः। **फलं** परिणतिः। यथा वह्निरनुष्णो द्रव्यत्वादित्यादौ द्रव्यत्वादिति हेतुर्बाधितः, यतो हि अनुष्णत्वाभाववान् वह्निः इत्याकारकप्रत्यक्षप्रमाणेन द्रव्यत्वहेतोः साध्यस्यानुष्णत्वस्याभावः पक्षे वह्नौ निश्चितः। तेन वह्निरनुष्ण इत्यनुमितिरेव न भवति। बाधे नियामकमाह—**तदिति। तद्धर्मिकतदभावनिश्चयः** अनाहार्या प्रामाण्यज्ञानानास्कन्दितप्रकृतधर्मविशिष्टधर्मिसम्बद्धतदभावविषयकयथार्थज्ञानम्, यत्र बाधकालीनेच्छाजन्यं ज्ञानमाहार्यं, यथा प्रतिमायां देवबुद्धिस्तद्भिन्नमनाहार्यं संशयादिज्ञानमप्रामाण्यज्ञानं तेन न आस्कन्दितं सम्मिश्रमिति अप्रामाण्यज्ञानानास्कन्दितम् अनाहार्यश्च अप्रामाण्यज्ञानानास्कन्दितश्च यः तद्धर्मिकः प्रकृतधर्मविशिष्टधर्मिसम्बद्धः तदभावनिश्चय इति। **लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे** लौकिकसन्निकर्षाजन्यं प्रत्यक्षभिन्नं दोषविशेषाजन्यं पीतः शङ्खः इत्यादिज्ञानं त्यक्त्वा यावज्ज्ञानं तादृशं यत्तद्धर्मिकतज्ज्ञानं प्रकृतधर्मविशिष्टधर्मिसम्बद्धज्ञानं तन्मात्रे। **विरोधी** प्रतिबन्धक इति नियमः। यो हि प्रकृतधर्मविशिष्टधर्मिणोऽभावनिश्चयः सः लौकिकसन्निकर्षजन्यभिन्नस्य दोषविशेषजन्यभिन्नस्य च सर्वस्य हि ज्ञानस्य प्रतिबन्धको भवति इति नियमादनुष्णत्वधर्मविशिष्टानुष्णाभाववद्धर्मिविषयकं वह्निरुष्ण इति स्पार्शनप्रत्यक्षरूपं ज्ञानमनाहार्यत्वात् संशयादिमिथ्याज्ञानरहितत्वाच्च वह्निरुष्ण इत्यनुमितेः प्रतिबन्धकमिति। प्रसङ्गेऽस्मिन् मतान्तरं दूषयितुमाह—**न त्विति। न। तु** हि। **संशयसाधारणं** संशयसहितम्। **पक्षे। साध्यसंसृष्टत्वज्ञानं** साध्यसम्बन्धविषयकं ज्ञानं 'पर्वतो वह्निमान्न वा' इत्याकारकम्। **अनुमितिकारणम्** अनुमाहेतुः। **तद्विरोधितया** तादृशज्ञानप्रतिबन्धकत्वेन। **बाधसत्प्रतिपक्षयोः** बाधः पक्षे साध्याभावादिः सत्पतिपक्षः प्रतिपक्षयुक्तहेतुश्च तयोः। **हेत्वाभासत्वं** दुष्टहेतुत्वम्। **इति** इत्थं व्यवहारः। **युक्तं** समुचितम्। यथा केचिद् वदन्तीति। पक्षे संशयसहितं साध्यसम्बन्धविषयकं ज्ञानमनुमितिहेतुस्तत्प्रतिबन्धकतया बाधसत्प्रतिपक्षौ हेत्वाभासौ भवतो न तु परस्परसाध्याभावविषयकपरामर्शत्वेन सत्प्रतिपक्षस्य साक्षादनुमितिप्रतिबन्धकत्वेन बाधस्य तथेति यत्केचिद् वदन्ति तन्नैवोपयुक्तमिति। तत्र हेतुमाह—**अप्रसिद्धेति। अप्रसिद्धसाध्यकानुमित्यनापत्तेः** न प्रसिद्धं साध्यं यस्यास्तादृशी याऽनुमितिस्तस्या अनापत्तेरसिद्धेः। **साध्यसंशयादिकं** साध्ये यः संशयस्तदादिकम्। **विना। अपि। अनुमित्युत्पत्तेः** अनुमोदयात्। **च**। इति।

**अयमाशयः**—न हि साध्यसंसृष्टत्वज्ञानमनुमितिहेतुस्तथा सति 'पृथिव्यामितरभेदः' इत्यत्राप्रसिद्धसाध्यकानुमितिर्नैवोत्पद्येत, तत्रानुमितेः पूर्वं पक्षे साध्यसंसृष्टत्वज्ञानं नास्ति,

केनाऽपि प्रमाणेन तथैव न संशयसाधारणमपि अनुमितिहेतुः साध्यसंशयादिकं विनाऽपि घनगर्जितेन मेघानुमितेः प्रामाणिकत्वात् । इति ।

**अनुवाद**—पक्ष में साध्य का अभाव आदि बाध है । अनुमिति का प्रतिबन्ध इसका फल है । अनाहार्य ( बाधकालीन इच्छा से जन्य ज्ञान आहार्य है, उससे भिन्न ) एवं अप्रामाण्य ज्ञान से अमिश्रित प्रकृतधर्मविशिष्ट धर्मी का अभावविषयक निश्चय लौकिक सन्निकर्ष से अजन्य दोषविशेष से अजन्य तद्धर्मिक तज्ज्ञानमात्र में विरोधी होता है ( ऐसा नियम है ) । 'न तो ( जैसा कि कुछ लोग मानते हैं ) पक्ष में संशयविषयक एवं साध्यसंसृष्टत्व ( साध्यसम्बन्धविषयक ) ज्ञान अनुमिति का कारण होता है, उसके प्रतिबन्धक होने से भी बाध एवं सत्प्रतिपक्ष का हेत्वाभासत्व होता है' ऐसा मानना ही उपयुक्त है, क्योंकि वैसा मानने पर अप्रसिद्ध साध्यक अनुमिति नहीं हो पाती और संशय आदि के बिना भी अनुमिति की उत्पत्ति होती है । इस कारण न तो साध्य-संशय अथवा साध्यसंसृष्टत्व ज्ञान ही अनुमिति का कारण होता है, न हि उसका प्रतिबन्धक होने से बाध एवं सत्प्रतिपक्ष की हेत्वाभासता है, अपितु परस्पर साध्याभाव विषयक परामर्श के प्रतिबन्धक होने से सत्प्रतिपक्ष साक्षात् अनुमिति का प्रतिबन्धक होने से बाध हेत्वाभास है ।

एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकं, प्रमाणाभावाद् गौरवाच्च । अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः, किन्तु भ्रमत्वज्ञानानास्कन्दितबाधादिबुद्धेः प्रतिबन्धकता, तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचिदुपयुज्यते ।

**आलोकः**—प्रसङ्गेऽस्मिन् साध्याभावज्ञानं प्रति प्रमात्वज्ञानं प्रतिबन्धकमिति यदुच्यते प्राग्भिस्तत् खण्डयितुमाह—**एवमिति** । **एवम्** इत्थम् । **साध्याभावज्ञाने** पक्षविशेष्यकसाध्याभावज्ञाने । **प्रमात्वज्ञानं** यथार्थनिश्चयः, इदं ज्ञानं प्रमेति । **अपि** । **न** नैव । **प्रतिबन्धकम्** । **प्रमाणाभावात्** तथात्वे मानाभावात् । **गौरवात्** गौरवापत्तेः । **च** । अर्थात् 'ह्लदो वह्निमान्' इत्यनुमितिं प्रति 'ह्लदो वह्न्यभाववान्' 'इदं ज्ञानं प्रमा' इत्याकारकज्ञानस्य प्रतिबन्धकता यदुच्यते प्राचीनैस्तन्नोपयुक्तं, तथाकल्पने मानाभावाद् गौरवापत्तेश्च । साध्याभावज्ञानस्य प्रतिबन्धकता ग्राह्याभावावगाहितया भवति । 'इदं ज्ञानं प्रमा' इति ज्ञानं तु ग्राह्याभावानवगाहि । प्रकृते तु ग्राह्याभावावगाहि ह्लदो वह्न्यभाववानिति ज्ञानमेव भवति, न तु 'इदं ज्ञानं प्रमा' इत्याकारकम् । एवं पक्षविशेष्यकसाध्याभावज्ञाने प्रमात्वनिश्चयत्वरूपगुरुधर्मेण प्रतिबन्धकत्वकल्पनापेक्षया संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभाववत्वेन प्रतिबन्धकता स्वीकर्तव्या लाघवादिति विस्तरोऽन्यत्र । **अन्यथा** साध्याभावज्ञाने प्रमात्वज्ञानस्य प्रतिबन्धकत्वे । **सत्प्रतिपक्षादौ** । **अपि च** । **तदभावव्याप्यवत्ताज्ञाने** अनुमितिं प्रति साध्याभावव्याप्यवत्ताज्ञाने । **प्रमात्वविषयकत्वेन** प्रमारूपविषयत्वेन । **प्रतिबन्धकतापत्तेः** प्रतिबन्धकत्वप्राप्तेर्वस्तुतस्तु न सा कस्याऽप्यभीष्टा । **किन्तु** तद्विपरीतम् । **तत्र** । **भ्रमत्वज्ञानानास्कन्दितबाधादिबुद्धेः** भ्रमत्वज्ञानेन अनास्कन्दिता अनाप्लुता या बाधादिबुद्धिस्तस्याः । **प्रतिबन्धकता** । **तत्र**

बाधादिस्थले । **भ्रमत्वशङ्काविघटनेन** भ्रमत्वशङ्कानिवारणेन । **प्रामाण्यज्ञानं** प्रमात्वज्ञानम् । **क्वचित्** कुत्रचित् । **उपयुज्यते** । तेनानुमितितत्कारणज्ञानान्यतरं प्रति साक्षात्प्रतिबन्धकीभूतज्ञानविषयत्वाभावात् न साध्याभावज्ञानप्रमात्वं हेत्वाभास इति ।

**अनुवाद**—इस प्रकार साध्याभाव के ज्ञान में प्रमात्व का ज्ञान भी प्रतिबन्धक नहीं होता, क्योंकि वैसा होने में कोई प्रमाण नहीं है और गौरव भी पडता है। वैसा न मानने पर सत्प्रतिपक्ष आदि में भी तदभावव्याप्यवत्ता के ज्ञान में प्रमात्व विषय के रूप में प्रतिबन्धकता आ पड़ती है ( जो कि अभीष्ट नहीं है ), किन्तु भ्रमत्वज्ञान से अमिश्रित बाध आदि बुद्धि की ही प्रतिबन्धकता होती है। उसमें भ्रमत्वशङ्का के निवारण से प्रामाण्यज्ञान का कहीं ही उपयोग होता है।

न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे हेत्वभावे तु स्वरूपासिद्धिरेव दोष इति वाच्यं, बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात् । किञ्च यत्र परामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिञ्चित्करत्वाद् बाधस्यानुमितिप्रतिबन्धकत्वं वाच्यम् । एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् । न च पक्षे घटे गन्धसत्त्वात्कथं बाध इति वाच्यं, पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति । बाधसत्प्रतिपक्षभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति । अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् । बाधव्याप्यसत्प्रतिपक्षस्तु भिन्न एव, स्वतन्त्रेच्छेन मुनिना पृथगुपदेशात् । सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रघट्टकार्थः ॥ ७१ ॥

**आलोकः**—बाधस्यान्येन चरितार्थत्वमाशङ्क्य समाधत्ते—**नेति** । **न** । **च** हि । **बाधस्थले** यत्र हेतुर्बाधितस्तत्र 'वह्निरनुष्ण' इत्यादौ । **पक्षे** वह्निरूपपक्षे । हेतुरस्ति न वा ? यदि **हेतुसत्त्वे** हेतुसद्भावे । **व्यभिचारः** अनुष्णत्वाभावरूपसाध्याभाववति हेतोर्वृत्तित्वात्साधारणानैकान्तिकत्वेन व्यभिचारदोषः । **पक्षे** । **हेत्वभावे** हेतुविरहे । **स्वरूपासिद्धिः** । **एव** । **दोषः** । **इति** । तत्र व्यभिचारस्वरूपासिद्धिरूपान्यतरदोषप्रयुक्त एव हेत्वाभासव्यवहारो न तु बाधदोषप्रयुक्तो बाधितनाम्नेति । **वाच्यम्** । **बाधज्ञानस्य** पक्षे साध्याभावादिदोषज्ञानस्य । **व्यभिचारादेः** व्यभिचारासिद्धादेः । **भेदात्** स्पष्टतः पार्थक्यात् । तत्र उपपत्त्यनन्तरमाह—**किञ्चेति** । **यत्र** अयोगोलकं धूमवद् वह्नेरित्यादिस्थले । **परामर्शानन्तरं** वह्निव्याप्यधूमवदयोगोलकमिति परामर्शानन्तरम् । **बाधबुद्धिः** व्यभिचारज्ञानं विनैव अयोगोलकं न धूमवदिति बाधबुद्धिर्जाता । **तत्र** तादृशस्थले । **व्यभिचारज्ञानादेः** व्यभिचारस्वरूपासिद्धिज्ञानादेः । **अकिञ्चित्करत्वात्** असमर्थत्वात् । यतो हि व्यभिचारादिस्तु परामर्शप्रतिबन्धद्वारैवानुमितिप्रतिबन्धको न तु साक्षादेव **बाधस्य** बाधदोषस्यैव । **अनुमितिप्रतिबन्धकत्वम्** । **वाच्यं** समर्थनीयम् । **एवम्** इत्थम् । **यत्र** । **उत्पत्तिक्षणावच्छिन्ने** उत्पत्तिकालीने । **घटादौ** घटात्मके पक्षे । **गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं** गन्धव्याप्या या पृथिवीत्ववत्ता तस्याः ज्ञानम् । **तत्र** तादृशस्थले । **बाधस्य**

बाधदोषस्य । एव हि । प्रतिबन्धकत्वम् अनुमितिविरोधित्वम् । वाच्यं कथनीयम् । न नैव । च हि । पक्षे पक्षभूते । घटे । गन्धसत्त्वाद् गन्धभावेन । कथम् । बाधः अनुमिति-प्रतिबन्धः । इति इत्थम् । वाच्यम् । पक्षतावच्छेदकदेशकालावच्छेदेन पक्षतावच्छेदको यो देशकालो तयोरवच्छेदेन व्यावर्तकत्वेन । अनुमितेः । अनुभवसिद्धत्वात् । इति ।

अयम्भावः—घटत्वपर्वतत्वादिधर्मवद् देशकालावपि पक्षतावच्छेदकत्वेन स्वीकरणीयौ । न च काचिदनुमितिः कालानवच्छिन्ना देशानवच्छिन्ना वा । तेन घटात्मकपक्षस्योत्पत्तिक्षणात्मकः कालो व्यवच्छेदकः । तेन घटे पक्षे गन्धसत्त्वेऽपि उत्पत्तिकालानुरोधेन घटे गन्धाभाव एवान्यथा घटगन्धयोः कार्यकारणभावभङ्गप्रसङ्गः स्यात् ।

प्रकरणमुपसञ्जिहीर्षुर्हेत्वाभासानां पञ्चविधत्वमधिवक्ति—बाधेति । बाधसत्प्रतिपक्षभिन्नाः बाधः साध्याभावविशिष्टपक्षादिः सत्प्रतिपक्षः विरोधिव्याप्तिविशिष्टहेतुको बाधव्याप्य एव तद्भिन्नाः व्यभिचारविरुद्धासिद्धाः । ये । हेत्वाभासाः दुष्टहेतवः । तद्व्याप्या तैर्व्यभिचारादिभिर्व्याप्याः साधारणाश्रयासिद्धाद्याः । ते । तन्मध्ये व्यभिचारादिमध्ये । एव । अन्तर्भवन्ति अन्तर्भूता भवन्ति । अन्यथा अतथाभावे । हेत्वाभासाधिक्यप्रसङ्गाद् हेत्वाभासानामधिकसङ्ख्यापत्तेः । बाधव्याप्यसत्प्रतिपक्षः बाधव्याप्योऽपि सत्प्रतिपक्षः । तु तद्विपरीतम् । भिन्नः पृथक् । एव । स्वतन्त्रेच्छेन सर्वतन्त्रस्वतन्त्रेण । मुनिना गौतमेन । तस्य पृथक् । उपदेशात् शासनात्—'सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासाः' ( न्या० सू० १।२।४ ) इति कथनात् । सत्प्रतिपक्षव्याप्यः सत्प्रतिपक्षस्य व्याप्यः । तु । न । प्रतिबन्धकः अनुमितितत्कारणविरोधी । साध्याभावव्याप्यज्ञानस्य साध्यवत्ताज्ञानविरोधित्वेऽपि साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञानविरोधित्वे मानाभावादप्रतिबन्धकत्वमिति । इति इत्थम् । प्रघट्टकार्थः प्रकरणसारमिति ॥ ७१ ॥

**अनुवाद**—न तो बाधस्थल में पक्ष में हेतु के रहने से व्यभिचार दोष (साधारण) होता है और पक्ष में हेतु के अभाव में स्वरूपासिद्धि ही दोष होता है ( अतः बाधदोष पृथक् नहीं बनता ), ऐसा कहना ठीक है, क्योंकि बाधज्ञान व्यभिचार ज्ञान आदि से भिन्न होता है । जैसे कि जहाँ परामर्श के बाद बाधज्ञान होता है वहाँ व्यभिचार ज्ञान आदि के कुछ न कर पाने के कारण ( क्योंकि ये तो परामर्श के ही प्रतिबन्धक होते हैं, न कि साक्षात् अनुमिति के ) बाध का ही अनुमितिप्रतिबन्धकत्व मानना चाहिए । इस प्रकार जहाँ उत्पत्ति-क्षण से अवच्छिन्न घट आदि में गन्धव्याप्य पृथिवीत्ववत्ता का ज्ञान है, वहाँ बाध का प्रतिबन्धकत्व मानना चाहिए । न तो पक्ष घट में गन्ध के रहने से कैसे बाध माना जाय, ऐसा कहना ही उचित है, क्योंकि पक्षता के अवच्छेदक देश एवं काल के व्यावर्तन से अनुमिति अनुभव सिद्ध है । बाध एवं सत्प्रतिपक्ष से भिन्न जो हेत्वाभास हैं, उनके व्याप्य भी उन्हीं में अन्तर्भूत हो जाते हैं । वैसा न मानने पर हेत्वाभासों की संख्या बहुत अधिक हो जाती है । बाधव्याप्य सत्प्रतिपक्ष तो भिन्न ही है, क्योंकि स्वतन्त्र इच्छा वाले मुनि ने उसका पृथक् ही उपदेश किया है । सत्प्रतिपक्षव्याप्य तो प्रतिबन्धक नहीं होता, यह समुदित अर्थ है ।

**आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।**
**तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥ ७२ ॥**

सव्यभिचारं विभजते—आद्य इति । त्रिधा त्रिप्रकारकः । अनैकान्तिकः सव्यभिचारः ॥ ७२ ॥

आलोकः—परममूलेऽनैकान्तिकं विभजते—आद्य इति । आद्यः तु साधारणः स्यात्, अपरः असाधारणकः, तथैव अनुपसंहारी इति अनैकान्तिकः त्रिधा भवेत् इति । **आद्यः** प्रथमः । **तु । साधारणः** साध्यवदन्यवृत्तिः । **स्यात् । अपरः** अन्यः । **असाधारणकः** साध्यासमानाधिकरणः । **तथैव अनुपसंहारी** अत्यन्ताभावाप्रतियोगिसाध्यकादिः । **इति** इत्थम् । **अनैकान्तिकः** सव्यभिचारो हेत्वाभासः । **त्रिधा** त्रिप्रकारकः । **भवेत्** इति ।

**अनुवाद**—पहला साधारण, दूसरा असाधारण एवं तीसरा अनुपसंहारी भेद से अनैकान्तिक हेत्वाभास तीन प्रकार का होता है ॥ ७२ ॥

**यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः ॥**

यः सपक्ष इति । सपक्षविपक्षवृत्तिः साधारण इत्यर्थः । सपक्षो निश्चितसाध्यवान् । विपक्षः साध्याभाववान् । विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम् । वस्तुतो विपक्षवृत्तित्वमेव वाच्यं, विरुद्धस्य साधारणत्वेऽपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात् ।

आलोकः—परममूले साधारणभेदं विवृणोति—**य** इति । यः सपक्षे विपक्षे च भवेत् स तु साधारणः भवेत् इति **यः** हेतुः । **सपक्षे** निश्चितसाध्यवति । **विपक्षे** निश्चितसाध्याभाववति । **च** । भवेत् । **सः** तादृशो हेतुः । **साधारणः** तदाख्यः । भवेदिति । मूले कारिकां विवृणोति—**यः सपक्ष** इति । **सपक्षविपक्षवृत्तिः** सपक्षे निश्चितसाध्यवति विपक्षे निश्चितसाध्याभाववति वृत्तिर्निष्ठा यस्य तादृशो हेतुः । **साधारणः** । **इत्यर्थः** इत्याशयः । सपक्षं व्याचष्टे—**सपक्ष** इति । **सपक्षः** सपक्षपदवाच्यः । **निश्चितसाध्यवान्** निश्चितं साध्यं वह्न्यादिकमस्ति यस्मिंस्तत्तथा, यथा महानसः । विपक्षं व्याचष्टे—**विपक्ष** इति । **विपक्षः** विपक्षपदवाच्यः । **साध्याभाववान्** निश्चितरूपेण साध्यविरहविशिष्टः, यथा महाह्रदः । पदकृत्यं निर्दिशति—**विरुद्धवारणायेति** । **विरुद्धवारणाय** विरुद्धस्य साध्यव्यापकीभूताभावप्रतियोगिनो वारणाय अतिव्याप्तिर्मा भूदिति । यदि विपक्षवृत्तित्वमेव साधारणलक्षणं क्रियते तदा साध्याभावव्याप्यरूपस्य विरुद्धस्यापि केवलविपक्षवृत्तित्वात् तत्रातिव्याप्तिवारणायेति । **सपक्षवृत्तित्वम्** । **उक्तं** लक्षणे इति । **वस्तुतः** यथार्थतः । **तु** । **विपक्षवृत्तित्वम्** । **एव** लक्षणे **वाच्यम्** । विपक्षवृत्तित्वेनैव दूषकताभावात् । यथा 'पर्वतो धूमवान् वह्नेः' इत्यादौ हेतुभूतस्य वह्नेः सपक्षे महानसादौ विपक्षेऽयोगोलके च सत्त्वेन साधारणत्वं, तत्रापि दूषकता तु अयोगोलकसत्त्वेनैवेति । तथा सति **विरुद्धस्य** साध्याभावव्याप्यरूपस्य विरुद्धस्य । **साधारणत्वे** साधारणभावे । अपि च । **दूषकताबीजस्य** विरुद्धो हि सामानाधिकरण्यज्ञानस्य प्रतिबन्धकः साधारणस्तु

अव्यभिचारज्ञानस्य प्रतिबन्धक इति उभयोर्दूषकत्वबीजस्य। **भिन्नतया** पृथक्त्वेन। **तस्य** विरुद्धस्य। **पार्थक्यात्** साधारणतो वैभिन्न्यात्।

**अनुवाद**—जो हेतु सपक्ष एवं विपक्ष में भी होता है, वह साधारण कहलाता है। **यः सपक्ष इति।** सपक्ष एवं विपक्ष में वृत्ति वाला साधारण होता है, इसका ऐसा अर्थ है। निश्चित साध्य ये युक्त सपक्ष होता है। साध्य के अभाव से युक्त विपक्ष होता है। विरुद्ध के वारण के लिए सपक्ष में वृत्ति होना कहा गया। वास्तव में विपक्ष में वृत्ति होना ही कहना चाहिए। ( वैसा कहने पर ) विरुद्ध का साधारणत्व होने पर भी दूषकता बीज पृथक्-पृथक् होने से ( विरुद्ध सामानाधिकरण्य ज्ञान का साधारण अव्यभिचार ज्ञान का प्रतिबन्धक होने से ) उसकी भिन्नता स्पष्ट ही है।

**यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥ ७३ ॥**

यस्तूभयस्मादिति। सपक्षविपक्षव्यावृत्त इत्यर्थः। सपक्षः साध्यवत्तया निश्चितः। विपक्षः साध्यशून्यतया निश्चितः। शब्दोऽनित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वसन्देहस्तदा सपक्षत्वं घटादीनामेव, तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारणम्। यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधारणः, इदञ्च प्राचां मतम्। नवीनमतं तु पूर्वमुक्तम् ॥ ७३ ॥

**आलोकः**—परममूले असाधारणं लक्षयति—**य इति।** यः तु **उभयस्माद् व्यावृत्तः स च असाधारणः मतः** इति। **यः** हेतु। **तु** तद्विपरीतम्। **उभयस्मात्** सपक्षविपक्षाभ्याम्। **व्यावृत्तः** असम्बद्धः। **सः** तादृशः। **च** तु। **असाधारणः।** **मतः** कथितः इति। मूले कारिकाशयं विवृणोति—**यस्तूभयस्मादिति।** उभयस्माद् व्यावृत्त इति **सपक्षविपक्षव्यावृत्तः** सपक्षाद् विपक्षाच्च व्यावृत्तः पृथग्भूतः। **इत्यर्थः।** तत्र **सपक्ष** इति **साध्यवत्तया** साध्ययुक्तत्वेन। **निश्चितः।** **विपक्षः** इति। **साध्यशून्यतया** साध्यविरहितत्वेन। **निश्चितः।** यथा शब्दो नित्यः शब्दत्वादित्यत्र हेतुः शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं पक्षभूतशब्दमात्रवृत्तित्वादसाधारणः। मतान्तरं दर्शयति—**शब्द इति।** '**शब्दो नित्यः शब्दत्वात्' इत्यादौ।** **यदा।** **शब्दे** शब्दात्मकपक्षे। **अनित्यत्वसन्देहः** अनित्यत्वरूपसाध्यसन्देहः। **तदा।** **सपक्षत्वम्।** **घटादीनां** घटपटादीनाम्। **एव** तेषामनित्यत्वरूपसाध्यवत्त्वेन निश्चितत्वात्। ( गगनादिकं विपक्षस्तत्रानित्यरूपसाध्याभावस्य नित्यत्वस्य निश्चितत्वात्। ) **तद्व्यावृत्तं** तदसम्बद्धम्। **शब्दत्वं** हेतुः। इति। **तदा।** **तत्** शब्दत्वम्। **असाधारणं** शब्दात्मकपक्षमात्रवृत्तित्वात्। **यदा।** **तु।** **शब्दे** शब्दात्मकपक्षे। कृतकत्वेन हेतुना **अनित्यत्वनिश्चयः** अनित्यत्वात्मकसाध्यनिश्चयः। **तदा न।** **असाधारणः** किन्तु साधारणयभ्रम इति। **इदं** निश्चयघटितासाधारणलक्षणम्। **प्राचां** प्राचीनानां नैयायिकानाम्। **मतम्।** **नवीनमतम्।** **तु।** **पूर्वं** प्रागेव। **उक्तं** प्रतिपादितं साध्यासमानाधिकरणो हेतुरसाधारण इति ॥ ७३ ॥

**अनुवाद**—जो दोनों ( सपक्ष एवं विपक्ष ) से अलग रहे, वह हेतु असाधारण माना जाता है।

**यस्तूभयस्मादिति** । सपक्ष एवं विपक्ष से व्यावृत्त ( असाधारण है ), ऐसा अर्थ है। सपक्ष वह है, जो साध्यवान् के रूप में निश्चित है। विपक्ष वह है, जो साध्यशून्य के रूप में निश्चित है। 'शब्दोऽनित्यः शब्दत्वात्' इत्यादि में जब शब्द में अनित्यत्व का सन्देह होता है तब घट-पट आदि का सपक्षत्व होता है, क्योंकि उसमें साध्यभूत अनित्यत्व निश्चित रहता है और आकाश आदि विपक्ष होता है, क्योंकि उसमें साध्यभूत अनित्यत्व का अभाव निश्चित रहता है और उन दोनों से व्यावृत्त भी शब्दत्व होता है, अतः वह असाधारण होता है। जब शब्द में कृतकत्व हेतु से अनित्यत्व का निश्चय हो तब वह असाधारण नहीं होता। यह प्राचीनों का मत है। नवीन मत तो पहले ही बतलाया जा चुका है ॥ ७३ ॥

**तथैवानुपसंहारी केवलान्वयिपक्षकः ॥**
**( पर्वतो वह्निमान् सत्त्वादिति तत्रादिमो भवेत् ।**
**पृथ्वी नित्या गन्धवत्त्वादिति स्यादपरस्तथा ।**
**सर्वं तुच्छं प्रमेयत्वादिति तत्रान्तिमो भवेत् ॥ )**

तथैवेति। केवलान्वयिपक्षक इति। केवलान्वयिधर्मावच्छिन्नपक्षक इत्यर्थः। सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावान्नानुमितिः। इदं तु न सम्यक्, पक्षैकदेशे सहचारग्रहेऽपि क्षतेरभावात्। अस्तु वा सहचाराग्रहस्तावताऽप्यज्ञानरूपासिद्धिरेव न तु हेत्वाभासत्वं तस्य, तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम्।

आलोकः—परममूले उपसंहारिणं लक्षयति—**तथैवेति**। तथैव केवलान्वयिपक्षकः अनुपसंहारी इति। **तथैव** एवमेव। **केवलान्वयिपक्षकः** केवलम् अन्वयी अन्वयिधर्मावच्छिन्नः पक्षो यस्य स तादृशः हेतुः। **अनुपसंहारी**। भवतीति। यस्य हेतोः पक्षो लक्षणया पक्षता केवलान्वयिन्येवास्ति सोऽनुपसंहारी हेतुरित्याशयः। कारिकां विवृणोति—**तथैवेति**। कारिकायां **केवलान्वयिपक्षक इति**। **केवलान्वयिधर्मावच्छिन्नपक्षकः** केवलान्वयी अत्यन्ताभावाप्रतियोगी यो धर्मस्तदवच्छिन्नः पक्षो यस्य सः तादृशः। इत्यर्थः। **'सर्वमभिधेयं प्रमेयत्वात्'** **इत्यादौ**। सर्वत्वं केवलान्वयिधर्मः पक्षता साध्यसंशयरूपा तेन **सर्वस्य**। **एव**। **पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावात्** तत्र साध्यसंशये सति हेतौ साध्यसामानाधिकरण्यसंशयेन सामानाधिकरण्यग्रहस्य सामानाधिकरण्यज्ञानस्य स्थलान्तरस्य व्याप्तिसञ्चारणस्थलस्य अभावाद् विरहात् सामानाधिकरण्यव्याप्तिनिश्चयप्रतिबन्धेन। **न**। **अनुमितिः**। इति। तत्र वस्तुमात्रस्य पक्षत्वेन साध्यनिश्चयस्य कुत्राप्यसम्भवेन व्यापकसामानाधिकरण्यविशिष्टप्रमेयत्वादिरूपव्याप्तिज्ञानानुत्पादेन नानुमितिरित्याशयः। **इदं** प्राचां मतम्। **न**। **सम्यक्** समीचीनम्। **पक्षैकदेशे** असत्यपि साधारण्यग्रहस्य दृष्टान्तस्थले पक्षैकभागे।

**सहचारग्रहे** साध्यहेत्वोः सहचारज्ञाने। **अपि**। **क्षतेः** अनुमितिबाधायाः। **अभावात्** विरहात्। संशयसत्त्वेऽपि पक्षैकदेशे साध्यनिश्चयो न निवार्यते सर्वत्वधर्मितावच्छेदक-संशयसामग्रीसत्त्वेऽपि घटत्वादिधर्मितावच्छेदकसाध्यनिश्चयोत्पादे बाधकाभावात् घटे प्रमेयत्वेन हेतुना अभिधेयत्वरूपसाध्यनिश्चये प्रतिबन्धकाभावाच्चेति विस्तरोऽन्यत्र। तत्र कल्पान्तरमाह—**अस्त्विति**। **वा** इति पक्षान्तरे। **सहचाराग्रहः** पक्षैकदेशे साध्यहेत्वोः सहचाराज्ञानम् **अस्तु** स्यादेव। **तावता** साध्येन सह हेतोः सहचाराग्रहेण। **अपि अज्ञानरूपासिद्धिः** व्याप्तिग्रहाभावात्मिका कारणासिद्धिः। एव यद्धि पुरुषस्य दूषणं न तु **तस्य** सहचाराग्रहस्य। **हेत्वाभासत्वं** दुष्टहेतुत्वम्। **तथापि**। **केवलान्वयिसाध्यकत्वं** केवलान्वयि अत्यन्ताभावाप्रतियोगि साध्यं यस्य तत्त्वम्। **हेतोः**। **तत्त्वम्** अनुपसंहारित्वम्। **इति**। **उक्तम्**। परममूले साधारणादीनामुदाहरणानि प्रस्तौति—**पर्वत इति**। **तत्र** साधारणादिषु मध्ये। **'पर्वतो वह्निमान् सत्त्वात्'** इति। **आदिमः** साधारणः। **भवेत्**। **तथा**। **पृथ्वी नित्या गन्धवत्त्वात्**। **इति**। **अपरः** अन्यः **असाधारणः**। **स्यात्**। **तत्र 'सर्वं तुच्छं प्रमेयत्वात्'**। **इति**। **अन्तिमः** अनुपसंहारी। **भवेदिति**।

**अनुवाद**—उसी तरह केवलान्वयी पक्ष वाला अनुपसंहारी होता है।

**तथैवेति**। 'केवलान्वयी पक्ष वाला' इसका अर्थ है—केवलान्वयिधर्म से अवच्छिन्न पक्ष वाला। 'सर्वमभिधेयं प्रमेयत्वात्' इत्यादि में सभी के ही पक्ष होने से सामानाधिकरण्य ज्ञान के स्थलान्तर के अभाव से अनुमिति नहीं होती। यह कथन ठीक नहीं है। पक्ष के एकदेश में साध्य एवं हेतु का सहचारग्रह होने पर भी क्षति नहीं है। अथवा सहचार का अग्रह ( अज्ञान ) ही हो, उतने से अज्ञानरूप असिद्धि ही होती है, न कि उसका हेत्वाभासत्व, तथापि केवलान्वयी साध्य हो जिसमें, वहाँ हेतु का आभासत्व ही कहना चाहिए।

## यः साध्यवति नैवाऽस्ति स विरुद्ध उदाहृतः ॥ ७४ ॥

यः साध्यवतीति। एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभावो बोधितः। तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थं ॥ ७४ ॥

**आलोकः**—परममूले विरुद्धं लक्षयति—**य इति**। **यः** साध्यवति न। **एव अस्ति सः विरुद्ध उदाहृतः इति**। **यः** हेतुः। **साध्यवति** साध्ययुक्ते साध्याधिकरणे। **न**। **एव**। **अस्ति** वर्तते। **सः** तादृशो हेतु। **विरुद्धः**। **उदाहृतः** कथित इति। मूले कारिकां विवृणोति—**साध्यवतीति**। **एवकारेण** नैवास्त्यत्र य एवकारस्तेन। **साध्यवत्त्वावच्छेदेन** साध्याधिकरणत्वावच्छेदेन। **हेत्वभावः** हेतुविरहः। **बोधितः** ज्ञापितः। यदि तथा न विवक्षितः स्यात्तदा साधारणे स्यादतिव्याप्तिः। निष्कर्षमाह—**तथेति**। **तथा च** एवमेव। **साध्यव्यापकीभूताभावप्रतियोगित्वं** साध्यस्य व्यापकीभूतो योऽभावस्तस्य प्रतियोगित्वम्। **तदर्थः** तस्य साध्यवत्तावच्छेदेन हेत्वभावस्यार्थं इति। यथा 'घटो नित्यः

कृतकत्वात्' इत्यत्र साध्यस्य नित्यत्वस्य व्यापकीभूतो योऽभावः कृतकत्वाभावः तत्प्रतियोगित्वं कृतकत्वस्येति कृतकत्वं विरुद्धो हेतुः ।

( गोत्वादिसाध्ये हेतुर्हि यत्राश्वत्वादिको भवेत् । )

गोत्वादिसाध्ये अश्वत्वादिहेतुर्विरुद्ध इति ॥ ७४ ॥

**अनुवाद**—जो साध्य के अधिकरण में नहीं है, वैसा हेतु विरुद्ध कहलाता है । **यः साध्यवतीति** । कारिका के 'एव'कार से ( 'नैवास्ति' में ) साध्यवत्त्व के अवच्छेद से हेतु का अभाव बोधित होता है । इस प्रकार साध्य के व्यापकीभूत अभाव का प्रतियोगित्व उसका अर्थ है ॥ ७४ ॥

**आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।**
**व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५ ॥**

असिद्धं विभजते—आश्रयासिद्धिरित्यादि ॥ ७५ ॥

**आलोकः**—परममूले असिद्धिं विभजते—**आश्रयेति** । आद्या आश्रयासिद्धिः अथ स्वरूपासिद्धिः अपि अपरा व्याप्यत्वासिद्धिः स्यात् अतः असिद्धिः त्रिधा भवतीति । **आद्या** प्रथमा । **आश्रयासिद्धिः** पक्षासिद्धिः । **अथ** अनन्तरम् । **स्वरूपासिद्धिः** हेतोः स्वरूपेणासिद्धिः । **अपरा** अन्या । **व्याप्यत्वासिद्धिः** व्याप्यत्वस्य असिद्धिः । **अतः** । **असिद्धिः** असिद्धहेतुः । **त्रिधा** त्रिप्रकारा । भवतीति । मूले कारिकाशयं विवृणोति—**असिद्धमिति** । **असिद्धम्** असिद्धहेतुं **विभजते** विभागशो निर्वक्ति । **आश्रयासिद्धिरित्यादि** । आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिश्चेति ॥ ७५ ॥

**अनुवाद**—पहली आश्रयासिद्धि, उसके बाद स्वरूपासिद्धि, तीसरी व्याप्यत्वासिद्धि, इस कारण असिद्धि तीन प्रकार की होती है ॥ ७५ ॥

असिद्ध का विभाग करते हैं—**आश्रयासिद्धि इत्यादि** ॥ ७५ ॥

**पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।**

पक्षासिद्धिरिति । आश्रयासिद्धिरित्यर्थः ।

**ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥ ७६ ॥**

अपरेति । स्वरूपासिद्धिरित्यर्थः ॥ ७६ ॥

**व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।**

नीलधूमादिक इति । नीलधूमत्वादिकं गुरुतया न हेतुतावच्छेदकं स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसङ्ग्रहाय स्वसमानाधिकरणेति ।

**आलोकः**—परमूले आश्रयासिद्धिं निर्दिशति—**पक्षासिद्धिरिति** । यत्र मणिमयो गिरिः पक्षो भवेत् सः पक्षासिद्धिरिति । **यत्र** अनुमितिस्थले । **मणिमयः** मणिनिर्मितः । **गिरिः पर्वतः पक्षः** । **भवेत्** । **सः** तादृशपक्षाश्रितहेतुः । पक्षासिद्धिरिति । **मूले पक्षासिद्धिरिति** आश्रयासिद्धिरित्यर्थः । आश्रये साध्यहेत्वोर्धर्मिणि पक्षे असिद्धिरिति । पक्षे

पक्षतावच्छेदकस्याभाव इति। यथा 'मणिमयः पर्वतो वह्निमान् धूमात्' इत्यादौ मणिमयपर्वतस्यासिद्धत्वात् मणिमयपर्वतत्वरूपस्य पक्षतावच्छेदकस्याभाव इति नानुमितिः। परममूले स्वरूपासिद्धिं निर्दिशति—ह्रद इति। अथ ह्रदो द्रव्यम्, धूमवत्त्वात् इत्यत्र अपरा असिद्धिः। अथ अनन्तरम्। ह्रदो द्रव्यं धूमवत्त्वात्। इत्यत्र। अपरा अन्या स्वरूपासिद्धिरूपा। असिद्धिरिति। मूले अपरेति स्वरूपासिद्धिरित्यर्थः। पक्षे व्याप्यत्वेनाभिमतस्य हेतोरभावः हेतौ हेतुतावच्छेदकाभावः। यथा ह्रदो द्रव्यं धूमवत्त्वादित्यत्र 'ह्रदो न धूमवानि'ति ज्ञाने सति वह्निव्याप्यधूमवानयं ह्रद इति परामर्शाभावेन परामर्शप्रतिबन्धो दुष्टिबीजम्। परममूले व्याप्यत्वासिद्धिं निर्दिशति—**व्याप्यत्वेति**। अपरा व्याप्यत्वासिद्धिः नीलधूमादिके भवेत् इति। अपरा अन्या असिद्धिः। **व्याप्यत्वासिद्धिः** व्याप्यत्वस्य व्याप्तेः असिद्धिः यस्य व्याप्तिरेव न सिध्यति तादृशो हेतुर्व्याप्यत्वासिद्ध इति। सा च नीलधूमादिके 'पर्वतो वह्निमान् नीलधूमात्' इत्यादौ हेतुभूते नीलधूमादिके भवेदिति। मूले नीलधूमादिक इति। नीलधूमत्वं नीलत्वविशिष्टधूमत्वम्। गुरुतया गुरुधर्मतया। न। हेतुतावच्छेदकं हेतुतायाः धूमत्वस्य अवच्छेदकम्। **स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्य** स्वस्यात्र नीलधूमस्य समानाधिकरणस्य तुल्याश्रयस्य व्याप्यतावच्छेदकं व्याप्तिनिरूपकं यद्धर्मान्तरं शुद्धधूमत्वं तदघटितस्य। एव हि। **व्याप्यतावच्छेदकत्वात्** व्याप्यताया व्याप्तेरवच्छेदकत्वात्। घटके स्वसमानाधिकरणपदकृत्यं निर्दिशति—**धूमेति**। धूमप्रागभावत्वसङ्ग्रहाय 'इयं यज्ञशाला वह्निमती भविष्यति धूमप्रागभावात्' इत्यादौ धूमप्रागभावत्वरूपस्य धर्मस्य अवच्छेदकत्वस्वीकाराय। स्वसमानाधिकरणेति पदमिति ॥ ७६ ॥

**अनुवाद**—पक्षासिद्धि वहाँ होती है जहाँ मणिमय गिरि पक्ष होता है। 'ह्रदो द्रव्यं धूमवत्वात्' में दूसरी असिद्धि होती है। नीलधूम आदि में व्याप्यत्वासिद्धि होती है।

**पक्षासिद्धिरिति**। पक्षासिद्धि का अर्थ आश्रयासिद्धि है। **अपरेति**। अपरा का अर्थ स्वरूपासिद्धि है। **नीलधूमादिक इति**। नीलधूमत्व गुरु होने से हेतुता का अवच्छेदक नहीं होता, क्योंकि अपने समानाधिकरण की व्याप्यता के अवच्छेदक धर्मान्तर से घटित का ही व्याप्यतावच्छेदक होता है। धूमप्रागभाव के सङ्ग्रह के लिए 'अपने समानाधिकरण की' पदावली रखी गई है ॥ ७६ ॥

## विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥

विरुद्धयोरिति। कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षत्वमत उक्तं—विरुद्धयोरिति। तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ७७ ॥

**आलोकः**—परममूले सत्प्रतिपक्षतां लक्षयति—**विरुद्धयोरिति**। **विरुद्धयोः** हेत्वोः परामर्शे सत्प्रतिपक्षता भवतीति। **विरुद्धयोः** परस्पराऽसमानाधिकरणसाध्ययोः। यो

हेतू तयोः हेत्वोः । **परामर्शे** परामर्शद्वैधे साध्यव्याप्यवान् पक्षः साध्याभावव्याप्यवान् पक्ष इति च । **सत्प्रतिपक्षता** सन् विद्यमानः प्रतिपक्षः स्वीयसाध्याभावसाधकोऽपरो हेतुर्यस्य तस्य भावस्तत्ता भवति च तद्वान् सत्प्रतिपक्ष इति ।

( श्रावणत्वादितो नित्योऽनित्यस्तु कार्यतादितः । )

शब्दो हि श्रावणत्वादिहेतोर्नित्यः कार्य( जन्य )त्वादिहेतोरनित्य इति । मूले कारिकाशयं विवृणोति—**विरुद्धयोरि**ति । विरुद्धयोरिति पदाशयं निर्वक्ति—**कपीति** । **कपिसंयोगतदभावव्याप्यवत्तापरामर्शे** वृक्षत्वादिहेतौ कपिसंयोगस्य तथा कपिसंयोगाभावस्य चानयोर्व्याप्यत्वपरामर्शे । **अपि च** । **न** । **सत्प्रतिपक्षत्वं** सत्प्रतिपक्षव्यवहारः परस्परविरोधाभावात् स्वसाध्येन विरुद्धो यः साध्याभावस्तद्व्याप्यवत्तापरामर्शकाले एव साध्यव्याप्यवत्तापरामर्शस्य विषयः सत्प्रतिपक्षो भवति । अतः । **उक्तं** कथितम् । विरुद्धयोरिति । निष्कृष्टं लक्षणमाह—**तथेति** । **तथा** । **च** । **स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषयः** स्वं सत्प्रतिपक्षत्वेनाभिमतो यो हेतुः तत्साध्यविरुद्धो यः साध्याभावः तद्व्याप्यवत्तापरामर्शकालीनो यः साध्यव्याप्यवत्तापरामर्शः तद्विषयः सत्प्रतिपक्षः । इत्यर्थः । 'ह्रदो वह्निमान् धूमात्' इत्यत्र स्वं सत्प्रतिपक्षत्वेनाभिमतो धूमः, तत्साध्यं वह्निस्तद्विरुद्धो यः साध्याभावो वह्न्यभावस्तद्व्याप्यवत्तापरामर्शः धूमाभावव्याप्यजलवान् ह्रद इति परामर्शस्तत्कालीनो यः साध्यव्याप्यवत्तापरामर्शः वह्निव्याप्यधूमवान् ह्रद इति तद्विषयो धूमः सत्प्रतिपक्ष इत्याशयः ॥ ७७ ॥

**अनुवाद**—परस्पर असमान अधिकरणवाले साध्यों के जो हेतु हैं, उनके साध्यव्याप्यवान् पक्ष तथा साध्याभावव्याप्यवान् पक्ष, ऐसे दोनों परामर्शों में सत्प्रतिपक्षता होती है और उससे युक्त सत्प्रतिपक्ष होता है ।

**विरुद्धयोरिति** । कपिसंयोग एवं तदभाव से व्याप्यवत्ता के परामर्श में भी सत्प्रतिपक्षितत्व नहीं है, अतः 'विरुद्धयोः'='परस्पर असमान अधिकरण वाले साध्यों के' ऐसा कहा गया है । इसी तरह अपने साध्य के विरुद्ध जो साध्याभाव है, उसके व्याप्यवत्ता के परामर्शकालीन जो साध्य है, उसकी व्याप्यवत्ता के परामर्श का विषय सत्प्रतिपक्ष है, ऐसा अर्थ है ॥ ७७ ॥

**साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।**
**उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥**

साध्यशून्य इति । पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यम् ॥ ७८ ॥

इति न्यायपञ्चाननश्रीविश्वनाथभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यामनुमानखण्डम् ॥

आलोकः—परमूले बाधं लक्षयति—साध्यशून्य इति । यत्र पक्षः साध्यशून्यः असौ बाधः उदाहृतः, यत्र उत्पत्तिकालीनघटे गन्धादिः साध्यते इति । यत्र प्रयोगे । पक्षः साध्योधिकरणः । साध्यशून्यः साध्याभाववान् भवति । असौ । बाधः बाधदोषः । उदाहृतः कथितः । यत्र यस्मिन् प्रयोगे । उत्पत्तिकालीनघटे उत्पत्तिक्षणघटे । गन्धादिः । साध्यते । मूले कारिकाशयं स्पष्टयति—साध्यशून्य इति । कारिकायां पक्ष इति । पक्षतावच्छेदकविशिष्टः पक्षत्वं घटत्वम्, तदवच्छेदकोऽत्र उत्पत्तिक्षणस्तद्विशिष्टः पक्ष इत्यर्थः। उत्पत्तिक्षणविशिष्टो घट इति । तेन तथाशयेन । घटे । गन्धसत्त्वे कालान्तरे गन्धसद्भावे । अपि । न क्षतिः बाधे हानिः । एवम् इत्थम् । मूलावच्छिन्नो वृक्षः कपिसंयोगी । इति । अत्रापि । बोध्यम् । 'उत्पत्तिकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वात्' इत्यत्र पक्षे पक्षतावच्छेदककालविशिष्टपक्षग्रहणेन कालान्तरे घटे गन्धसत्त्वेऽपि न बाधदोषे क्षतिः । एवं 'मूलावच्छिन्नो वृक्षः कपिसंयोगी एतद् वृक्षत्वात्' इत्यत्र वृक्षे शाखावच्छेदेन कपिसंयोगेऽपि पक्षतावच्छेदकमूलावच्छेदेन नास्ति कपिसंयोगः । एवं मूलरूपदेशस्यावच्छेदकत्वेन बाधो भवत्येवेति ।

इति श्रीवत्सगोत्रीयषट्कर्मनिरतपरशुरामात्मजविष्णुमायागर्भजलोकमणिदाहालप्रणीते सिद्धान्तमुक्तावलीसहितकारिकावल्याः आलोकाख्यटीकायां द्वितीयमनुमानखण्डं समाप्तम् ।

समाप्ता पञ्चमी मुक्ताऽनुमानाख्या समासतः ।
नमस्तेभ्यो विपश्चिद्भ्यो याननुसृत्य सारतः ।
सुसम्पन्नं विवरणमिदं सारविवेचकम् ॥

---

अनुवाद—जहाँ पक्ष साध्य से शून्य होता है वह बाध कहलाता है, जहाँ उत्पत्तिकालीन घट में गन्ध आदि साधित किया जाता है ।

साध्यशून्य इति । पक्ष का अर्थ है—पक्षतावच्छेदक से विशिष्ट, ऐसा अर्थ है । इस कारण घट में कालान्तर से गन्ध के रहने पर भी कोई क्षति नहीं है । इस प्रकार 'मूलावच्छिन्नो वृक्षः कपिसंयोगी' इसमें भी जान लेना चाहिए ॥ ७८ ॥